विक्रमाब्दः - 2075 ख्रीस्ताब्दः - 2018 ISSN NO. 2457-0729
तृतीयोऽङ्कः

# वाग्वै ब्रह्म

सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्त्रिका

**Peer Reviewed Research Journal**

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क०जे०सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई – 77

# सङ्गोष्ठीचित्राणि


ASHTRIYA SANSKRIT SANSTHAN
DEEMED UNIVERSITY
UNDER MHRD, GOVT OF INDIA












ASHTRIYA SANSKRIT SANSTHAN
DEEMED UNIVERSITY
UNDER MHRD, GOVT OF INDIA





विक्रमाब्दः - 2075 खीस्ताब्दः - 2018 ISSN NO. 2457-0729
तृतीयोऽङ्कः

# वाग्वै ब्रह्म

सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्त्रिका

Peer Reviewed Research Journal

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क०जे०सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई – 77

| | |
|---|---|
| **RNI No.** | **MAHSAN/2017/73496** |
| **ISSN No.** | **2457-0729** |
| **मुद्रकः** | प्रो. बोधकुमारझाः |
| **प्रकाशकः** | प्रो. बोधकुमारझाः |
| **स्वामिनो नाम** | राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)<br>(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)<br>क. जे. सोमैया संस्कृतविद्यापीठम्,<br>विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077 |
| **मुद्रणम्** | वन्दना आर्टस्, बी-56, भूमितलम् स्टेशन प्लाझा, स्टेशन रोड,<br>भाण्डुपम् (पश्चिमम्), मुम्बई - 400 078, महाराष्ट्रम्, भारतम् । |
| **प्रकाशनम्** | राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)<br>(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)<br>क. जे. सोमैया संस्कृतविद्यापीठम्,<br>विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077 |
| **अङ्कः** | तृतीयः |
| **अनुवृत्तयः** | 100 |
| **प्रकाशनसमयः** | दिसम्बर, 2018 |
| **संरक्षकः** | **प्रो. सुदेशकुमारशर्म्मा, प्राचार्य्यः,**<br>**रा. सं. सं., क. जे. सोमैयासंस्कृतविद्यापीठम्,**<br>**विद्याविहारः, मुम्बई ।** |
| **सम्पादकः** | **प्रो. बोधकुमारझाः** |
| **सम्पादकमण्डलम्** | **प्रो. बोधकुमारझाः**, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>**डॉ.सुभाषचन्द्रमीणा**, सहायकाचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>**डॉ. माधवदत्तपाण्डेयः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>**डॉ. नवीनकुमारमिश्रः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।<br>**सुश्रीविदुषीबोल्ला**, शोधप्रज्ञा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई । |

**पुनर्वीक्षकमण्डलम्**

- **प्रो. दिलीपकुमारझाः,**
  कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः,
  दरभंगा, बिहारः, ।
- **प्रो. (श्रीमती) अर्चना दूबे,**
  श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- **प्रो. अशोकचन्द्रगौडः,**
  आचार्य्यचरः राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः,
  हिमाचलप्रदेशः ।
- **डॉ. प्रियव्रतमिश्रः,**
  श्रीरामसुन्दरविश्वविद्याप्रतिष्ठानम्,
  रमौली, दरभंगा, बिहारः ।

**मूल्याङ्कनकर्तृमण्डलम्**

- **प्रो. मदनमोहनझाः,** आचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मूः ।
- **डॉ. देवदत्तसरोदे,** सहायकाचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. रा. गा. मुरलीकृष्णः,** सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।
- **डॉ. मधुकेश्वरभट्टः,** सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।

Printed by Prof. Bodh Kumar Jha, Published by Prof. Bodh Kumar Jha on behalf of Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Mahrashtra – 400 077 and Printed at Vandana Arts B-56, Ground Floor, Station Plaza, Station Road, Bhandup (West), Mumbai – 400 078, Maharashtra, India and Published at Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Maharashtra – 400 077, Editor Prof. Bodh Kumar Jha

सुरभारतीपरम्पराग्रणीभ्यः शाब्दिकधाराधराधरेभ्यो विविधशास्त्रपण्डितेभ्यो वाराणसेय-
गाङ्गजलपानपवित्रेभ्यो राष्ट्रियसंस्कृतसंस्थानश्रीसदाशिवपरिसरपुर्य्यां प्रारब्ध-
शास्त्रसेवेभ्यो मुम्बादेवीआदर्शसंस्कृतमहाविद्यालये प्राचार्य्यपदं सुशोभित-
वद्भ्यो राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठमुम्बई-
व्याकरणविभागे नैकवर्षाणि शास्त्रचूडामणिरूपेण कृतयोगदानेभ्यः
'अतिदेशसूत्रविमर्शः' इति नामधेयपुस्तकप्रणेतृभ्यः
शिष्यवत्सलेभ्यो
आचार्य्यरामरूपमिश्रशर्म्मभ्यः




राष्ट्रियसंस्कृतसंस्थानस्य
क. जे. सोमैयासंस्कृतविद्यापीठस्य
व्याकरणविभागेन विद्यापीठपरिवारेण
चैषमो दिवङ्गतेभ्यो विद्वद्वरेण्येभ्यः सप्रश्रयं
साश्रु श्रद्धाञ्जलिकुसुमानि विभागीयपत्त्रिकामयानि
समर्प्यन्ते, सास्मर्यन्ते चास्मिन्नवसरे स्मितमुखाः पण्डितप्रवराः ॥

राष्ट्रियसंस्कृतसंस्थानम्,
(मानितविश्वविद्यालयः)
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
**क. जे. सोमैयासंस्कृतविद्यापीठम्**, विद्याविहारः,
मुम्बई - 400 077

**Rashtriya Sanskrit Sansthanam**
(Deemed University)
(Under MHRD, Govt. of India)
**K.J. Somaiya Sanskrit Vidyapeetham**
Vidyavihar, Mumbai-400077



स्वस्त्यस्तु । ऐतरेयब्राह्मणस्य 'वाग्वै समुद्रः', 'न वाक्क्षीयते', शतपथब्राह्मणस्य 'वाग्वै विराट्', ऐतरेयब्राह्मणस्यैव 'वाचो वा इदं सर्वं प्रभवति' इत्यादिश्रुतयः वाचः अक्षरत्वमनन्तत्वं विभुत्वं ब्रह्माण्डस्य उपादानकारकत्वञ्च घोषयन्ति ।

सिद्धान्तशैवानुसारं त्रीणि रत्नानि भवन्ति । तेषु शिवः, ज्ञानरूपा शक्तिश्च इत्येकं रत्नम्, शिवस्य बिन्दुरूपा परिग्रहशक्तिः क्रियाशक्त्यपरनामधेया द्वितीयं रत्नम्, आत्मा चेति तृतीयं रत्नम् । तद्बिन्दोश्च भेदद्वयं शुद्धम् अशुद्धञ्च । द्विविधबिन्दुभ्यामुत्पन्ना धारा जगदात्मिका, तत् परिणामश्च वाणीरूपः । तदतिक्रमणमेव मोक्षः ।

आचार्य्योऽभिनवगुप्तश्च ब्रूते प्रकाशो विमर्शश्चेति वस्तुद्वयम् । तयोः प्रकाशः शिवः, विमर्शश्च तदीया स्वान्त्र्यशक्तिः उमारूपा । पुनरपि प्रकाशं विना विमर्शस्य, विमर्शं विना च प्रकाशस्य अस्तित्वासम्भवात्, द्वयोः ऐक्यम् । तस्मादेव मतमेतद् अद्वैतमिति । अत्र विमर्शः परावाक्त्वेन, प्रकाशश्च अर्थत्वेन सम्मन्यते । अमुमेव सिद्धान्तं कालिदासः 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।' इति मङ्गलाचरणेन अभिव्यनक्ति ।

शब्दब्रह्मवादिनां वैयाकरणानाञ्च परा वागेव शब्दब्रह्म, तस्मिन् तादात्म्यमेव जीवस्य मोक्षः । मुक्तिदशायामपि शब्दात्मना जीवस्य स्थितिः भवत्येव ।

अस्तु । वाक्यपदीयसरणिमनुसृत्य वाक्तत्त्वस्य आध्यात्मिकं भौतिकञ्च तत्त्वमाविष्कर्त्तुं प्रवृत्तायाः व्याकरणशास्त्रीयराष्ट्रियशोधसंगोष्ठ्याः प्रशस्तानि शोधपत्राणि समूह्य 'वाग्वै ब्रह्म' इति नाम्ना ख्यातिङ्गतां शोधपत्रिकां विद्यापीठस्यास्य व्याकरणविभागः प्रकाशनं करोतीति महतो मोदस्य विषयः ।

अवसरेऽस्मिन् शोधितपत्रेभ्यः आचार्य्येभ्यः गवेषकेभ्यः विभागीयसदस्येभ्यश्च साधुवादान् यच्छामः । वाक्तत्त्वरुचिमद्भ्यः, विशेषतश्च शाब्दिकजगज्जीवेभ्यः पत्रिकैषा स्वस्तिकरा भूयादिति कामयामहे ।

**( प्रो. सुदेशकुमारशर्मा )**
**प्राचार्य्यः**



# सम्पादकीयम्

व्याकृतिविद्यायाः त्रिविधो विकासः प्रथते । अष्टाध्यायीक्रमेण प्रक्रियाक्रमेण दार्शनिकक्रमेण च । तत्र सर्वेषामेव मूलं पातञ्जलमहाभाष्यमिति विश्रुतम् । यन्महाभाष्य-काराणामभिमतं तदेव शाब्दिकानां मतमिति कश्चन शाब्दिकपरम्परायां सिद्धान्तः । दार्शनिक-तथ्यप्रकाशनपरः अद्वैतस्फोटवादानुरूपसिद्धान्तप्रतिपादनपरश्च सङ्ग्रहनामको ग्रन्थो यद्यपि महाभाष्यादपि पूर्वमासीदिति स्वयं पतञ्जलिना तदुल्लिखितत्वादिति प्रतीमः, तथापि तस्यानुपलब्धेः महाभाष्यस्य तद्वासनावासितत्वाच्च दार्शनिकधारायाः अपि मूलं महाभाष्यमिति निर्भ्रान्तं वचः। तत्र सरलया कारिकात्मिकया रीत्या योगर्षिणा भर्त्तृहरिणा वाक्यपदीयमिति विश्वविश्रुतं ग्रन्थरत्नं महाभाष्यरहस्यमुज्जिघाटयिषया प्राणायि । काण्डत्रये ब्रह्मवाक्यपदात्मके प्रकृतिप्रत्ययतदर्थवाक्यपदतत्तदर्थप्रदर्शनपरोऽप्ययं ग्रन्थः शब्दब्रह्माद्वैतवादं सयुक्ति प्रकटयति । अत एव ग्रन्थस्यास्य प्रारम्भो ब्रह्मकाण्डाभिधेयेन काण्डेन प्रकाण्डेन पण्डितेन वाग्घरिणा भर्त्तृहरिणा अकारि । आशयममुं जानानेन राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृत-विद्यापीठस्य व्याकरणविभागेन ब्रह्मकाण्डीयं विषयवस्तुजातम् उररीकृत्य गवेषणं चिन्तनं समालोचनञ्च वाञ्छता 29.11.2018 इत्यतः 30.11.2018 पर्य्यन्तं राष्ट्रिया सङ्गोष्ठी समायोज्यत । तत्र नवदशानां विदुषां गवेषकाणाञ्च महत्त्वपूर्णानि शास्त्रतत्त्वप्रस्फोटकानि शोधपत्राणि वाचितानि। तानि संगृह्य प्रतिशोधपत्रं सम्पादकीयवक्तव्येन सह 'वाग्वै ब्रह्म' इत्याख्यायां व्याकरणशास्त्रविभागीयराष्ट्रियशोधपत्रिकायां सर्वजनसुलभतामुद्दिश्य प्रकाशनं कर्त्तुकामो विभागोऽयं तत्रभवतां भवतां पुरस्तात् पत्रिकापुष्पं पुरस्कृत्य नितरां प्रसीदति ।

सारस्वतसाधनासिद्धिरूपाणि शोधपत्राणि अत्र पत्रिकागर्भगतानि सन्ति, सन्ति च संरक्षकाणां विद्यापीठप्राचार्य्याणामाचार्यसुदेशकुमारशर्म्मणाम् आशीर्वादाः, अथ च सम्पादन-प्रकाशनपुनर्वीक्षणमूल्यांकनकर्त्तृणां भारतवर्षस्य नानानामस्थलानां विद्वद्धौरेयाणाम् उदार-चरितानां कृपाः, तेभ्यः समेभ्यः सारस्वतसमुपासकेभ्यो विभागोऽसौ, अदसीयसम्पादक-मण्डलञ्च कार्तज्ञं विज्ञाप्य वाग्ब्रह्म स्मारं स्मारं कामयते ।



प्रो. बोधकुमारझाः

# शोधपत्रानुक्रमणिका


| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | भर्तृहरेः वाचां त्रयीत्वं वा, चतुष्टयीत्वं वा । | प्रो. बोधकुमारझाः | 1 |
| 2. | भर्तृहरिमते शब्दवैशिष्ट्यविमर्शः । | प्रो. अशोचन्द्रगौडशास्त्री | 8 |
| 3. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | डॉ. राजधरमिश्रः | 15 |
| 4. | जगतः शब्दविवर्त्तत्वविचारः । | डॉ. देवदत्तः सरोदे | 20 |
| 5. | तुरीयवागुत्पत्तिविमर्शः - वाक्यपदीयसन्दर्भे । | डॉ. प्रियव्रतमिश्रः | 27 |
| 6. | भावविकारसन्दर्भे भावपदार्थः । | डॉ. दीपेशविनोदकतिरा | 33 |
| 7. | वाक्यपदीयस्य ब्रह्मकाण्डे जगतः शब्दपरिणामत्वम् । | डॉ. शरदचन्द्रसाहुः | 39 |
| 8. | Phonetics and Phonology : An Historical View. | Dr. Shweta Sood | 48 |
| 9. | शास्त्रेषु नञर्थविमर्शः । | डॉ. सन्तोषकुमारझाः | 55 |
| 10. | वाक्यपदीये शब्दब्रह्मणः स्वरूपम् । | श्रीसत्यराजरेग्मी | 60 |
| 11. | 'इष्यते पुत्रः' इत्यत्र क्यजभावस्य रहस्यम् । | ब्र. अजयः | 70 |
| 12. | उदात्तादि स्वरों का स्वरूप विवेचन । | आचार्य उदयन मीमांसक | 74 |
| 13. | भर्तृहरिदृशा अपभ्रंशशब्दविमर्शः । | सुश्रीविदुषीबोल्ला | 93 |
| 14. | वाक्यपदीयस्फोटविमर्शः । | डॉ. सुभाषचन्द्रमीणा | 99 |
| 15. | आगमप्रामाण्यविचारः । | डॉ. नवीनकुमारमिश्रः | 105 |
| 16. | शब्दार्थसम्बन्धनिरूपणम् । | डॉ. माधवदत्तपाण्डेयः | 111 |
| 17. | वाक्यपदीय-ब्रह्मकाण्ड में उपमा एवं उदाहरण का अन्वेषण । | डॉ. (श्रीमती)गीता दुबे | 119 |
| 18. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | सौ. मैत्रेयी सुयोगपटवर्धन | 126 |
| 19. | वाक्यपदीये शब्दतत्त्वम् | श्रीरूपेशताटे | 132 |

# भर्तृहरेः वाचां त्रयीत्वं वा, चतुष्टयीत्वं वा

✍प्रो. बोधकुमारझाः

**(संस्कृतव्याकरणस्य चतुर्थो मुनिस्तत्रभर्तृहरिः स्ववाक्यपदीये वाग्रहस्यमुद्-घाटयामास । तत्र व्याकरणान्वाख्येयत्वं पश्यन्त्यादिषु तिसृषु एवति विभाव्य 'त्रय्या वाचः परं पदमि'त्यत्र वाचस्त्रयीत्वं प्रतिपादयामासेति केचित् । अन्ये च परं पदमित्यादिना पराया अपि विवरणं हरिणा प्रदत्तमिति ब्रुवन्ति । तत्रायं लेखः वाचां चतुष्टयीत्वपक्षे निर्णयति । वेदोपनिषदादीनां प्रमाणेन, नानाऽऽचार्याणां वचनेन चात्र पूर्वपक्षत्वेन त्रयीत्वपक्षः पोषितः, उत्तर-पक्षत्वेन च चतुष्ट्वे सम्मतिः प्रकटिता । तथाहि 'चत्वारि पदानि, नामाख्यातोपसर्गनिपाताश्चे'त्यत्र द्वन्द्वान्ते समुच्चयार्थकः चकारप्रयोगः सार्थकः, तेन परादीनां चतसृणां ग्रहणम् । अन्यथा नामादीनामेव ग्रहणे चकारोऽनर्थकः - इत्यादयो युक्तयः प्रदर्शिताः । - स.)**

त्रयीपदेनात्र पश्यन्ती, मध्यमा, वैखरी; अथ चतुष्टयीपदेन परा, पश्यन्ती, मध्यमा, वैखरी चति गृह्यते । तत्र नव्यशाब्दिकैः भट्टनागेशैः वाचश्चातुर्विध्यं स्वीक्रियत इति तैरेव कण्ठरवेणोक्तं मञ्जूषायाम् - **परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता,**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगे**'त्याद्युपन्यस्यद्भिः ।

परं वाक्यपदीये वाग्घरिभिः भर्तृहरिभिः कारिकैका प्रस्तुता, तस्यां त्रय्या वाचः इत्युक्तम् । कारिका चेयमित्थम् - **वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।**
**अनेकतीर्थभेदायास्त्रय्या वाचः परं पदमिति ॥**

इमां कारिकां व्याचक्षाणैः विद्वद्भिः भर्तृहरिसम्मता त्रयी, चतुष्टयी वा वाचः इति विषयेऽत्यन्तं विवादः उपस्थाप्यते । अतस्तद्विषये अस्माभिः कथं वा भाव्यमित्यत्राहं मे विचारं पुरस्करिष्यामि - ततः प्राक् व्याख्याकृतां युक्तयः प्रदर्श्यन्ते ।

**त्रयी वागित्यत्र युक्तयः -**

1. पश्यन्ती एव सूक्ष्मत्वेन परा वाक् । पश्यन्तीमतिक्रान्ता तद्भिन्नरूपा वा सा इति विचारस्तु व्यर्थ एव, सगुण-निर्गुणादिभेदेन परापरभेदेन वा द्विविधतया वर्णितस्यापि ब्रह्मणो यथा एकत्वं न विरुद्धम्, तथा एकैव प्रत्यवमर्शिनी वाक् गुणभूमिमतीत्य कदाचित्पश्यन्तीति, कदाचिच्च परेति सञ्ज्ञयोपवर्ण्यते ।
2. अत एव 'इत्याहुस्ते परं ब्रह्म यदनादि तथाक्षरम् । तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्' इति शिवदृष्टौ वैयाकरणमतानुवादावसरे पश्यन्त्येव परात्वेनोपवर्णिता ।

3. वाचां त्रित्वे एव मध्यमा वागिति व्यपदेश उपपद्यते ।

भावप्रकाशव्याख्यायां पूर्वम् इदमत्रावधेयम् इति बिन्दुना उपर्युक्तं यक्तित्रयमुक्त्वा अग्रे नागोजीभट्टास्तु सिद्धान्तशैवानां मतं, तन्त्रशास्त्रञ्चाश्रित्य वाचश्चतुर्विधत्वमाहुः, तत्तु व्याकरण-सिद्धान्तानवबोधनिबन्धनमित्युक्तम् । हेतुश्च तत्र हर्यादिभिर्वाचस्त्रित्वस्यैवोक्तत्वात् इत्युपन्यस्तः ।

तत्रैव पुनः स्वयमाशङ्क्योत्तरति – न च चत्वारि वाक्परिमिता इति भाष्योदाहृतश्रुतिमूलकं नागोजीभट्टोक्तम् । अत एव च माधवेन ऋग्वेदभाष्ये चत्वारि वाक्परिमिता पदानीत्यनेन वैखरीमध्यमापश्यन्तीपरारूपाणि दर्शितानि, व्याख्यातं चौवमेवोद्योते इति वाच्यम्, कैयटेन उक्तश्रुतेः 'तत्र चतुर्णां नामाख्यातोपसर्गनिपाताख्यानां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा वदन्तीति' व्याख्याततत्वेन माधवादिव्याख्यानस्य तन्त्रशास्त्रवासनामूलकतया वैयाकरणैरनुपादेयत्वात् इति ।

पद्मश्रीपण्डितरघुनाथशर्म्मणा अम्बाकर्त्रीव्याख्याकृताऽपि[1] वाचः त्रयी एव स्वीकृता । तथा चोक्तम् – यत्तु क्वचित् परा–पश्यन्ती–मध्यमा–वैखरी इति वाचो भेदचतुष्टयमुक्तम्, तत्पश्यन्त्या एव परापरभेदमाश्रित्य द्रष्टव्यम् इति । तथैव पश्यन्ती तु पराऽपरा चेति द्विविधा शर्म्म-महाशयस्यापि सम्मतेति स्पष्टं प्रतिभाति । अस्तु, इदानीं चतुष्टयी वागिति संस्तूयते ।

**तत्र चतुष्ट्वे युक्तयः –**

1. 'त्रय्या वाचः परं पदम्' इत्यत्र 'परं' पदेन तुरीया परा वाग् विवक्षिता । न तु उत्कृष्टमिति । यदि तदव विवक्षितं स्यात् तर्हि वरम् इत्यसन्दिग्धं पदं किं नोपन्यस्तं हरिणा ? किमभिप्रेत्य सांशयिकं 'परम्' इत्यनेकार्थकं पदं विन्यस्तम् ? नूनमस्ति तत्प्रयोगे कोऽप्यभिप्रायविशेषः । स तु भवितुमर्हति यदि श्रुतिस्मृतिप्रसिद्धं पराख्यं तुरीयं वच एवेह विवक्ष्येत ।
2. यत्तु वाचस्त्रिविधत्वे पश्यन्त्या एव परापरेति भेदौ, तयोरेका त्वपरा चञ्चला समाविष्टक्रमशक्तिरविशुद्धा अविद्ययाऽऽवृता विक्षिप्ता, अन्या तु परा निःस्पन्दा विलीनक्रमशक्तिः विशुद्धेत्यभ्युपगम्यते, तदा स्वीकृतमेव वाचश्चतुर्विधत्वम् । नो चेत् पश्यन्तीनामव्यपदेशेन स्वतन्त्रपराया अस्वीकारे कः पुरुषार्थः? तस्माद् वरं निर्व्याजमङ्गीक्रियतां परा वाग्देवीति ।
3. 'स्वरूपज्योतिरेवान्तः परावागनपायिनी । तस्यां दृष्टस्वरूपायामन्धकारो निवर्त्तते' इति महाभारतश्लोके कैश्चित् 'परा' इति पाठं विहाय 'सूक्ष्मा' वाग् इति पाठः प्रक्षिप्तः, सोऽपार्थकः क्रमविरुद्धश्च । पश्यन्त्याः प्राक् मध्यमा वागेव यदि सूक्ष्मा, तर्हि पश्यन्त्याः का कथा? सा सूक्ष्मतरा । अथानपेक्ष्य तारतम्यं साधारणतया पश्यन्ती सूक्ष्मा इत्युच्यते, तदा मध्यमातस्तस्या अव्यावृत्तेः विशेषणकृत्यं न पश्यामः । तर्हि किमिति वाचश्चतु-र्विधत्वमपलपितुमेव सूक्ष्मेति प्रक्षिप्यते ? इत्यहो मात्सर्य्यम् ।

4. यत्तु वाचस्त्रिविधत्वे एव मध्यमा इति नाम युज्यते इति केनचिदुच्यते, तन्न युक्तियुक्तम्, सर्वाधिष्ठानभूतां सर्वथा निःस्पन्दां परां शुद्धां विहाय देशभेदोपाधिकल्पितासु स्पन्दमानासु तिसृषु मध्ये वर्त्तमानाया मध्यमात्वव्यपदेशस्य युक्तत्वात् । आदिमध्यान्तत्वव्यवहारस्य ज्येष्ठमध्यमकनिष्ठत्वव्यवहारस्य वा सजातीयापेक्षत्वात् । नहि विजातीयकन्यायाः सत्त्वे पुत्रत्रये ज्येष्ठकनिष्ठयोर्मध्ये जातस्य मध्यमात्वहानिरिति विभाव्यताम् । किञ्च, मूलाधार–स्थमूलवाचः सत्त्वेऽपि नाभिकण्ठयोर्मध्ये हृदयदेशेऽवस्थानादपि तस्या मध्यमाभिधान–मुपपद्यते इति ।

5. यत्तु केचनात्र – 'इत्याहुस्ते परं ब्रह्म यदनादि तथाऽक्षरम् । तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्' इति शिवदृष्टिवाक्यं प्रमाणत्वेनोदाहृत्य पश्यन्त्येव परावागित्यभिमन्यते, तदसत्, तत्र शब्दब्रह्मणः परापश्यन्त्यादिसकलस्वरूपत्वप्रतिपादने तात्पर्य्यम्, न तु पश्यन्त्याः परारूपत्वबोधने । उद्देश्यविधेयभावेनेह परब्रह्मणः अक्षरशब्दरूपत्वम्, अक्षरशब्दस्य च कार्य्यब्रह्मपश्यन्तीरूपत्वम्, कारणब्रह्मणश्च परारूपत्वं विवक्षितम् । तथाहि – सा इत्यावृत्त्या अन्वेति – तद् अक्षरं शब्दरूपं सा हि पश्यन्ती, सा हि परा वाक् इत्यन्वयेन अक्षरशब्दस्य च परापश्यन्त्युभयरूपत्वप्रतिपादनं सुस्पष्टम्, पश्यन्त्याः परारूपत्वबोधनं तु तात्पर्य्यानाकलनाद् भ्रम एवेति । तस्मान्नायं शिवदृष्टिग्रन्थः पश्यन्त्याः परारूपत्वसाधने प्रतिभूः । प्रत्युत पश्यन्तीतः परायाः पृथङ्निर्देशात् स्वतन्त्ररूपत्वमेवानेन प्रमीयते । अन्यथा तयोरैक्ये घटकलशादिपर्य्यायशब्दवदुभयोः सहप्रयोगस्योद्देश्यविधेय–भावबोधनस्य च नितरामयुक्तत्वमेव । तयोः परमार्थतोऽभिन्नरूपत्वेऽपि उपहितानुपहित–स्वरूपत्वेन व्यवहारे स्वरूपवैलक्षण्यकृतं वाचश्चतुर्विधत्वं स्फुटम्, अन्यथा परमार्थतः सर्वासामेकरूपत्वेन त्रिविधत्वमपि दुर्निरूपं स्यात् ।

6. वाचश्चतुर्विधत्वात् तासाञ्चैकरूपत्वात् एव प्राह प्रमाणभूत आचार्य्यनन्दिकेश्वरः –

**सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।**
**ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः परम् ॥**
**वाक्ये विशुद्धचक्राख्ये वैखरी सा, मता ततः ।**
**वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ॥**
**चन्द्रचन्द्रिकयोर्यद्वद् यथा वागर्थयोरपि ॥ इति ।**

अस्यायमर्थः – विवर्त्तकार्य्यात् पूर्वं सर्वमिदं जगत् ज्ञप्तिमात्रम् अधिष्ठानचैतन्यं शब्दब्रह्मरूपं परात्मकं वच एवासीत् । तस्मात् पश्यन्ती सर्वार्थदक्स्वरूपा बभूव, ततो विवक्षावशादूर्ध्वं समीरिता सूक्ष्मवर्णक्रमेण प्रतिभासमाना मध्यमा वाग् बभूव, तदनन्तरं सैव मध्यमा प्राणवृत्त्या विशुद्धचक्रे मुखस्थे समीरिता सती वर्णरूपेण विवृत्ता वैखरी बभूव । वृत्तिभेदेन तां तामाख्याभेदं च भजमानमपि परात्मकं वचो वस्तुतश्चन्द्रचन्द्रिकयोरिव वागर्थयोरिव च वृत्तिवृत्तिमतोर्भेदाभावात् परमार्थतोऽभिन्नमेव राजते इति ।

आनन्दा-सूर्य्यमायाव्याख्याकृद्भिः पण्डितवेदानन्दझामहोदयैः स्वव्याख्याने भर्त्तहरेः सम्मतं वाचश्चतुर्विधत्वं तु श्रुतिषु सुस्पष्टं श्रुतम्, आगमेषु च विश्रुतमित्युक्त्वा नाना प्रमाणानि चतुष्ट्वे प्रतिपादितानि । तथाहि -

प्रथमन्तावन्महाभाष्ये व्याकरणप्रयोजननिरूपणावसरे समुदाहृतऋङ्मन्त्र एव प्रमाणम् - 'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहायां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति'[2] इति । अयमर्थः - वाचः शब्दस्य परिमितानि स्थानभेदेन स्वरूपतो नामतश्च विभक्तानि चत्वारि पदानि परा-पश्यन्ती-मध्यमा-वैखरीलक्षणानि सन्ति, तानि सर्वाणि ब्राह्मणा वेदाध्ययनप्रवचनशीला मनीषिणो वैयाकरणा विदन्ति । तेषु त्रोणि पदानि गुहायाम् बुद्धौ अज्ञाने वा निहितानि अन्तःस्थितानि आवृतानि वा नेङ्गयन्ति व्याकरणप्रदीपं विना बहिर्न प्रकाशन्ते, वाचः तुरीयं चतुर्थभागं वैखर्याख्यं व्यक्तवर्णपदादिरूपं मनुष्या अवैयाकरणाः वदन्ति विदन्ति चेति नागेशानुमतं व्याख्यानम् ।

यद्वा, वाचः परिमितानि चत्वारि पदानि नामाख्यातोपसर्गनिपाताः, प्रत्येकं परा-पश्यन्ती-मध्यमा-वैखरीभेदैश्चतुष्पादाः सन्ति । तानि सर्वाणि मनीषिणः वैयाकरणाः ब्राह्मणा एव विदन्ति । तेषां नामादीनां त्रयो भागाः परादिमध्यमापर्य्यन्ताः बुद्धिगुहायामज्ञानकुहरे वा स्थिता न प्रकाशन्ते, चतुर्ण्णां नामादीनां पदानामेकैकस्य चतुर्थं भागं वैखर्य्याख्यं मनुष्या अवैयाकरणा विदन्ति इति कैयटाशयः ।

तत्र नामाख्यातोपसर्गनिपाताः प्रत्येकं परापश्यन्त्यादिभेदैश्चतुष्पादाः सर्वतन्त्रप्रसिद्धाः । तस्मात् मन्ये चत्वारि पदानि इत्यनेन परापश्यन्त्यादीनि नामाख्यातोपसर्गनिपाताश्च इत्यत्र द्वन्द्वपदोत्तरं समुच्चयार्थश्चकार उपपद्यते । परापश्यन्त्यादीनामसङ्ग्रहे तु निपाताश्च इति द्वन्द्वान्ते चकार-प्रयोगोऽनर्थक एवापद्येत, इत्यवधीयतां सुधीभिः । अत एव सायणेन, माधवेन च प्रमाणभूतेना-चार्य्येण ऋग्वेदभाष्ये मन्त्रमेनं व्याचक्षाणेन चत्वारि पदानि परा-पश्यन्ती-मध्यमा-वैखरीरूपाणि वर्णितानि ।

पण्डितसभापतिशर्मोपाध्यायाः रत्नप्रभाव्याख्याकाराः अपि वैयाकरणसिद्धान्तलघुमञ्जूषायां (150 पृष्ठे) शक्त्याश्रयनिरूपणे[3](चत्वारि वाक्.) अत्र माधवेन ऋग्वेदभाष्ये चत्वारि पदानीत्यनेन वैखरी, मध्यमा, पश्यन्ती, परारूपाणि दर्शितानि । पतञ्जलिना तु नामाख्यातोपसर्गनिपाताश्चत्वारि इत्युक्तम् । अभियुक्तव्याख्यानादुभयपरकत्वं प्रामाणिकमेव । पतञ्जलिनापि गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः[4] इति व्याख्यानं कुर्वता माधवाभिमतं व्याख्यानमपि मन्यत एवेति गम्यते इत्युक्त्वा ऋङ्मन्त्रस्यास्य वाचश्चतुष्ट्वपरत्वमपि समर्थ्यते ।

झामहोदयाः एवं श्रुतिप्रमाणं प्रदर्शयन्तः अन्यान्यपि प्रमाणानि चतुष्ट्वं प्रमाणयितुं प्रदर्शयामासुः - तथाहि, शतपथब्राह्मणोऽपि वाचस्तुरीयभागमभ्युपगच्छन्नाह -

**तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्ति**[5] इति ।

अत्र वैखर्य्याश्चतुर्थभागकथनं वाचः परादिभेदैश्चतुर्विधत्वे सङ्गच्छते ।

सामवेदे उत्तरार्चिके सप्तमप्रपाठके अग्नेः स्तुतिप्रसङ्गे चतुर्धा वागाम्नायते –

**पाहि नो अग्न एकया पाह्युत द्वितीयया ।**

**पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो ॥** इति ।

अथर्वणि तु सप्तमे काण्डे चतुर्विधायाः वाचः स्वरूपं सरहस्यं प्रकाश्यते –

**धीती वा ये अनयन् वाचो अग्रं –**

**मनसा वा ये वदन्नृतानि ।**

**तृतीयेन ब्रह्मणा वावृधाना –**

**स्तुरीयेणामन्वत नाम धेनोः ॥**[६] इति ।

अयमर्थः – ये विवक्षवः धीती धीत्या ध्यानात्मकेन परावाग्रूपेण प्रथमेन शब्दब्रह्मणा वाचः अग्रम् पश्यन्त्यादिसकलवाचः कारणम् अनयन् ध्यानविषयं प्रापितवन्तः, ये वा विवक्षवः मनसा मननात्मकेन पश्यन्त्याख्येन द्वितीयेन शब्दब्रह्मणा ऋतानि सत्यानि अखण्डपरापेक्षया ईषदाविर्भूतानि देवताविषयकविचारविषयाणि वाक्यानि अवदन् सामान्यज्ञानविषयत्वं प्रापितवन्तः, ते विवक्षवः तृतीयेन परापश्यन्त्यपेक्षया त्रित्वसङ्ख्यापूरकेण ब्रह्मणा मध्यमाख्येन हृदयस्थेन स्फोटात्मकशब्द– ब्रह्मणा वावृधानाः शब्दवाच्यत्वेन अर्थं पोषयन्तः तुरीयेण चतुर्थेन वैखर्य्यात्मकेन शब्देन ब्रह्मणा धेनोः अर्थप्रकाशकस्य शब्दस्य नाम प्रातिपदिकसञ्ज्ञाम् अमन्वत विदितवन्तः । अनेन बुद्धिमनो– हृदयप्राणरूपावस्थाचतुष्टयेन वाचश्चतुर्विधत्वं निगदव्याख्यातम् ।

**अत्रेदं मे प्रतिभाति –**

1. वैखर्य्या मध्यमायाश्चेत्यादिकारिकाद्वारा वाचो भेदो विवेच्यो नास्ति हरेः, अपितु व्याकरणस्य विषयत्वं कतिविधासु वाक्षु इत्येव । एतस्याः कारिकायाः पूर्वं तथैव प्रकरणस्य सत्त्वात् । सा च कारिका – 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः । अविच्छेदेन शिष्टानामिदं स्मतिनिबन्धनम्'[7] इति । अतएव लघुमञ्जूषायां शक्त्याश्र–यनिरूपणप्रकरणे नागेश आह – अत एव (पराया वर्णादिविशेषरहितत्वेन अव्यक्त–त्वादेव) हरिणा व्याकरणस्य त्रिविधा वाग्विषय इत्युक्तम् इति । वाग्विषयत्वञ्चौवं बोध्यम् – स्वपरोश्रोत्रविषया वैखरी, मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहार–कारणम्, पश्यन्ती तु लोकव्यवहारातीता, किन्तु योगिनां तु तत्रापि प्रकृतिप्रत्यय–विभागावगतिरस्ति, परायान्तु नेति त्रय्या इत्युक्तम् ।

   तस्मात् कारिकामिमामाश्रित्य तिस्रः एव वाचः हरिसम्मताः इति केषाञ्चित् कथनं हेयमेव, कारिकायाः वाचो भेदस्य अप्रतिपादकत्वात् ।
2. अनेकतीर्थभेदायाः वाचः त्रय्याः इत्यत्र 'त्रय्याः' इत्यनेन 'चतुर्थ्याः' एव व्यावृत्तिः इष्टा, नो चेत् 'त्रय्याः' इति विशेषणोपादानं व्यर्थं स्यात् । तथाहि 'त्रय्याः' इति उपादानादेव चतुर्थी वागपि अस्तीति व्यज्यते । तस्मात् वाचश्चतुष्ट्वं हरिसम्मतमेव ।

3. किञ्च, तिसृणामेव वाचां व्याकरणविषयत्वमित्यपि अविचारितरमणीयमेव । तथाहि – किमिदं व्याकरणविषयत्वं नाम ? व्युत्पाद्यत्वेन व्याकरणविषयत्वमभिप्रेतमत्र, उताहो प्रतिपाद्यत्वेन? तत्र न तावदाद्यः, परायाः वाचः अत्यन्तं सूक्ष्मत्वेन प्रकृतिप्रत्ययविभागानर्हतया यथा व्याकरणादसंस्कार्यत्वम्, तथैव पश्यन्त्याः अपि असंस्कार्यत्वम् । न हि अत्रापि प्रकृतिप्रत्ययविभागादिद्वारा व्युत्पादने व्याकरणस्य गतिः । यदि च व्याख्यानात्मकप्रतिपाद्यत्वेन अविषयत्वमभिलषितम्, तदा वदतो व्याघातः । पश्यन्त्या इव व्याख्यानात्मकप्रतिपादनस्य परायाः कृतेऽपि व्याकरणे दृष्टचरत्वात् । अत एव –

**प्राप्तरूपविभागाया यो वाचः परमो रसः ।**

**यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥[8]**

इति कारिकया हरिणैव व्याकरणस्य आञ्जसमार्गत्वं परायाः कृते व्यवस्थापितम् ।

4. वाचां चतुष्ट्वादेव 'गुहा त्रीणि निहिता' इत्यस्यापि सार्थक्यं जायते, अन्यथा 'चत्वारि वाक्' इत्यस्य नामाख्यातोपसर्गनिपाताः इत्यर्थे क्रियमाणे गुहायां निहितत्वं कथमपि नोपपद्येत ।

5. आचार्यविश्वनाथमिश्रः 'वैयाकरणसम्प्रदाये स्फोटपरम्परा' इति निबन्धे वाचश्चातुर्विध्यं समर्थयमानो ब्रवीति – एतेन व्याकरणस्य त्रिविधा वाग्विषयस्तथा भर्तृहरिः वाचस्त्रैविध्यमेवाङ्गीकुरुते इति निखिलं कथनं पराकृतमेव वेदनीयम् इति ।

6. आधुनिकपाणिनिरूपेण प्रतिष्ठितः आचार्य्यश्रीरामप्रसादत्रिपाठी महोदयोऽपि 'पाणिनीयव्याकरणे प्रमाणसमीक्षा' इति स्वकीये ग्रन्थे (284 पृष्ठे) कथयति[9] – पराभिधानाया वाचस्त्वनादिनिधनत्वेनैव स्मरणं कृतं श्रीहरिप्रभृतिभिः । यद्यपि श्रीहरिणा पराशब्देन व्यवहारोऽस्याः कृते क्वापि वाक्यपदीये न कृतः, तथापि अत्रातीतविपर्य्यासः केवलामनुपश्यति[10] इत्यत्र केवलामित्यनेन अस्याः परामर्शस्य कृतप्रायत्वात्, अनादिनिधनं ब्रह्म शब्दतत्त्वम् इत्यनेन लक्षणेन अस्या एव लक्षितत्वाच्चेति ।

7. लक्ष्मीटीकाकारः पण्डितसभापतिशर्मोपाध्यायोऽपि प्रयत्नो द्विधा इति प्रतीकमाश्रित्य ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन यत्नेन युक्तो मूलाधारस्थो वायुर्जाठराग्निना प्रेरितः सन् शब्दब्रह्माभिव्यञ्जयति । अभिव्यक्तं शब्दब्रह्म परा वागित्युच्यते । तदुक्तं हरिणा – अनादिनिधनमित्यादि – इति ब्रुवाणः परां वाचं पुरस्करोति ।

तथाहि भर्तृहरिणा परावाक् इत्यानुपूर्वी नोक्ता, तस्मात् न तत्सम्मता सेति कथनं न मे यक्तं प्रतिभाति । 'वाचः परमो रसः'[11] इत्यत्र परमो रसः इत्यनेन, 'केवलामनुपश्यति'[12] इत्यत्र केवलापदेन, 'यद्वाचो रूपमुत्तमम्'[13] इत्यत्र उत्तमरूपपदेन, 'तत्रैव ज्योतिः शुद्धं निवर्त्तते' इत्यत्र ज्योतिः शब्देन, 'परं ब्रह्माधिगम्यते'[14] इत्यत्र परब्रह्मपदेन, 'प्राहुर्महान्तमृषभम्'[15] इत्यत्र ऋषभपदेन

च परायाः एव भर्तृहरिद्वारा भूयोभूयः कीर्त्तनात् भर्तृहरिसम्मतं वाक्चातुर्विध्यमिति निःसन्दिग्धं वक्तुं शक्यते ।।

**सन्दर्भाः**


1. वा.प.का. - 142, प्र.काण्डम् ।
2. ऋक् सं. 1-164-45 ।
3. 150 पृष्ठे ।
4. म.भा. पस्पशा. ।
5. 4-1-3-36 ।
6. 7/1/1 ।
7. वा.प.प्र.का. 143 का. ।
8. वा.प.प्र.का.श्लो. 12 ।
9. 284 पृष्ठे ।
10. वा.प. 1/17 ।
11. वा.प.श्लो. 12 ।
12. वा.प.श्लो. 17 ।
13. श्लो. 18 ।
14. श्लो. 22 ।
15. श्लो. 131 ।



**व्याकरणविभागाध्यक्षः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-७७**


★★★

# भर्त्तृहरिमते शब्दवैशिष्ट्यविमर्शः

✍प्रो. अशोकचन्द्रगौडशास्त्री

**(पातञ्जलदर्शनं निखिलदर्शनपारिषदम् । तस्य च महनीयो वाक्यपदीयनामा ग्रन्थः । अद्वैतवादः, विवर्त्तवादः, परिणामवादः, शब्दनित्यानित्यत्ववादः, तत्रानित्यत्ववादे वायुशब्दत्वाणुशब्दत्वज्ञानशब्दत्ववादः, स्फोटध्वन्योः सम्बन्धः, प्राकृतध्वनिद्वारा शब्दाभिव्यक्तिवादे इन्द्रिय-शब्दोभय-संस्कारवाद - इत्यादयो विचाराः वाक्यपदीयब्रह्मकाण्डे प्रतिपादिताः, तान् समूह्य रचितोऽयं निबन्धो वैदुष्यपूर्णो गवेषणापूर्णश्च । तत्र विशेषतो व्याकरणदर्शने विवर्त्तवादपरिमाणवादयोः कतरो वादः सम्मत इति परिप्रश्ने शोधपत्रकर्त्ता समादधाति - 'अत्र द्वयोर्वादयोः एव समन्वयः । परारूपां वाचमुद्दिश्य विवर्त्तवादः, पश्यन्त्याख्यां वाचमुद्दिश्य च परिणामवाद' इति । - स.)**

भर्तृहरेराचार्यस्य मतानुसारेण संसारोऽयं शब्दस्वरूपस्य ब्रह्मणो विवर्तः । विवर्तलक्षणम् यथा - **अतत्त्वतोऽन्यथा[१] प्रथा विवर्त इत्युदाहृतः इति ।**

अर्थात् अतात्त्विकान्यथाभावो विवर्तः । तादृश एव विवर्तोऽयं संसारः शब्दस्येत्याह हरिः-

**अनादिनिधनं ब्रह्मः[२] शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**

अर्थात् यद् अनादिनिधनम् उत्पत्तिविनाशरहितम्, अत एव नित्यम्, अक्षरम् व्यापकं शब्दतत्त्वम् शब्दस्वरूपम् तद् ब्रह्म, यतो जगतः संसारस्य प्रक्रिया उत्पत्तिस्थितिलयाः अर्थभावेन–घटपटाद्यात्मना विवर्तते अतात्त्विकान्यथाभावापन्ना भवति । अविनश्वरं नित्यं व्यापकं ब्रह्मैव अर्थभावेन नदीपर्वतगोघटपटादिरूपेण विवर्तते - अतात्त्विकान्यथाभावापन्नम्भवतीति भावः।

संसारोऽयं शब्दस्यैव परिणामश्चेत्याह हरिः

**शब्दस्य परिणामो[३]ऽयमित्याम्नायविदो विदुः ।**
**छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥**

अर्थात् अयं सर्वोऽपि वाच्यवाचकभेदभिन्नः संसारः शब्दस्य सूक्ष्मस्य वाक्तत्त्वस्य परिणाम इत्याम्नायविदः वेदविदो विदुर्जानन्ति, न तु वयं कल्पयामः । अतः प्रथमं सर्गादौ विश्वमेतत् छन्दोभ्य एव व्यवर्तत व्यजायत इति भावः । यद्यपीयं जिज्ञासाऽत्र समुदेति यत् प्रथमश्लोके जगच्छब्दविवर्तरूपतयोक्तम्, अनेन श्लोकेन तु परिणामतयोच्यते । तत्र कथं

द्वयोर्वादयोः समन्वयः इत्यत्रोच्यते यत् परारूपां वाचमुद्दिश्य विवर्तवादः, पश्यन्त्याख्यां वाचमुद्दिश्य परिणामवाद इति ज्ञाप्यते ।

भर्तृहरेराचार्यस्य मते शब्दाः नित्याः । तदुक्तम् हरिणा –

**नित्याः शब्दार्थसम्बन्धाः[४] समाम्नाता महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥**

अर्थात् अष्टाध्यायीसूत्राणाम्, वार्त्तिकसूत्राणाम्, महाभाष्यस्य च प्रणेतृभिः पाणिनि–कात्यायनपतञ्जलिभिः शब्दाः, शब्दार्थाः, शब्दार्थसम्बन्धाश्च नित्याः समाम्नाताः । तत्र अष्टा–ध्यायीसूत्रकृता पाणिनिना **'पृषोदरादीनि[5] यथोपदिष्टम्'** इत्यादिवार्त्तिकैः महाभाष्यकृता पतञ्जलिना – **'संगहे शब्दार्थे[6] सम्बन्धे' 'सिद्धन्तु[7] नित्यशब्दत्वात्'** इत्यादिवार्त्तिकैः, महाभाष्यकृता पतञ्जलिना – **'संग्रहे एतत् प्राधान्येन परीक्षितम्[8] नित्यः शब्दः' 'नित्येषु च शब्देषु[9] कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोजनविकारिभिः' 'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।'[10] एकादेशविकारे हि नित्यत्वं नोपपद्यते ।' 'एक इन्द्रशब्दः क्रतुशते[११] प्रादुर्भूतः सर्वयागेष्वङ्गं भवति'** प्रभृतिभिर्भाष्यैः शब्दानाम्, शब्दार्थानाम्, शब्दार्थसम्बन्धानाञ्च नित्यत्वं कण्ठतः एवाऽङ्गीकृतम् ।

परन्तु केचन दार्शनिकाः शब्दानामनित्यत्वम्मन्यन्ते । शब्दानित्यत्ववादिषु दार्शनिकेष्व शब्दोपत्तिविषये मतत्रयं वर्तते । अर्थात् शब्दानित्यत्वपक्षे शब्दोत्पत्तिविषये केचन वायोः शब्दत्वम्, केचन अणूनाम्, केचन च ज्ञानस्य शब्दत्वमन्यन्ते । सर्वेषामपि मतानि व्याचक्षाणेन श्रीहरिणोक्तम्–

वायोः शब्दत्वम् –

**लब्धक्रियः प्रयत्नेन[१२] वक्तुरिच्छानुवर्तिना ।**
**स्थानेष्वभिहतो वायुः शब्दत्वम्प्रतिपद्यते ॥**
**तस्य कारणसामर्थ्याद् वेगप्रचयधर्मणः ।**
**सन्निपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः ॥**

अणूनां शब्दत्वम् –

**अणवः सर्वशक्तित्वाद्[१३] भेदसंसर्गवृत्तयः ।**
**छायाऽऽतपतमः शब्दभावेन परिणामिनः ॥**
**स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।**
**अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥**

ज्ञानस्य शब्दत्वम् –

**अथाऽयमान्तरो ज्ञाता[१४] सूक्ष्मे वागात्मनि स्थितः ।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥**
**स मनोभावमापद्य तेजसा पाकमागतः ।**

**वायुमाविशति प्राणमथासौ समुदीर्यते ॥**
**अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।**
**तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥**
**विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।**
**प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥**

अत्रेदं तत्त्वम् - वायोः शब्दत्वमाह - वक्तुरिच्छानुवर्तिना - विवक्षाजन्येन प्रयत्नन प्रेरितो वायुरूर्ध्वमाक्रामन् उरःकण्ठताल्वादिषु स्थानेष्वभिहतः सन् शब्दाकारतया परिणमति । स्वक्रियाकारणस्य प्रयत्नविशेषस्य सामर्थ्याद् वेगरूपधर्मवतः प्रचयो घनीभावस्तद्धर्मवतश्च तस्य वायोः स्थानेषु सन्निपातात् सारवत्योऽपि घनीभावेन कठिना अपि मूर्तयो विभज्यन्ते - भिद्यन्ते, पाषाणसन्निपातेन लोष्टवद् विशीर्यन्ते - इति भावः ।

अणूनां शब्दत्वमाह - अणवः - रूपरसगन्धस्पर्शशब्दपरमाणवः सर्वशक्तित्वात् - नाना-जातीयस्वस्वकार्यानुकूलशक्तित्वात् छायाऽऽतपतमःशब्दभावेन परिमाणिनः - तत्र नीलरूपपरमाणवः छायातमोरूपतया, शुक्लरूपपरमाणवश्चाऽऽतपरूपतया शब्दपरमाणवस्तु स्थूलशब्दरूपतया परिणमन्ति । भेदसंसर्गवृत्तयः - भेदो विभागः संसर्गः विभागः संसर्गः संयोगः तौ वृत्तिरेषां परमाणूनाम् । यदाऽदृष्टविशेषान्निमित्तात् संयुज्यन्ते तदा परिणमन्ते, यदा तु विभज्यन्ते तदा परमाणुरूपतयाऽवतिष्ठनते । शब्दाख्याः परमाणवः स्वशक्तावदृष्टसहकृतेन प्रयत्नेन व्यज्यमानायां कार्योन्मुख्याः परमाणवः स्वशक्तावदृष्टसहकृतेन प्रयत्नेन व्यज्यमानायां कार्योन्मुखत्वमापाद्यमानायां प्रयत्नप्रेरितप्राणवायुना समीरिताः संहन्यमाना वायुप्रेरितान्यभ्राणीव प्रचीयन्ते - इति भावः ।

ज्ञानस्य शब्दत्वमाह - अयं शब्द एवाऽऽन्तरो ज्ञाता वृत्तिविशिष्टमन्तःकरणं वर्तते । सः सूक्ष्मशब्दशक्तिरूप स्थितः सन् स्वस्य रूपस्य प्रकाशनाय स्थूलशब्दभावेन विवर्तते - भासितो भवति । अत्रेदं तत्त्वम् - वृत्तिविशिष्टमन्तःकरणं ज्ञानरूपमेव । तदेव शब्दकारतया परिणमति । अत एव शब्दो ज्ञानस्य परिणाम इति स्वीकुर्वन्ति वैयाकरणाः । स एव ज्ञाता अर्थबोधनेच्छया मनोभावम्प्राप्य जाठराग्निरूपेण तेजसा पाकमागतः सन् प्राणवायुमाविशति - अभिहन्ति ।

अभिघातान्तरमसौ सवृत्तिमनोयुतः प्राण ऊर्ध्वं गमनाय प्रेर्यते । ततोऽन्तः करणतत्त्वस्य मनस आश्रयतां गतः प्राणवायुमनोधर्मेण दाहेन ज्ञानरूपशब्देन वा समाविष्टस्तेजसैव - जठराग्निसहकारेणैव विवर्तते - बहिःशब्दरूपो भवति । दाहवशादेव प्राणः सवृत्तिकमनोरूपान्तःकरणयुतः स्वात्मनो ग्रन्थीन् कादिवर्णस्वरूपान् विभज्य पृथगवस्थाप्य भिन्नैः श्रूयमाणै-र्ध्वनिभिर्वर्णानभिव्यज्य वर्णेष्वेवोपलीयते - इति भावः । तथा चोक्तम् -

**आत्मा बुद्ध्या समेत्यर्थान्[१५] मनो युङ्क्त विवक्षया ।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥**
**सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।**
**वर्णाञ्जनयते...................... ॥ इति**

भर्तृहरेराचार्यस्य मतानुसारेण शब्दस्य द्वैधं स्वरूपं दृश्यते । तद्यथा –

**द्वावुपादानशब्देषु[१६] शब्दौ शब्दविदो विदुः ।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥**

अर्थाद् उपादानशब्देषु – वाचकशब्देषु मध्ये व्यङ्ग्यव्यज्यकरूपौ द्वौ शब्दाविति वैयाकरणानां राद्धान्तः । तत्रैको ध्वनिरूपः स्फोटरूपाणां शब्दानाम्प्रकाशकः, अपरो व्यङ्ग्यरूपः स्फोटोऽर्थे – अर्थबोधनाय प्रयुज्यते । तदुक्तम् तपरसूत्रे भाष्ये –

**ध्वनिः स्फोटश्च शब्दानां[१७] ध्वनिस्तु खलु लक्ष्यते ।**
**अल्पो महांश्च केषाञ्चिदुभयन्तत् स्वभावत् ॥**

स्फोटो व्यङ्ग्यो ध्वनिर्व्यञ्जकः । अयमाशयः – प्राकृतवैकृतभेदेन ध्वनिर्द्विविधः । प्राकृतो ध्वनिः स्फोटव्यञ्जकः, वैकृतस्तु द्रुतादिवृत्तिभेदजनकः । तदुक्तम् हरिणा –

**शब्दस्योर्ध्वमभिव्यक्तेः[१८]वृत्तिभेदे तु वैकृताः ।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥**

वैकृतास्तु ध्वनयः प्राकृतध्वनिभिः शब्दस्याभिव्यक्तेरूर्ध्वं जायमाना द्रुतादिवृत्तिभेदे कारणानि भवन्ति । तैर्द्रुतमध्यमविलम्बितेति वृत्तिभेदैः स्फोटस्तु न भिद्यत इति भावः ।

कालरहितेऽपि स्फोटे प्राकृतध्वनिगतकालस्य स्फोटे आरोपात् मात्रादिकालः, उपाधिभेदेन वृत्तिभेदश्च प्रतीयते । तदुक्तम् हरिणा –

**स्फोटस्याऽभिन्नकालस्य[१९]ध्वनिकालानुपातिनः**
**ग्रहणोपाधिभेदेन वृत्तिभेदम्प्रचक्षते ॥**
**स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।**
**प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ॥**

अत्रदं तत्त्वम् – चिद्रूपज्ञानस्य अत एव नित्यत्त्वादभिन्नकालस्याऽपि स्थानकरणाभिघात–जन्यस्वाभिव्यञ्जकध्वनिकालानुपातिनो ग्रहणोपाधिभेदेन – ग्रहणं बुद्धिस्तस्य भेदेन, यद्वा गृह्यते–ऽभिन्नस्यास्याऽपि स्फोटस्य वृत्तिभेदं ह्रस्वत्वादिभेदं प्रचक्षते शब्दैकत्त्ववादिन आचार्याः । शब्दानां नित्यत्वपक्षे ह्रस्वदीर्घप्लुतादिषु कालभेदप्रयुक्तेषु ध्वनिधर्मेषु स्थितेषु ह्रस्वत्वादिधर्मप्रयुक्ताद् ध्वनेः स्वभावभेदात् शब्दाभिव्यक्तिनिमित्तस्य प्राकृतस्य ध्वनेः कालः स्फोटात्मकशब्दस्येत्युपचर्यते ॥

एवमखण्डे वाक्यस्फोटे वर्णपदादिभानमपि ध्वनिभेदादेव भवति । यद्यपि वर्णस्फोट–पदस्फोट–वाक्यस्फोट–वर्णजातिस्फोट–पदजातिस्फोट–वाक्यजातिस्फोट–अखण्डपदस्फोट–अखण्ड–वाक्यस्फोट–वर्णजातिस्फोट–पदजातिस्फोट–अखण्डपदस्फोट–अखण्डवाक्यस्फोटभेदादष्टौ स्फोटा भवन्ति, तथाप्याचार्येण भर्तृहरिणा तेष्वखण्डवाक्यस्फोट एवाऽङ्गीकृतः । तथा हि –

**पदे न वर्णा विद्यन्ते[२०] वर्णेष्ववयवा न च ।**
**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥**

अर्थात् सत्यपि पदेषु वर्णानामपोद्धारकल्पने वस्तुतः पदेषु वर्णा न विद्यन्ते । किञ्च वर्णेष्ववयवानामपोद्धारकल्पनायामपि वर्णेष्ववयवा वस्तुभूता न सन्ति । एवं वाक्यात् कल्पनयाऽपोद्धृतानाम्पदानां ततोऽत्यन्तं प्रविवेकः कश्चन भेदो नास्ति । एवं वर्णानां पदानवयवत्वे पदानां च वाक्यानवयवत्वे वर्णानां चाऽप्यवयवाभावेऽखण्डा नित्या एव वर्णाः, पदानि वाक्यानि च तथाविधान्येव ।

वाक्ये पदाद्यवभानम् प्रतिपत्तुरसामर्थ्यादेव भवति, किन्तु पदाद्यवभानम् स्फोटग्रहणोपायः । तदुक्तं हरिणा – **असतश्चान्तराले**[२१] **याञ्छब्दानस्तीति मन्यते ।**

**प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः ॥**

अर्थात् अन्तराले आद्यध्वनिचरमध्वन्योर्मध्ये चरमध्वन्यभिव्यक्तस्य समस्तस्य शब्दस्य स्पष्टग्रहणात् पूर्वमिति यावत् । स्फोटस्य निर्भागत्वेनाऽसतस्तु यान् समस्तान् शब्दान् 'अस्ति अन्तरालेऽसमस्तः पूर्वपूर्वध्वन्यभिव्यक्तः स्फोटैकदेश' इति मन्यते । सा प्रतिपत्तुरशक्तिः – तेभ्यो ध्वनिभ्योऽभिव्यक्तस्याक्रमस्य स्फोटस्य ध्वनिरूपोपरागं विनाऽवधारणेऽक्षमता । यः प्रतिपत्तृणामव्युत्पन्नानामन्तरालेऽसमस्तशब्दग्रहणाभिमानः स चरमध्वनिकाले यत् समस्तस्य शब्दस्वरूपस्य तेषां गहणं तदुपाय एवेति ।

यथा जलचाञ्चल्येनेन्दुप्रतिबिम्बस्य चञ्चलत्वेन ग्रहणं भवति, तथैव प्राकृतध्वनिभेदात् स्फोटेऽपि कत्वादिकमवभासते । तदुक्तं हरिणा –

**प्रतिबिम्बं यथान्यत्र**[२२] **स्थितं तोयक्रियावशात् ।**

**तत् प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥**

ध्वनिभिरिन्द्रियस्य संस्कारः शब्दस्योभयस्य चेति – अभिव्यक्तवादिनां त्रयः पक्षाः सन्ति । तथा हि पक्षत्रयमपि व्याचक्षाणेन श्रीहरिणोक्तम् । –

**इन्द्रियस्यैव संस्कारः**[२३] **शब्दस्यैवोभयस्य वा ।**

**क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम् ॥**

अर्थात् प्राकृतध्वनिद्वारा शब्दाभिव्यक्तिविषयेऽभिव्यक्तिवादिनां त्रीणि मतानि वर्तन्ते –

1. प्राकृतिध्वनिः श्रोत्रं संस्कृत्य स्फोटरूपस्य स्वविषयस्य ग्राहको भवति, यथा सामाधानञ्जनादिभिर्मनसश्चक्षुरादेः संस्कारो भवति, इन्द्रियविषययोरन्यतरस्य द्वयोर्वा संस्कारो न भवति ।
2. प्राकृतध्वनिना शब्दः संस्कृतः सन् श्रोतेन्द्रियग्राह्यो भवति, विषयत्वात् । यथा विषयस्यगन्धतैलादीनामातपादिभिः पृथिव्याश्चोदकसेकेन कुङ्कुमस्य च गोघृतमर्दनेन तेषां गन्धप्रतिपत्तये संस्कारो भवति ।
3. प्राकृतध्वनिना शब्दश्रोतुन्द्रिययोर्युगपत्संस्कारानन्तरं स्फोटस्य ग्रहणं भवति, चक्षुषः प्राप्यकारित्पक्षे चक्षुर्विषयवत् ।

भर्तृहरिणाऽस्यैव शब्दस्य जग्नमूलकत्वमपि स्वीकृतम् । भर्तृहरिमते वाच्यवाकरूपस्याऽस्य विश्वस्य निबन्धनी वाच्यवाचकभावनियामिका वा शक्तिः शब्देष्वेवाश्रिता वर्तते । तदुक्तम् हरिणा- **शब्देष्वेवाश्रिता[२४] शक्तिर्विश्वस्याऽस्य निबन्धनी ॥ इति**

भर्तृहरेराचार्यस्य मतानुसारेण स्फोटस्य ककाराद्यनेकवर्णव्यक्तिमाध्यमेनाऽभिव्यक्तिर्भवति । त वर्णव्यक्तय एव कैश्चिदाचार्यैर्ध्वनित्वेनोक्ताः । तदुक्तम् हरिणा –

**अनेकव्यक्त्यभिव्यङ्ग्या[२५] जातिः स्फोट इति स्मृता ।**
**कैश्चिद् व्यक्तय एवाऽस्याः ध्वनित्वेन प्रकल्पिता ॥**

अत्र जातिपदोपादानेन ज्ञायते यद् भर्तृहरिर्जातिस्फोटमेव स्वीकरोति । **'पदे न[२६] वर्णा विद्यन्ते'** इति कारिकया ज्ञायते यत् सोऽखण्डवाक्यस्फोटं स्वीकरोति । अतो भर्तृहरेराचार्यस्य मतेऽखण्डवाक्यस्फोटं स्वीकरोति । अतो भर्तृहरेराचार्यस्य मतेऽखण्डवाक्यजातिस्फोट एव स्वीक्रियते, तस्याभिव्यक्तिः ककारादिवर्णव्यक्तिमाध्यमेन भवतीत्यनुसन्धातव्यम् ।

लोके सर्वा इति कर्तव्यता – 'इदमेव कर्तव्यमिति ज्ञानम्' शब्दव्यपाश्रया–शब्दाश्रिता एवेत्याह हरिः –

**न सोऽस्ति प्रत्ययो[२७] लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानम् सर्वं शब्देन भासते ।**

किम् बहुना । लोके सर्वोऽपि व्यवहारः शब्दाश्रित एव । ज्ञानस्य शाश्वती नित्या वाग्रूपता यदि निष्क्रामेत् गच्छेत् तर्हि प्रकाशो ज्ञानं न प्रकाशेत, प्रकाशकाभावात् । यतो हि ज्ञानस्य वाग्रूपता प्रत्यवमर्शिनी वर्तते । किञ्च वाक् सर्वासु सफलासु क्रियासु निष्फलासु चोपदिष्टस्य शयानस्य वा हस्तपादादिकम्पनक्रियासु ज्ञानपूर्विकायाः प्रवृत्तेरभावात् । मरणकाले तस्य वाग्रूपता चेतनस्योत्क्रान्तौ – अभावे त्वयम्प्राणी काष्ठकड्यवद् विसंज्ञो दृश्यते । तदुक्तम् हरिणा –

**वाग्रूपता चेन्निष्क्रामेद[२८] वबोधस्य शाश्वती ।**
**न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥**
**अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।**
**तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥**

**सन्दर्भाः**

1. सदानन्द – वेदान्तसारः ।
2. भर्तृहरि – वाक्यपदीयम्, ब्रह्मकाण्डम् 1॥
3. तदेव, ब्रह्मकाण्डम् 120॥
4. भर्तृहरि – वाक्यपदीयम्, ब्रह्मकाण्डम् 23॥
5. पाणिनि – अष्टाध्यायी 6.3.109॥
6. पतञ्जलि – व्याकरणमहाभाष्यम् 1.1, आ. 1 कात्यायनवार्त्तिकम् ॥
7. तदेव 1.1, आ. 3, सू. 1 कात्यायनवार्तिकम् ॥
8. तदेव 1.1, आ. 1॥

9. तदेव 1.1, आ. 2॥
10. तदेव 1.1, आ. 5, सू. 20 ॥
11. तदेव 1.1, आ. 3, सू. 64 ॥
12. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 108-109 ॥
13. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 110-111 ॥
14. तदेव, ब्रह्मकाण्डम्, 112-115॥
15. पाणिनीयशिक्षा ॥
16. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 44 ॥
17. पतञ्जलिव्याकरणमहाभाष्यम् 1/1/9/ सू. 60 ॥
18. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 77 ॥
19. तदेव, ब्रह्मकाण्डम् 75, 76 ।
20. तदेव ब्रह्मकाण्डम् 72 ॥
21. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 85 ॥
22. तदेव ब्रह्मकाण्डम् 49 ॥
23. तदेव ब्रह्मकाण्डम् 78 ॥
24. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 118 ॥
25. तदेव ब्रह्मकाण्डम् 93 ॥
26. तदेव ब्रह्मकाण्डम् 72 ॥
27. तदेव ब्रह्मकाण्डम् 121 ॥
28. भर्तृहरि - वाक्यपदीयम्, ब्रह्मकाण्डम्, 124-127 ॥

**आचार्योऽध्यक्षश्च, व्याकरणविभागे**
**राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )**
**वेदव्यासपरिसरः, बलाहरः, काङ्गडा ( हि.प्र. )**

★★★

# वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः

✍डॉ. राजधरमिश्रः

**(शीर्षकानुगुणं ब्रह्मकाण्डीयविषयान् विगणय्य नैकान् विवादास्पदविषयान् स्वशेमुष्या निर्णयपथं नेतुकामो विद्वानत्राऽऽह-शब्दो हि ज्ञानात्मा ब्रह्मरूपः ज्योतिःपर्य्यायः, सत्यपि विवर्त्तपरिणामयोः भेदेऽत्र ग्रन्थे उत्पत्ति-मात्रपरकस्य परिणामशब्दस्य व्यवहारः, 'चत्वारि वाक्' इति भाष्यसङ्गतये भर्त्तृहरिमतेऽपि वाचश्चतुर्विधत्वमेव, वृत्तिरहितस्य कारिकामात्रस्यैव वाक्यपदीयमित्यभिधानम्, ब्रह्मकाण्डं प्रस्तावनात्मकं संयोज्य वाक्य-पदीयस्य काण्डत्रयात्मकत्वञ्चेत्यादि । - स.)**

वाक्यपदीयमिति नाम श्रुत्वैव विद्वन्मनसि स्वाभाविकी श्रद्धा समुदेति । यथाहि न केवलं व्याकरणविषयकमपितु सर्वशास्त्रसिद्धान्तोपस्थापनपर्वकं वैयाकरणसिद्धान्तप्रतिष्ठापनपरं विश्वस्मिन् प्रचलितभाष्येषु महाभाष्यनाम्ना प्रथितं यथैकमेव 'महाभाष्यं' भगवता श्रीमता पतञ्जलिना विरचितं सर्वत्र ज्ञायते विद्वद्भिः समाद्रियते च, तथैव भाष्यसिद्धान्तितम् अत्यन्तं प्रसृतं तत्र तत्रान्यविषयेष्वनुस्यूतं यद्व्याकरणदर्शनविषयकं तत्त्वं तत्सर्वं समाकृष्य आचार्यो भर्तृहरिः पृथक्तया स्वतन्त्रं सर्वदर्शनमतं सम्यक् समालोच्य व्याकरणदर्शनस्य ज्यायस्त्वं प्रतिष्ठापयन्नविकलमत्यन्तं सरलशब्दैर्निबद्धमपि महद्गभीरं सर्वैः समाहृतं, प्रमाणतया स्वीकृतञ्च दार्शनिकग्रन्थेष्वन्यतममं व्याकरणदर्शनात्मकं ग्रन्थं रचयामास इति ।

ब्रह्मकाण्डं, वाक्यकाण्डं पदकाण्डञ्चेति काण्डत्रये विभक्तो ग्रन्थः । तत्र प्रथमे काण्डे यो वर्णितविषयस्तस्य विमर्शः कर्त्तव्य इति विषयपरकं शीर्षकमादाय चिन्त्यते चेद् दृश्यते शब्द एव ब्रह्म तदेव परमं ध्येय वैयाकरणानां धर्मार्थकाममोक्ष इति पुरुषार्थचतुष्टयसिद्ध्यर्थमिति दिशा वाक्यपदीयं तत्प्रतिपादकोऽन्यतमो ग्रन्थ इति । अत्र विमर्शात्मके विषये सन्ति बहवो विषयास्तत्रापि केचन विशिष्टा सन्ति तत्र प्रथमं वाक्यपदीयम् इति नाम्ना प्रतिपाद्यविषयत्वेन वाक्यपदमधिकृत्य कृत शास्त्रं वाक्यपदीयम् इति व्युत्पत्त्या तत्प्रतिपादकं वाक्यकाण्डं पदकाण्डञ्चेति काण्डद्वयात्मकमेवास्य सिद्धयति । परमत्र प्रथमं काण्डं ब्रह्मकाण्डं, द्वितीयं वाक्यकाण्डं, तृतीयञ्च पदकाण्डम् इत्येतत् त्रिविधं काण्डं दृश्यते, तत्तर्हि कुतो ब्रह्मकाण्डस्य ग्रन्थे समन्वयः, कथञ्चास्य प्रतिपादनं, किञ्च प्राथम्येन तस्य निर्वचनमित्यादिको विमर्शविषयः पुरतः समायाति । किञ्च वाक्यपदीयम् इति सवृत्तिकं कारिकान्वितन्नाम उताहो कारिकामात्रस्येति? एवमेव ब्रह्मकाण्डे शब्दब्रह्मात्मके स्वरूपनिर्वचने किं शब्दब्रह्मणो लक्षणम्, कः शब्दः का च तस्य शक्तिः, कथञ्च ततो जगदेतत् विर्वतते, विवर्तपरिणामयोर्लक्षणे भेदे सत्यपि एकत्र विवर्तपदेन व्यवहारोऽन्यत्र परिणामशब्देन निर्देशः इति कथं तयोः समन्वयः, अस्य कालशक्तिमुपाश्रितस्य

जन्मादयः षड्भावकिारा इत्युक्ते भावपदेन किमभिमतम्, एवमेव वाचश्चतुर्विधत्वं सर्वत्रान्यत्र दृष्टत्वेऽपि 'त्रय्या वाचः परं पदम्' इत्यनेन भतृर्हरिमते वाचस्त्रिविधत्वं चतुर्विधत्वमेवेति विमर्शविषयो दृश्यते । एवमेव शब्दस्य भेदविषयेऽपि द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुरित्यादिना शब्दस्य द्विविधस्वरूपस्वीकारे को हेतुरित्यादिविषयो विशेषतया जिज्ञासाविषयो विमर्शनीयश्चेति संक्षेपेण तदिह विमृश्यते । तथाहि -

तत्र प्रथमं ब्रह्मकाण्डस्य प्रथमकाण्डत्वेनोपस्थापनविषये विमृश्यते चेदित्थं तत्त्वं समायाति । तथाहि - आचार्यभर्तृहरिर्भगवतो भाष्यकारस्य पतञ्जलेः व्याकरणदर्शनकं विषयमेव विशदयितुमस्य ग्रन्थस्य रचनां करोति । तदनुसारमेव ग्रन्थविषयं स्थिरीकरोति तद्यथा भगवान्भाष्यकारः स्वकीयमहाभाष्यस्य प्रथमे आह्निके व्याकरणस्य दार्शनिकं पक्षं प्रतिज्ञाप्य तत्र व्याकरणदर्शनात्मकत्वेन मुख्यप्रतिपाद्यतया शब्दो ब्रह्म एवेति मनसि निधाय तद्विषयकं सिद्धान्तं सविशदमुपोद्घाततया प्रथमं प्रतिष्ठापयामास तथैवात्राचार्यभर्तृहरिः व्याकरणस्य दार्शनिकं पक्षं विवेचयितुकामः वैयाकरणै सिद्धान्तितस्य शब्दब्रह्मणः कि स्वरूपमिति प्रथमं वक्तव्यमिति कृत्वा शब्दब्रह्मणः स्वरूपं ततो जगतः प्रक्रिया कथं विवर्तरूपेण भासते, तस्यैकत्वे सत्यपि अनेकत्वम्, एतज्ज्ञानेन मोक्षप्राप्तिर्व्याकरणस्य परमं प्रयोजनं, तच्च साध्वनुशासनद्वारा सम्भवम्, इयमेव मोक्षमाणानाम् अजिह्मा राजपद्धतिः, साधुशब्दा एव धर्मसाधनरूपा असाधवश्चाधर्म-साधनरूपा, न चायं धर्मः तर्केण व्यवस्थापयितुं शक्यः, शब्दैस्सहार्थसम्बधा अपि नित्याः शब्दस्य द्विविध स्वरूपत्वे नित्यशब्दस्वरूपात्मकस्फोटब्रह्मणो निरूपणम्, प्रतीतपदार्थको लोके ध्वनिः शब्द इति भाष्यकारीयवचनात् ध्वनिः शब्द इति सिद्धान्तितत्वात् तत्स्वरूपवर्णने मध्यमानादाभिव्यङ्यस्य शब्दस्य स्फोटात्मकता ब्रह्मरूपता, नित्यता, ध्वन्त्यात्मकस्य तस्य चानित्यता सर्वत्र च शब्दब्रह्मणः स्वरूपेणानुविद्धमिव ज्ञानमर्थभावेन ब्रह्मकाण्डं विवेचयामास । एतेन काण्डमिदं प्रस्तावनात्मकं ततः पाप्तविभागस्य वाक्यस्य पदस्य वा स्वरूपप्रतिपादिकत्वेन काण्डद्वयं निरूपयामास इति बोध्यम् । इत्थं काण्डमिदं सर्वतो मुख्यं मूलञ्च । एतत्समन्वितमेव काण्डत्रयात्मकं वाक्यपदीयमिति सामञ्जस्ये न किमपि बाधकमित्यहम्मन्ये ।

कारिकामात्रमेव वाक्यपदीयं सवृत्तिकं वेति विषये विचारानन्तरमिदं तत्त्वमाविर्भवति यत् वस्तुतो भर्तृहरिणा कृतं कारिकामात्रमेव वाक्यपदीयमिति । कथमिति चेत् सहेतुकं तत्त्वमिदमवधेयं भवति । तथाहि - कारिकायाः वृत्तेश्च परस्परमत्यन्तं वैरूप्यदर्शनात्, काण्डत्रये सर्वत्र वृत्तेरभावात् तयोरभिधानभेदात्, क्वचिच्च स्वतन्त्रस्याप्यर्थस्य कल्पनात् वृत्तिरन्यैरन्यैश्च व्याख्यातेति सिद्ध्यति तस्मात् कारिकामात्रमेव वाक्यपदीयमिति सुवचम् । तद्यथा -

एकमेव यदाम्नातम् इति कारिकया पूर्वप्रकृतम् एकमेवाद्वितीयं ब्रह्म इत्यादिश्रुतिषु एकमेवाम्नातं तद्विविधशक्त्युपाधिभेदात् भिन्नं भासते । तत्र शक्तिभ्योऽपृथक्त्वेऽपि आरोपित पृथक्त्वेन पृथगिव भवतीति स्पष्टोऽर्थः सुतरां ज्ञायते । अत्रत्या या वृत्तिः सा द्रष्टव्या वृत्तिस्तावदत्र - यावद्विकारविकारिविषयमेकत्वरूपं पृथक्त्वरूपं वा सर्वं तत् प्रकृत्येकत्वा-

नतिक्रमेणेत्येतदाम्नातम् इति । अत्र 'यावद्विकारविकारिविषयम्' इति समस्तं पदं तत्रान्वयिपदम् एकरूपत्वं पृथक्त्वं वा व्यस्तम्, व्यस्तस्य समस्तैकदेशे पदे व्युत्क्रमेणान्वये क्रियमाणे महान् क्लेशः यथा संख्यनियमविरुद्धः सविशेषणानां वृत्तिर्न विशेषणयोगो न इति नियमविरुद्धश्च प्रतीयते । अतो विवेचनशैलीभेदात् एककर्त्तृकत्वमस्य स्वीकर्त्तुन्नोचितमिव प्रतिभाति ।

किञ्च सवृत्तिकस्यैव वाक्यपदीयत्वे ब्रह्मकाण्डे 'यथार्थजातयः सर्वा' इत्यत आरभ्य सप्तश्लोक्यां, तृतीये काण्डे च सम्पूर्णे, यत्र क्वापि वा वृत्तेर्व्यतिरेके कथं वाक्यपदीयत्वं विना वृत्तिकं नाम कथमुचितमिति विभाव्यतान्तस्माद्व्याप्तिविरहात् कारिकामात्रमेव वाक्यपदीयमिति सिद्ध्यति ।'

किञ्च तयोर्युगपद्रचना अथवा पूर्वं कारिका तदनन्तरं वृत्तिरिति तत्र पूर्वापरक्रमोऽवश्य-मभ्युपेयः तत्रापि पूर्वं कारिकाग्रन्थस्य किमप्यभिधानं भवेत् तत् किमन्यद्वाक्यपदीयात्, पश्चादेवेयं वृत्त्याख्या व्याख्या तदा सवृत्तिकस्यैव वाक्यपदीयत्वं कुतः । यथा व्याकरणसूत्रस्य वार्त्तिकस्य वा व्याख्याभाष्यादिकमपि व्याकरणमेवोच्यते तदा वाक्यपदीयव्याख्या वृत्तिरपि वाक्यपदीयमिति चेन्न न हि सूत्रवार्त्तिकव्याख्यानं सूत्रं वार्त्तिकं वोच्यते । एवं वाक्यपदीयप्रकरणान्तर्गतत्वेऽपि वाक्यपदीयं नाम वक्तुमशक्यम् । किञ्च सवृत्तिकमेव वाक्यपदीयवृत्तिरितिभिन्नमभिधानम-पार्थकमेव भवेत् तस्य भिन्ननामत्वे न किमपि तात्पर्यं वाक्यपदीयेति नाम्नव गतार्थत्वात् । तस्मात् वृत्तिरिति व्याख्या नाम तदा कारिकात्मकं मूलमेव वाक्यपदीयमिति सुस्पष्टम् । इतोऽप्यधिकं सप्रमाण पण्डितप्रवरैः श्रीमद्भिः 'वेदानन्दझा' महोदयैः विरचितस्य व्याख्यासंवलितस्य वाक्यपदीयस्य ब्रह्मकाण्डात्मकस्य भूमिकायां द्रष्टव्यमिति ।

अथ कोऽयं शब्द इति विमर्शे भाष्यकारपतञ्जलिभिः प्रतिपादितं शब्दस्य नित्यानित्यत्व भेदेन द्विविधं स्वरूपम् - येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द' इत्यनेन शब्दस्य नित्यत्वम् अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते इत्यनेन शब्दस्यानित्यत्वमित्येतत् द्विविधमपिस्वरूपं प्रतिपादयता - 'द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः। एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ।' इत्यादिना प्रतिपादिते ब्रह्मत्वेन ख्यातं यद् शब्दब्रह्म तस्यैव स्वरूपं लक्षणं हि वाक्यपदीयस्य प्रथमया कारिकया प्रतिज्ञाप्यते । तदत्रेदं बोध्यम् -

कार्येषु कारणधर्मसमन्वयं दष्ट्वा तदनुगतकारणं कल्पयन्ति कार्यकारणभावविद् । तद्यथा नैयायिकवैशेषिका आरम्भवादिनः स्थूलपृथिव्यादिषु गन्धादिसमन्वयं दृष्ट्वा तत्कारणं तदन्वितं सूक्ष्मं परमाणुसमुदायं कल्पयन्ति, घटादिषु वा मृत्समन्वयं दृष्ट्वा मृत्तिकां घटकारणं कल्पयन्ति । परिणामवादिनः सांख्या जगति सुखदुःखमोहसमन्वयं दृष्ट्वा सुखदुःखमोहान्वितं सत्त्वरजस्तमः स्वभावं प्रधानं जगत्कारणं कल्पयन्ति, औपनिषदा विवर्तवादिनस्तु त्रिगुणात्मिकां मायां परिणाम-कारणं ब्रह्म च विवर्तोपादानं कल्पयन्ति तथैव वेदप्रमाणकाः शब्दविदः सर्वत्र समन्वयं दृष्ट्वा सूक्ष्मशब्दतत्त्वमेव जगद्विवर्तोपादानं सिद्धान्तयन्ति । तदेव च प्रतिज्ञातं प्रथममाचार्यभर्तृहरिणा

वाक्यपदीयब्रह्मकाण्डस्य मङ्गलात्मके शब्दब्रह्मस्वरूपनिरूपणपरके प्रथमे श्लोके – 'अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत्' इति ।

तच्च शब्दब्रह्म अनादिनिधनम् अक्षरमित्यनेन ब्रह्मणः स्वरूपलक्षणेन यतो जगतः प्रक्रियार्थभावेन विवर्तते इत्ययनेन तटस्थलक्षणेन भर्तृहरिणा प्रतिपादितम् । तत्र शब्दात्मकं ब्रह्म इति प्रतिज्ञापितेन कोऽयं शब्द इति चेद्वैयाकरणाः शब्दो नाम ज्ञानात्मा, ज्ञानाभेदेन व्यपदिश्यमानो ज्योतिश्शब्देनापि श्रुत्यादिषु निर्दिश्यमानः स्वच्छरूपः प्रकाशरूपो विभुश्च । विभुत्वात् शरीरात् बहिरन्तश्च वर्तमानो भावः । तद् यथोक्तं वाक्यपदीये –

**सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।**
**तन्मात्राप्यतिक्रान्तं चैतन्यं सर्वतन्तुषु ॥ (वा. प. १/१२७)**

इदमेव ज्ञानात्मा शब्दो ब्रह्म इति नाम्ना व्यवह्रियते । इदमेव ज्ञानात्मकं शब्दब्रह्म सर्ववक्तृणामन्तःकरणे सूक्ष्मवागात्मना स्थितम् स्वस्य रूपस्य अर्थाकारनिजस्वरूपस्य व्यक्तये शब्दत्वेन विवक्षाप्रयत्नबलाद् श्रोत्रग्राह्यवैखरीशब्दरूपेण विवर्तते ।

अत्रेदं बोध्यं-ज्ञानं सविषयकं भवति, ज्ञानस्य विषयोऽर्थः अर्थविषयकत्वात् ज्ञानमर्थस्वरूपम् विषयविषयिणोरभेदात्, तदेव ज्ञानम् अर्थवाचकशब्दविषयकत्वात् सूक्ष्म-शब्दस्वरूपम् । इत्थं शब्दः अर्थः ज्ञानम् एतच्च परस्परमभिन्नस्वरूपकं परस्परं तादात्म्यापन्नम् । किञ्च निर्विकल्पसविकल्पकभेदेन शब्दस्य द्वैविध्यात् विशेष्यविशेषणसंसर्गज्ञानशून्यं निर्विकल्पक-ज्ञानमपि शब्दविषयकं शब्दात्मकं भवति । अत एव व्यवसायात्मकस्य घटज्ञानस्य पटज्ञानस्य च परस्परं भेदत्वं सिद्ध्यति । तस्मादिदमेव शब्दात्मकं ज्ञानमेव शब्दब्रह्मनाम्ना गीयते, शब्दरूपतां प्राप्नोति, विवर्तभावेन सर्वत्र प्रकाशते । स्वस्वरूपादप्रच्युतं सदर्थरूपतया प्रतीयत इति ।

इत्थं जगदिदं शब्दस्य शब्दब्रह्मणो वा विवर्त इति साधितम् ।

अत्रान्यविमर्शात्मके विषये 'शब्दस्य परिणामोऽयम्' इति एकविंशत्युत्तरैकशतसङ्ख्यकायां कारिकायामुक्तवचनमादाय शब्दस्य परिणामभूतं जगद् इत्याशङ्क्य पूर्वकथनेन सह विरोधो दृश्यते इत्यात्मके विमृश्यते चेदत्रेदमवगन्तव्यं यत् –

अनादिनिधनं..... विवर्ततेऽर्थभावेन इति प्रतिज्ञावचनोपक्रमबलात् इह च शब्दस्य परिणामोऽयम्....... छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत इत्युपसंहारबलाच्च परिणामपदं तात्त्विकाऽऽतात्त्विकविशेषमनपेक्ष्य सामान्यत उत्पत्तिपरं तच्च प्रकरणबलादत्र विवर्तकार्यपरमेवेति। एतेन नात्र परिणामपदं पारिभाषिकं ग्राह्यं प्रतिज्ञावचनविरोधात् मध्ये विवर्तशब्देन सहासा-मञ्जस्यादिति । इत्थमत्रापि परिणामपदं विवर्ततात्पर्यपरमेवेति बोधनान्न कश्चन विरोध इति । किञ्च वाचः त्रैविध्यविषयेऽपि भर्तृहरिमतेऽपि वाचश्चतुष्टयत्वमेवाङ्गीकर्त्तव्यम्, तथाहि –

**वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।**
**अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥**

इति कारिकया समुत्थिता वाचः त्रिविधत्वप्रकारिका जिज्ञासा अत्रैव समाधेया यतोहि अत्रैव अनेकतीर्थभेदायास्त्रय्या वाचः परं पदं स्थानं किमिति जिज्ञासायां मूलाधारस्थाया एकस्या एव वाच (पराख्याया) अनेकतीर्थभेदं प्राप्ता वैखरी मध्यमा पश्यन्तीति तिस्रो वाच इत्येव तात्पर्यम्, न तु वाचस्त्रिविधत्वमेवेति प्रतिपादितम्मन्ये । भर्तृहरिणा त्रिविधत्वे स्वीकारे चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति इति भाष्यस्वीकृतसिद्धान्तस्य विरोधः । भर्तृहरिणा भगवतः पतञ्जले सिद्धान्त-निरूपणाय प्रवृत्तेन तद्वचनविरोधपरकस्यास्वीकारात् । अतो भर्तृहरिमतेऽपि वाचश्चतुर्विधत्वमेवाङ्गीकर्त्तव्यमिति ।

किञ्च भावः क्रियापरको द्रव्यपरको वेति संशये वाक्यपदीये प्रयुक्तस्य भावपदस्य तात्पर्यं किमिति जिज्ञासायामिदमवधेयम् -

**अध्याहता ( अध्याहृत ) कला यस्य कालशक्तिमुपाश्रिताः ।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥**

इति कारिकया भावभेदस्य योनयः इत्यस्य पदार्थभेदस्य योनयः कारणानि-जन्मादयः षट्-जन्म-स्थिति-मरण-वृद्धिहास-परिणामाख्या भवन्तीति तात्पर्यम् । अत्र भावस्य नाम पदार्थस्य इत्युक्तेऽयं भावः क्रिया चेत् ब्रह्मणि क्रियाया अभावात् तत्स्वीकर्त्तुमशक्यमशक्यम्, किञ्च भावो द्रव्यमिति चेत् शब्दे ब्रह्मणि द्रव्यत्वापत्तिः, किञ्च शब्दलक्षणविमर्शे भाष्यकारेण नेत्याह-गुणो नाम सः, नेत्याह द्रव्यन्नाम तत्, नेत्याह क्रिया नाम सा कस्तर्हि शब्द इति येनोच्चारितेन इत्यनेन येन स्फोटाख्येन शब्दब्रह्मणा द्रव्य-गुण क्रियाविशिष्टपदार्थो बोध्यते स शब्दः इत्येव व्याख्यानेन शब्दस्य द्रव्यगुण क्रियाभिन्नत्वं यत्प्रतिपादितं ततो विरोधः स्यात् । अतो अत्र भावपदार्थः अस्ति किञ्चित् तच्चेहेत्थं बोध्यम्-ब्रहम्णो दशा द्वयी एका विद्ययाऽप्रविभाग दशा, अपरा अविद्यया प्रविभागदशा । तत्र प्रविभागदशायां ब्रह्मविविधविकल्पगोचरम् तस्यां दशायाम् एकस्यैव ब्रह्मणो-धर्मधर्म्यादिरूपेण विकल्पः । तत्र कालभेदेन भिन्नजातिपुरस्कारेण कयोश्चिद्भेदबोधः कयोश्चिद-भेदबोधः, क्वचिद्भावप्रत्ययः क्वचिदभावप्रत्ययस्तथापि कार्यरूपेण प्रविभागाभावदशायां तादृश-सर्वविकल्पातीतं शब्द ब्रह्म । इत्थं ब्रह्मणोर्विद्याशक्तिमद्रूपं सर्वविकल्पातीतम्, अविद्याशक्तिमच्च सर्वकार्यानुकूलशक्तिभिः समाश्रितं विकल्पगोचरं भवति । अथवा ब्रह्मणोर्यः स्वकार्यभूत-विषयाकारेणोत्पत्तिनिधनादिभिर्विविधविकल्पैः परिच्छेदः सोऽविद्यावशात् सत्य इव भासत इति । इत्थं प्रक्रियादशायामेव भावः द्रव्यक्रियापरक इति मन्ये । इत्थं वाक्यपदीयब्रह्मकाण्डस्थविषयः सदाऽनन्तः चिन्त्यो ज्ञेयः ध्येयश्चेतिशम् ।

**आचार्यो व्याकरणविभागस्य**
**ज. रा. राजस्थानसंस्कृतविश्वविद्यालयः,**
**जयपुरम्**

★★★

# जगतः शब्दविवर्तत्त्वविचारः

✍ डॉ. देवदत्तः सरोदे

**(निबन्धेऽत्र शब्दब्रह्मण एव नामरूपात्मकस्य जगतोऽस्य विवर्त्तत्वमिति श्रुतिस्मृतिप्रमाणैः प्रतिपाद्य विवर्त्तपक्षे सम्भाविताऽऽपत्तीः निरस्य भर्त्तृहरिणा ब्रह्मकाण्डे कतिधा विपूर्वकवृतुधातोः प्रयोग इत्यनुसन्धाय तत्र-तत्र सन्दर्भानुगुणमर्थञ्च निरूप्यान्तेऽयमुपसंहृतः सनिष्कर्षः । वस्तुतः 'स भूरिति व्याहरत्, भुवमसृजत' इत्यादिश्रुतिः शब्दपूर्विकां सृष्टिं घोषयति । शब्दो हि द्विविधः, आन्तरो बाह्यश्च । एवमर्थोऽपि द्विविधः । उभयोरेव उभाभ्यां सह अभेद इति मत्वैव कात्यायनः प्रतिजानीते 'सिद्धे शब्दार्थसम्बन्धे' इति। आधुनिकभाषाविज्ञानस्येव शब्दो नाम कश्चन भाषिकांशमात्रं नास्ति, प्रत्युत व्याकरणदर्शने शब्दो विभुः, अनादिनिधनः, सर्वोपादानभूतो वर्त्तते । तस्य कालशक्तिरस्ति, यया घटपटादयो भासन्ते । तथाहि पारमार्थिकी सत्ता शब्दसत्तैव । अर्थस्य सत्ता व्यावहारिकी, प्रातिभासिकी वेति शब्दविवर्त्तवादस्य सारः । -स.)**

जिज्ञासा मानवस्य स्वाभाविकी प्रवृत्तिः । लोकेऽस्मिन् किन्नु खलु सत्यम् ? किन्नु खलु असत्यम्? इति जिज्ञासा दर्शनशास्त्रस्य प्रवृत्तिनिमित्तम् । किं नाम दर्शनम्? इति जिज्ञासायाम् उच्यते दृश्यते ज्ञायते बोध्यते सत्यमसत्यं वा येन तद्दर्शनम् । भारतीयदर्शनपरम्परा आस्तिक-नास्तिकभेदेन द्विधा । सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनम् इति आस्तिकषड्दर्शनानि प्रसिद्धानि । एतान्यतिरिच्यान्यान्यपि दर्शनानि तन्त्रभेदेन सम्प्रदायभेदेन आविर्भूतानि, तेष्वन्यतमं व्याकरणदर्शनम् । व्याकरणस्य सर्वाङ्गसुन्दरं विशदं दर्शनतत्त्वं व्याडिना विरचितस्य संग्रहनामकग्रन्थस्य साम्प्रतिके काले उपलभ्यमानसन्दर्भेषु विलोक्यते अत एव भाष्यकारः संशयपदेषु निर्णायकत्त्वेन संगहस्य सन्दर्भम् उद्धरति तद्यथा 'संग्रहे तावत् कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणम्'[1] इति ।

साम्प्रतं व्याकरणदर्शनत्वेन भर्तृहरिणा विरचितं प्रसिद्धं पुस्तकं वाक्यपदीयं वैयाकरण-निकाये अभिमतम् । ग्रन्थेऽस्मिन् काण्डत्रयं विद्यते। ब्रह्मकाण्डं, वाक्यकाण्डं, पदकाण्डम् चेति । ग्रन्थकृत् भर्तृहरिः ग्रन्थेऽस्मिन् वस्तुनिर्देशात्मकं मङ्गलाचरणं करोति । इह सर्वोच्चं वस्तु शब्दब्रह्म, तस्य स्मरणम् **अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रियाजगतो यतः ॥** वा.प.ब्र. १

इति आदिमश्लोकेन करोति ।

**शब्दब्रह्म** -

को नु खलु शब्दः? व्याकरणदर्शनस्य मुख्यसिद्धान्तः वाक्यस्फोटसिद्धान्तः वाक्यमेव[२] स्फोटात्मा वाचकात्मा विद्यते, वाक्येनैव अर्थबोधो जायते । अतः शब्दः वाक्यस्वरूपमेव । सूत्रकारः पाणिनिरपि अमुमेव विषयं स्पष्टीकुर्वन् आह "स्वं रूपं शब्दस्याशब्दसंज्ञा"[३] (शब्दस्य अर्थादन्यत् किं स्वं रूपं भवति - महाभाष्यम्) इत्यत्र शब्दपदेन वाक्यमेव गृह्यते यदयं "वचोऽशब्दसंज्ञायाम्"[४] इत्यत्र वच् धातोः ण्यति प्रत्यये कुत्वं न शास्ति अशब्दसंज्ञायां, तेन वाच्यमिति भवति । अन्यत्र शब्दसंज्ञायां वाक्यमिति भवति। अनने सुतरामेतत् स्पष्टं भवति शब्दपदेन वाक्यमेव गृह्यते तत्रैव वैयाकरणानां तात्पर्यात् । अपि च 'आप्तवाक्यं शब्दः' इत्यत्र वाक्यार्थे एव शब्दः निगदितः शब्दप्रमाणवर्णनप्रसङ्गे तर्कसङ्ग्रहे । यदि शब्दपदेन वाक्यमेव गृह्यते तर्हि कथं नु पदे अथवा प्रकृतिप्रत्यययोः शब्दस्य व्यपदेशः? पदे अथवा प्रकृतिप्रत्यययोः योऽयं शब्दस्य व्यपदेशः स गौणः यतः अर्थस्य निरपेक्षप्रतिपत्तिर्वाक्येनैव भवति न केवलं पदेन । मुख्यं तु वाक्यं भवति तत्र विभागः पदानाम् ..। यथा - सुबन्तानि पदानि, तिङन्तानि पदानि च । प्रथमकाण्डे स्फोटाख्यशब्दब्रह्म कार्यरूपेण कारणरूपेण च उभयथा निरूपितम् ।

जगतः शब्दविवर्तत्त्वम् - भर्तृहरिणा शब्दब्रह्मणः अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् इति स्वरूपलक्षणम्, विवर्ततेऽर्थभावेन प्रक्रियाजगतो यतः इति तटस्थलक्षणं कृतम् ।। एवम् एकस्य वस्तुनः लक्षणद्वयेन निर्देशः कृतः ।

शब्दब्रह्मणः स्वरूपलक्षणम् - "अनादिनिधनं ब्रह्म[५]" आदिश्च निधनञ्च आदिनिधने, न विद्येते आदिनिधने यस्य तद् अनादिनिधनम् उत्पत्तिविनाशरहितमित्यर्थः । "अक्षरम्" किन्नु खलु अक्षरम् ? न क्षरति इति अक्षरम् अथवा अश्नुते व्याप्नोति इति अक्षरम् । पराख्यशब्दब्रह्म उत्पत्तिविनाशरहितं व्यापकञ्च विद्यते इत्यर्थः । ब्रह्म पदेन चैतन्यं गृह्यते तथा च श्रुतिः - "सच्चिदानन्दं ब्रह्म" इति । अविच्छिन्नचेतनरूपं ब्रह्म इत्यर्थः ।

तच्च सद्रूपं चिद्रूपम् आनन्दरूपं सर्वत्र व्याप्तं भवति । निरुपाधिकं सत् सोपाधिक-सत्तापदार्थान् गृह्णाति । वाचकतया शब्दः सर्वत्र व्याप्तः[६]। लोके विद्यमानाः सर्वे पदार्थाः शब्दात्मनः शब्दान्विताः भवन्ति । एतत् स्वरूपलक्षणं कदापि न जहाति सर्वत्र सार्वकालिकं च भवति ।

शब्दब्रह्मणः तटस्थलक्षणम् - विवर्ततऽर्थभावेन प्रक्रिया जगतो यतः इति शब्दाख्यब्रह्मणः तटस्थलक्षणम् । तटस्थलक्षणस्य प्रमाणं यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति[७] .. ....... इति ।

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत । ततः समुद्रो अर्णवः । समुद्रादर्णवादधिसंवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः॥[८] अत्र –

**सर्वेषां तु नामानि कर्माणि च पृथक् पृथक् ।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥[९]**
**छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ।[10]**

इत्यादी निपुष्कलानि प्रमाणान्युपलभ्यन्ते

तत्र कोऽयं विवर्तो नाम? कश्च परिणामो विकारो वा ? अतत्त्वतोऽन्यथाभावः विवर्तः अतात्त्विकान्यथाभाव इत्यर्थः अथवा विलक्षणतया विशेषतया विपरीततया वर्तनमिति विवर्तः अथवा विशेषेण वर्तनं किञ्चित्कालावधिकान्यथाभावेन प्रतीतिः। यथा – शुक्तौ रजतम्, रज्जौ सर्पः ।

वृषभदेवेनापि विवर्तलक्षणमेवमुक्तम् – एकस्य तत्त्वादप्रच्युतस्य भेदाऽनुकारेणासत्य-विभक्तान्यरूपोपग्राहिता विवर्तः स्वप्नविषयप्रतिभासवत् .... इति ।[११]

तत्त्वात् स्वरूपाद् अप्रच्युतस्यैकस्य शब्दब्रह्मणः आरोप्ये स्वभेदप्रतिभापुरस्सरं योऽसत्यस्याधिष्ठानविभागेन च प्रतीयमानस्यारोप्यस्य धर्मोपग्रहः विवर्तः । यथा स्वप्ने विज्ञानात्मा एकः सन् नानापदार्थरूपेणाऽवभासते किन्तु विज्ञानात्मा न भिद्यते । यदि तथा स्वीक्रियते तर्हि जागरितस्य पुरुषस्य स्मरणानुत्पत्तिः स्यात् । इहापि शब्दब्रह्म स्वरूपहानिरहितं सत् स्वकालाख्य शक्त्या नानारूपेण प्रतिभासते। परिणामो नाम सतत्त्वतोऽन्यथाभावः, तात्त्विकरूपेण अन्यथाभावः यथा – दुग्धस्य दधिरूपेण परिणतिः विकारः परिणामो वा ।

विवर्तोऽपि द्विधा – मूर्तिरूपविवर्तः यथा – क्षेत्रे गौः, ग्रामे चैत्रः इति । स्वरूपेण अवस्थितः मूर्तिस्वरूपाद् अप्रच्युतः सन् प्रतीयते । क्रियारूपविवर्तः यथा घटो नश्यति । लोके सत्यपि भेदे शब्दब्रह्मणः अभेदरूपम् । तथा च – एकमेव यद् आम्नातम्[१२] .......।

यतः ब्रह्मणः सजातीयभेदो विजातीयभेदः स्वगतभेदोऽपि नास्ति । अतः अद्वैतं ब्रह्म निर्विवाद तत्थ्यम् तथा च श्रुतिः एकमेव अद्वितीयम्[१३], एकं सद् विप्राः बहुधा वदन्ति ।[१४] लोके कथं भेदस्य प्रतोतिः इति जिज्ञासायाम् उच्यतेऽत्र शब्दब्रह्मणः कालाख्यशक्तिकारणात्[१५] भिन्नतया प्रतीयते ।

पराख्यशब्दब्रह्मणः सकाशाद् प्रथमविवर्तरूपेण वेदाः ततः परम् आकाशादिपदार्थाः संभूताः, तथा च श्रुतिः तस्माद्वा एतस्माद् आत्मानः आकाशः संभूतः [१६]

एकस्य शब्दब्रह्मणः कथमनेकत्वम् इत्यत्र भर्तृहरिः स्वयमेवाह –

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ वा.प.ब्र. 3**

इह व्याकरणदर्शने कालाख्यस्वतंत्रशक्तिः अङ्गीक्रियते। कालेनानुज्ञाता जन्मादयो विकाराः जायन्ते । अन्याः सर्वाः शक्तयः कालाधीनाः भवन्ति । एकमेव शब्दब्रह्म स्वशक्त्या स्वस्मिन् एव भिन्नत्वं भासयति । पराख्यशब्दब्रह्मणः कथं संसारोऽयं विवर्तः इति चेत् सर्गादौ सर्वापाधिभेद-रहितं पराख्यशब्दब्रह्म सज्ज्ञानरूपात्मकं निखिलं जगत् आदौ बुद्धौ संप्रधार्य संकल्पयति, एकोऽहं बहु स्यां प्रजायेय[१७] इति । ततः परं स्वकीयया कालाख्यशक्त्या आकाशादीनि भूतानि ततश्च नामरूपात्मक जगत् विवर्तरूपेण जायते । तथा च हरिराह –

**शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः**
**छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥वा.प.ब्र. 120**

वस्तुतः जगदिदं शब्दस्य परिणामः इति वेदविदः मन्यन्ते, सर्गादौ वेदेभ्यः एव प्रथमं विश्वं (जगत्) व्यवर्तत (विवर्तरूपेण अतिष्ठत्) अत्र परिणामपदेन संशयो भवेत् किमिदं जगत् शब्दस्य विकारो वा विवर्तो वेति परन्तु व्याकरणदर्शनस्य वाक्यपदीयस्य आदितः आन्तं यावत् अनुशीलनेन एतत् सुतरां स्पष्टं भवति यद् इह प्रयुक्तं परिणामपदं विवर्तार्थे एव, यतः अस्मिन्नेव श्लोके अन्तिमे चरणे ''प्रथममेतद् विश्वं व्यवर्तत'' इति पठितम् । अत्र व्यवर्तत इति पदेन विवर्तार्थे एव तात्पर्यम् । किञ्च अस्य विश्वस्य कारणभूता शक्तिः शब्देष्वाश्रिता तद्यथा –

**शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।**
**यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥ वा.प.ब्र. 118**

अस्य जगतः व्यवहारकारणभूता शक्तिः वाच्यवाचकभावरूपा शब्देष्वेवाश्रिता । सूक्ष्मं शब्दतत्त्वं गवादिरूपेण गोशब्दादिरूपेण च विवर्तते, यः शब्दो नेत्रं ज्ञापकं यस्य स यन्नेत्रः प्रतिभात्मा प्रतिभाविषयत्वात् अयं भेदरूपः व्यवहारः प्रतिपुरुषं प्रतीयते। तथा च आहुः –

**वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं संतनोति।**
**वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ॥**

वा.प. स्वोपज्ञवृत्ति. १२०

वाक्तत्त्वमेव भोक्तृभोक्तव्यभोगरूपेण[१८] विवर्तते न बाह्यं वस्तु किञ्चिदस्तीति । अपि च कथं जगद्व्यवहारः शब्दमूलः तद्भर्तृहरिणा एवमुक्तम् –

**इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया:।**
**यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ॥ वा.प.ब्र. 121**

लोके सर्वा (कर्तव्यस्य प्रकारः) इतिकर्तव्यता इदं कार्यम् इत्थं कर्तव्यमिति सर्वव्यवहारः शब्दालम्बनीभूतः शब्दाश्रयभूतः इति । नहि शब्दमनुपन्यस्य कोऽपि कमपि कस्मिंश्चिदपि व्यवहारे प्रवर्तयितुं शक्नोतीति सर्वः व्यवहारः शब्दमूल एव । बालानामपि इतिकर्तव्यता शब्दज्ञानेन एव यतः जन्मान्तरीयशब्दभावनया बालकोऽपि इतिकर्तव्यतां प्रतिपद्यते ।

शब्दः नित्यः कार्यः च । स्फोटरूपशब्दः नित्यः, येन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः इति सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकस्य व्याख्याने भाष्यकारः आह

ध्वनिरूप: शब्दस्तु अनित्य: प्रतीतपदार्थको ध्वनि: लोके शब्द:, शब्दं करोति, शब्दकारी अयं माणवक: इति भाष्यसम्मतम् ।

रूपरसगन्धस्पर्शा: एते सर्वे भूतानां गुणा: सन्ति । रूपरसगन्धस्पर्शवत् शब्दोऽपि गुण: तर्हि कथमयम् नित्य: इति जिज्ञासायामुच्यते सर्वे भूतादय: तेषां गुणाश्च शब्दान्विता: सन्ति । तस्मात् शब्दमयमेव सर्वम् शब्दब्रह्मणि शब्दार्थौ अभेदेन भवत: । सूक्ष्मा वाक् शब्दब्रह्म । तथा च श्रुति: – पुरा देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुरु, ताम् अखण्डा वाचम् इन्द्र: मध्यतो विच्छिद्य विछिद्य व्याकरोत् – तैतिरीयसंहिता । नेह नानास्ति किञ्चन इति– बृहदारण्यकोपनिषद् ।

अपि च वाक्यपदीयकार: भर्तृहरिरप्याह –

**एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।**
**अपृथक्त्वेऽपि शक्तिभ्य: पृथक्त्वेनेव वर्तते ॥ वा. प. 2**

वाक्यपदीयकार: वाक्यपदीयग्रन्थस्य ब्रह्मकाण्डे विपूर्वकस्य कृधातो: प्रयोग: नानार्थे विहित; सन्दर्भानुगुणं अर्थनिष्पत्ति: प्रस्तूयते । तद्यथा –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रियाजगतो यत: ॥ वा. ब्र.1**

इति प्रथमश्लोके अतत्त्वतोऽन्यथाप्रथा इति विवर्तार्थे एव वि+ वृतु वर्तने धातो: प्रयोगो विद्यते ।

**प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम् ।**
**यदस्मिन्नेव तमसि ज्योति: शुद्धं विवर्तते ॥ वा. ब्र.18**

इति श्लोके अतत्त्वतोऽन्यथाप्रथा इति विवर्तार्थे एव वि + वृतु वर्तने धातो: प्रयोगो विद्यते ।

**वितर्कित: पुरा बुद्ध्या क्वचिदर्थे निवेशित: ।**
**करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते ॥ वा. ब्र.47**

इति श्लोके करणव्यापारेण (विवृतप्रयत्नेन) इति अर्थे वि + वृतु वर्तने धातो: प्रयोगो विद्यते ।

**अन्त:करणतत्त्वस्य वायुराश्रयतां गत: ।**
**तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥ वा. ब्र.114**

इति श्लोके सतत्त्वतोऽन्यथाप्रथा इति शब्दाकारेण परिणमते इति परिणामार्थे वि + वृतु वर्तने धातो: प्रयोगो विद्यते ।

**तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।**
**विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ॥ वा. ब्र.117**

इति श्लोके सतत्त्वतोऽन्यथाप्रथा इति परिणामार्थे प्रविभज्यमानार्थे एव वि + वृतु वर्तने धातो: प्रयोगो विद्यते ।

**शब्दस्य परिणामोऽयमित्याम्नायविदो विदु: ।**
**छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥ वा. ब्र.120**

इति श्लोके शब्दस्य परिणामः इति परिणामः शब्दः प्रयुक्तः परन्तु अतत्त्वतोऽन्यथाप्रथा इति विवर्तार्थे एव वि + वृतु वर्तने धातोः प्रयोगो विद्यते, अतः परिणामशब्दस्यार्थः इह विवर्तः एव ।

**अविभागाद् विवृत्तानामभिख्या स्वप्नवच्छुतौ ।**
**भावतत्त्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ॥ वा. ब्र.145**

इति श्लोके अतत्त्वतोऽन्यथाप्रथा इति विवर्तार्थे एव वि + वृतु वर्तने धातोः प्रयोगो विद्यते एवं वि + वृतु वर्तने धातोः प्रयोगो नानार्थे प्रयुक्तः ।

लोके सर्वज्ञानस्य मूलं सर्वं ज्ञानं शब्दमयमेव विद्यते तथा च –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ वा.प.ब्र. 123**

तादृशं नहि किञ्चन ज्ञानं लोकेऽस्ति यत् शब्दानुगमं विना स्यात् । सर्वं ज्ञानं शब्देन संसृष्टमिव प्रतीयते ।

लोके सर्वे पदार्थाः सर्वत्र सर्वदा नामान्विताः न कोऽपि अर्थः कदाचित् क्वचित् नामधेयेन वियुज्यते । यतः शब्दाः नित्याः अर्थाः नित्याः तेषां सम्बन्धोऽपि नित्यः उक्तञ्च भाष्यकारेण **सिद्धे शब्दार्थसम्बन्धे**[19] इति ।

अनेन सर्वं जगत् शब्दान्वितमिति प्रतीयते । किञ्च शब्दानुगमं विना न हि किञ्चन प्रतीयते न हि कश्चन बोधो भवति । अतः शब्द एव समेषां निमित्तं हेतुभूतं यतः लोके नहि किञ्चन ज्ञानं शब्दमन्तरेण बोद्धुं सुशकमस्ति । अत्र व्याकरणदर्शने शब्दब्रह्मवादे विवर्तवादः विलसति। नामरूपात्मकोऽयं संसारः शब्दब्रह्मणः विवर्त एव न परिणामो यदि शब्दब्रह्मणो विकार इति अङ्गीक्रियते तदानीं शब्दब्रह्मणोऽनित्यत्त्वं स्याद् यथा परिणामे दुग्धं दधिरूपेण परिणमते नहि पुनः दधि दुग्धरूपं धत्ते । अतः सर्वं जगत् शब्दब्रह्मणो विवर्तः एव तथ्यम् ।

**सन्दर्भाः –**


1. म.भाष्य. पस्पशा. ।
2. **पदे तु न वर्णाः विद्यन्ते वर्णेष्ववयवा न च ।**
   **वाक्यात्पदानां मत्यन्तं प्रविवेको न कश्चन ॥ वा.प.ब्र. 120 ।**
3. अष्टा. १.१.६८ ।
4. अष्टा. ७.३.६७ ।
5. वा.प.ब्र. १ ।
6. यावद्ब्रह्म विष्ठितं तावती वाक् – ऋग् . १०.११४.८ ।
7. तै. उपनि.३.१ ।
8. ऋ.१०.१९०.१,२ ।
9. मनु. १.२१ ।

10. वा.प.ब्र. १२० ।
11. वा.प. १.१ स्वोपज्ञवृतिः ।
12. वा.प.ब्र. २ ।
13. छान्दो. उपनि. ६.२.१ ।
14. ऋ.१.१६४.४६ ।
15. मूर्तिविवर्तः दिगवच्छिन्नः, क्रियाविवर्तः कालावच्छिन्नः -

    **अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।**
    **जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥**

    अस्ति, जायते, वर्धते , विपरिणमते , अपक्षीयते, नश्यति
16. तै . उपनि.१.१
17. तै . उपनि.२.६
18. तु . **एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।**
    **भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः॥ वा.प.ब्र. 4 ।**
19. म.भाष्य. पस्पशा. ।

**सन्दर्भग्रन्थसूची** -


1. व्याकरणमहाभाष्यम् , भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।
2. काशिका, आचार्य विजयपालः विद्यावारिधिः, रामलालकपूर ट्रस्ट, रेवली, सोनीपत ।
3. वाक्यपदीयम् ,पं. सूर्यनारायणशुक्ल, चौखम्बा संस्कृत संस्थान, वाराणसी ।
4. व्याकरणतत्त्वविमर्शः, डॉ. श्रीधरमिश्र, जगदीशसंस्कृतपुस्तकालय, जयपुर ।
5. अष्टाध्यायी, सम्पादकः पं. ब्रह्मदत्त जिज्ञासु, रामलालकपूर ट्रस्ट, रेवली, सोनीपत ।
6. ऋग्वेदसंहिता, परोपकारिणी सभा, अजमेर ।
7. संस्कृतविमर्शः, प्रियदर्शी ठक्कुरः, १९९०, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली ।
8. तर्कसङ्ग्रहदीपिका, आचार्य आनन्द झा, हिन्दी ग्रन्थ अकादमी, लखनऊ, १९७६ ।



**वरिष्ठ-सहायकाचार्यः, ( शिक्षाशास्त्रविभागः )**
**राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः,**
**क. जे. सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई-77**


★★★

# तुरीयवागुत्पत्तिविमर्शः - वाक्यपदीयसन्दर्भे

✍डॉ. प्रियव्रतमिश्रः

**(भगवता पतञ्जलिना शब्दस्य लोकशास्त्रदृष्ट्या स्वरूपद्वयं निरदर्शि-ध्वनिः, स्फोटश्चेति । तत्र स्फोटो नित्या जन्ममृत्युरहितत्वात् । ध्वनिरनित्य उत्पत्त्यादिमत्त्वात् । स एव ध्वनिः प्रकृतनिबन्धे तुरीया वाक् । अमुष्याः मूलं शिक्षाकारमते वायुः, जैनमते परमाणुः, शाब्दिकमते च ज्ञानमिति वाक्यपदीयप्रदर्शितरीत्या गवेषको विमृशति । अन्ते चोपसंहरन्नाह - प्रथमतः ज्ञानं, तदेव अणुः अनन्तरं स एव पश्चाद् वायुः, स एव च शब्दत्वेन परिवर्त्तत इति । समेषां तात्पर्य्यं तु समानमिति । अत्रेदमवगतं भवति - स्वस्ववासनानुरूपं वस्तु दृश्यते । तथाहि वासनाभेदेन वस्तुभेदः स्वाभाविकः । सर्वमाणवमिति सिद्धान्तो जैनानां तस्मात् आणवः शब्दः, उच्चारणाद्यनुशासकानां शिक्षाकाराणामनुशासनस्य वायुरूपे शब्दे एव सम्भवात तन्मते वायवीयः शब्दः, असत्यं वर्णपदात्मकं शब्दं समाश्रित्य स्फोटाख्यं चित्स्वरूपं ब्रह्म यावत् पथिप्रदर्शकं व्याकरणशास्त्रं 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति लक्ष्यप्रापकं 'ज्ञानं शब्दः' इति परामृशति । वस्तुतः शब्दस्य तिस्रः अवस्थाः, स्थूला, सूक्ष्मा, सूक्ष्मतमा च । स्थूलावस्थायां वायुरूपः, सूक्ष्मावस्थायामणुरूपः, सूक्ष्मतमावस्थायाञ्च ज्ञानरूपः । ज्ञानात्मकः शब्द एव पराशब्देन, शब्दब्रह्मपदेन, स्फोटशब्देन च शब्दशास्त्रे जेगीयते । तदेव चौपनिषदं ब्रह्म । तदेव च प्रणवरूपः, 'ओङ्कार एव सर्वा वाक्' इति श्रुतेः । - स.)**

शब्द एव मूलं शब्दादेव जगदुत्पत्तिः शब्दो ब्रह्म एव, अनादिनिधनं तत्त्वमिति वैयाकरणानामाकूतम् । एवं स्थिते "वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते । कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ।। इति वाक्यपदीये शब्दोत्पत्तिविषये श्रूयते दार्शनिकानां मतभेदः । तत्र शब्दत्वेन वैखरीवागङ्गीक्रियते इति सप्रमाणमुपन्यस्य वैखर्युत्पत्तिविषये तत्तच्छास्त्रोक्तं मतमत्र वाक्यपदीयानुसारेणोपस्थाप्यते वैयाकरणानाञ्च मतं प्रकाश्यते ।

कुञ्जिशब्दाः - वैखरी, विवर्त्तः, आन्तरो ज्ञाता, अणुः, अजस्रवृत्तिः ।

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।**
**विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ॥**

इति हरिकारिकया शब्दस्य वरीयस्त्वं शाब्दिकनिकाये निश्शङ्कमाद्रियते इति निश्चप्रचम्। अयं संसार एव शब्दस्य परिणामः । अस्मादेव त्रयीरूपेण (वेदादिरूपेण) तज्ज्योतिः प्रथमं परिवर्त्तते इत्याम्नायविदः प्रमाणयन्ति । शब्दो ब्रह्म एव इति शब्दब्रह्मवादिनो विस्रम्भः । अत एव प्रथमायां कारिकायां हरिः अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरमिति प्राह । यद्यपि शब्द एव मूलं शब्दादेव जगतः प्रक्रिया विवर्त्तते शब्दो ब्रह्मरूप एव तथापि शब्दस्योत्पत्तिविषये दार्शनिकानां वैमनस्यं दर्दृशीति । यथा- ब्रह्मकाण्डे उच्यते -

**वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।**
**कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ।।**[१]

अर्थात् कैश्चित् दार्शनिकैः वायोः परिणामः कैश्चिदणूनां परिणामः कैश्चिच्च ज्ञानस्य परिणामः शब्द इति निगद्यते अतः अत्र प्रवादेषु सिद्धान्तेषु अनवस्थित इत्यर्थः ।

तत्र केषाञ्चिच्छिक्षाकाराणां मते शब्दः प्राणवायोरेव परिणामः जैनानां मते अणूनामेव परिणामः वैयाकरणानां मते तु ज्ञानस्य परिणामः शब्द इति । सम्प्रति जायतेऽत्र विचिकित्सा यन्नु शब्दो ब्रह्म एव तस्मादेव संसारोत्पत्तिरिति वैयाकरणानां राद्धान्तस्तर्हि कथङ्कारमुत्पत्त्यादिभेदो व्यवस्थाप्यते? तेन अनित्यतापत्तिः किमुत स्ववचोव्याघात एव । यतो हि आदावेव अनादि-निधनमित्युक्त्वा पुनरुत्पत्त्यादिविषयकचिन्तनं वदतो व्याघात इति चेदत्र शब्दत्वेन वैखरीवागङ्गी-क्रियते तस्या एवोत्पत्तिविषये मतभेदो दृश्यते विविधदर्शनेषु इति मञ्जूषाकृदाह ।

तत्र केषाञ्चिच्छिक्षाकाराणां मते अयं वैखरीरूपः शब्दः वायोः परिणामस्तदित्थं प्रत्यपादि हरिणा-

**लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्त्तिना ।**
**स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ।।**[२]

वक्तुः शब्दप्रयोगेच्छयोत्पन्नेन प्रयत्नेन प्राप्तक्रियः प्राणवायुः तत्तदुच्चारणस्थानेषु अभिहतः सन् शब्दत्वेन विपरिणमते इत्यर्थः । वायोः शब्दत्वापत्तिः शुक्लयजुःप्रातिशाख्येऽप्युक्ता । तथा हि सूत्रम् "वायुः खात् (२/६) ।

वायुः शब्दस्य कारणं स च खादाकाशादुत्पद्यते इत्युक्त्वा वायोः परिणामः शब्दः इति स्पष्टयितुं "शब्दस्तत्व'' इति सूत्रान्तरमुक्तं शब्दस्तदात्मकः वाय्वात्मक इति तदर्थः ।

जैनानां मते तु अणूनामेव परिणामः शब्द इत्युच्यते । तदुक्तं हरिणा -

**अणवः सर्वशक्तित्वात् भेदसंसर्गवृत्तयः ।**
**छायातपतमःशब्दभावेन परिणामिनः ।।**[३]

सर्वकार्यजननशक्तिमत्त्वात् भेदसंसर्गवृत्तयः अणवः अर्थात् वियोगसंयोगवृत्तयः अणवः विभक्ताः सन्तः छाया आतपः तमः इति रूपेण परिणमन्ते, संयुक्ताः सन्तश्च शब्दभावेन परिणमन्ते

इत्यर्थः । ननु जायतेऽत्रशङ्का यदणूनां नित्यत्वात् सर्वदा शब्दभावेन परिणामः कुतो नेति चेदुक्तं हरिणा –

**स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।**
**अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥[४]**

अर्थात् अर्थबोधनेच्छया समुपजातेन प्रयत्नेन प्रेरिताः शब्दाख्याः परमाणवः शब्दतन्मात्ररूपा वा वर्षाकाले मेघपरमाणु इव प्रचीयन्ते सङ्घीभवन्तीत्यर्थः । प्रयोक्तृयत्नेन संह्रियमाणाः शब्दत्वापत्तिशक्तियुक्ताः परमाणवः शब्दभावेन परिणमन्ते न तु सर्वदा इति तदर्थः ।

वैयाकरणानां मते तु ज्ञानस्यैव परिणामः शब्द इत्युच्यते । तदुक्तं हरिणा –

**अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्त्तते ॥[५]**

आन्तरो ज्ञाता नाम वृत्तिविशिष्टमन्तःकरणं ज्ञानमित्यर्थः सूक्ष्मवाग्रूपेण आत्मनि तिष्ठति तदेव ज्ञानं स्वस्य रूपस्य प्रकाशनाय शब्दत्वेन परिणमते । "क" "ख" रूपेण विवर्त्तते । शब्दो ज्ञानस्य परिणाम इत्यत्र भाष्यकाराणामित्थं सम्मतिर्विद्यते । तत्र "'आख्यातोपयोगे'[६] इति सूत्रखण्डनाय "अयमपि योगः शक्योऽवक्तुम्" कथमुपाध्यायादधीत इति । अपक्रामति तस्मात् तदध्ययनम् । यद्यपक्रामति किं नात्यन्ताय । पक्रामति ? सन्ततत्वात् । अथवा ज्योतिर्वज्ज्ञानानि भवन्ति" इत्युक्तम् । अयम्भावः – उपाध्यायादपक्रामच्छब्दजातमधीयान उपादत्ते इत्यर्थके "उपाध्यायादधीते" इत्यत्रापक्रमजन्यविश्लेषाश्रयत्वादुत्सर्गेणापादानत्वं संसाध्य शब्दानामपक्रमणं न युक्तम्। यथा फलं वृक्षादपक्रान्तं न पुनर्वृक्षे भवति, एवं शब्देऽपि प्रसङ्गः इत्याशङ्क्योक्तं "सन्ततत्वात्" इति । शब्दस्य व्यञ्जका ध्वनय उपाध्यायेनोत्पाद्यमाना अपि सादृश्यात् तत्त्वेनाध्यवसीयमानाः श्रोतुः पुनः पुनः श्रोत्रदेशं गच्छन्तो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यञ्जयन्तीत्यर्थः । अथवा यथा ज्वालारूपं ज्योतिरविच्छेदेनोत्पद्यमानं सादृश्यात् तत्त्वेनाध्यवसीयमानं सन्ततं तथैवोपाध्यायज्ञानानि भिन्नानि भिन्नशब्दरूपतामापद्यमानानि सन्ततानीत्युच्यन्ते इति । एवञ्चोपाध्यायज्ञानानि भिन्नशब्दरूपतामापद्यमानानि सन्ततानीत्युच्यन्त इति । "सन्ततत्वात्" इत्यनेन ध्वनयता भाष्यकृता शब्दस्य ज्ञानपरिणामत्वं सूचितम् । अत एव कैयटेनोक्तं "ज्ञानस्य शब्दरूपतापत्तिरिति दर्शनमत्र भाष्यकारस्य" इति । तमिमं प्रसङ्गं नागेशोऽपि वैयाकरणसिद्धान्तलघुमञ्जूषायामुपन्यसति – "आख्यातोपयोगे"[७] इति सूत्रे पतञ्जल्युक्तेश्च इति ।

ज्ञानं कया प्रक्रियया शब्दत्वेन परिणमते इत्यत्र हरिराह–

**स मनोभावमापद्य तेजसा पाकमागतः ।**
**वायुमाविशति प्राणमथासौ समुदीर्यते ॥[८]**

स नाम ज्ञाता अर्थात् अन्तःकरणं ज्ञानम् अर्थबोधनेच्छावन्मनो भूत्वा जठराग्निना पाकं दाहं प्राप्तः सन् प्राणवायुमभिहन्ति । अभिघातानन्तरमसौ सवृत्तिमनोयुतः प्राणः ऊर्ध्वं गमनाय प्रेर्यते।

ततः – **अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।**
**तद्धर्मेण समाविष्टस्तेजसैव विवर्त्तते ।।**[९]

अन्तःकरणतत्त्वस्य मनसः आश्रयतां गतः प्राणवायुः तद्धर्मेण अर्थात् मनोधर्मेण दाहेन ज्ञानरूपशब्देन समाविष्टो जाठराग्निसहकारेणैव बहिःशब्दरूपो भवति । तेजसैव इत्युक्तौ यथा इन्धनं तेज आश्रयतां प्रतिपन्नं तत्समावेशादिन्धनरूपतां विहाय तेजोरूपं भवति तथा वायुः स्वरूपहानेन मनोरूपतां प्रतिपद्यते इत्यर्थः । ततः –

**विभज्य स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।**
**प्राणो वर्णानमभिव्यज्य वर्णेष्वेवोपलीयते ।।**[१०]

दाहवशादेव प्राणवायुः सवृत्तिकमनोरूपान्तःकरणयुतः कखादिवर्णरूपान् पृथगवस्थाप्य भिन्नैः श्रूयमाणैः ध्वनिभिः वर्णतः पृथङ्न तिष्ठति प्रत्युत तद्रूप एव भवतीति सवृत्तिकमनोरूपान्तः करणयुतस्य वायोर्यः शब्दभावेन परिणामः स एव ज्ञानस्य शब्दत्वापत्तिरिति द्रष्टव्यम् ।

अयमेव क्रमः उक्तः शब्दोत्पत्तौ पाणिनीयशिक्षायाम् –

**आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया ।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।**
**सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापाद्य मारुतः**
**वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ।।**[११]

आत्मा=अन्तःकरणं संस्काररूपेण स्वगतार्थान् बुद्ध्या = स्ववृत्त्या समेत्य = एकबुद्धि - विषयीकृत्य (मनोयुङ्क्ते) तद्बोधनेच्छायुक्तमनोऽभिहतकायाग्निप्रेरितो वायुर्मूर्धपर्यन्तं गतस्ततः प्रतिनिवृत्तो वक्त्राभिघातेन वर्णान् जनयते इत्यक्षरार्थः ।

अन्येषां केषाञ्चन मतान्तरमुद्धरति भर्तृहरिः वाक्यपदीये । तदित्थम्–

**अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते ।**
**व्यजनाद्वायुरिव स स्वनिमित्तात्प्रतीयते ।।**[१२]

अर्थात् बहिरन्तश्च विद्यमानः ध्वनिरूपः शब्दः सूक्ष्मत्वान्न श्रूयते । यथा आकाशे व्याप्तं वायुं व्यजनं समाकलय्य प्रकाशयति । तथैव वक्तुः प्रयत्नेन अन्तःस्थितः शब्दः श्रूयते इति ।

पक्षान्तरं प्रकाशयति–

**तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।**
**विवर्त्तमाना स्थानेषु सषा भेदं प्रपद्यते ॥**[१३]

द्विविधो हि शब्दः प्राणाधिष्ठानः बुद्ध्यधिष्ठानश्च । स प्राणबुद्धिशक्तिभ्यां प्रतिलब्धाभिव्यक्तिरर्थं बोधयति । तत्र प्राणो बुद्धितत्त्वेनान्तराविष्टः ऊर्ध्वमभिप्रवृत्तः तत्तत्स्थानेषु विवर्त्तमानः अकारादिरूपेण भिन्नतया भासमानः अक्रमे शब्दात्मनि भेदानुरागमात्रं सन्निवेशयति ।

शब्दविषये मतभेदो भट्टपादैः श्लोकवार्त्तिके उक्तः –

**त्रिगुणः पौद्गलो वायमाकाशस्याथवा गुणः ।**
**वर्णादन्योऽथ नादात्मा वायुरूपोऽर्थवाचकः ॥**
**पदवाक्यात्मकः स्फोटः सारूप्यान्यनिवर्त्तने ॥ इति ॥**[१४]

सत्त्वरजस्तमःस्वभावत्वात्त्रिगुणः शब्दः सांख्यैरिष्टः । पौद्गलो दिगम्बरैरिष्टः पुद्गलाः परमाणव उच्यन्ते तेषामयं पौद्गलः तदात्मक इति यावत् । आकाशगुणः काणादैरिष्टः । वर्णव्यतिरिक्तो नादात्मा लौकिकैरिष्टः । यथोक्तं पातञ्जले महाभाष्ये "अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः" इति । वायुरूपोऽर्थवाचकः शिक्षाकारैः । पदस्फोटात्मको वाक्यस्फोटात्मकश्च वैयाकरणैरिष्टः । बौद्धैरन्यनिवर्त्तनमन्यापोहो वाचकत्वेन इष्टः ।

**निष्कर्षः –**

परम् अपरञ्चेति ज्ञानं द्विविधम् । परं ज्ञानं तावत् पारमार्थिकम् अपरं ज्ञानं तावत् यदार्थबोधनेच्छया मनोभूत्वा जठराग्निना पाकं प्राप्नोति तदा अणुरूपेण गत्वा तत्तत्स्थानेषु अभिहतः सन् वायुरूपेण परिवृत्य वैखरीरूपमादत्ते । इत्थं प्राथमिकं ज्ञानम् अणुरूपेण परिवृत्य द्वैतीयीकं रूपं प्राप्नोति ततश्च स एव अणुः स्थानेषु अभिहतः सन् वायुरूपेण परिवृत्य तार्त्तीयीकं रूपं प्राप्नोति । अतः शिक्षाकाराः वायोः परिणामः शब्द इति मन्वते जैनास्तावत् अणूनां परिणाम इति वैयाकरणाश्च ज्ञानस्य परिणाम इति जोघुष्यन्ते । समेषां तात्पर्यं तु समानमेवेत्यलं वाग्वैभवेन ।

**सन्दर्भाः –**


1. वा.प. १०७ ।
2. वा.प.१०८ ।
3. वा.प.११० ।
4. वा.प.१११ ।
5. वा.प.११२ ।
6. म.भा. ।

7. वै.सि.ल.म शक्त्याश्रयनिरूपणे ।
8. वा.प.११३ ।
9. वा.प.११४ ।
10. वा.प.११५ ।
11. पा.शि ६/९ ।
12. वा.प.११६ ।
13. वा.प.११७ ।
14. श्लो.वा. ।

**सन्दर्भग्रन्थसूची** -


1. वाक्यपदीयम्, सं. सूर्यनारायणशुक्लः चौखम्बा संस्कृत संस्थान, वाराणसी २००६ ।
2. वाक्यपदीयम्, सं. शिवशङ्कर अवस्थी, चौखम्बा विद्याभवन, वाराणसी २००६ ।
3. वैयाकरणसिद्धान्तलघुमञ्जूषा, सं. सभापतिशर्मोपाध्यायः, चौखम्बा सं.सं, वाराणसी, २०११।
4. वैयाकरणमहाभाष्यम् सं. भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली २००४ ।
5. पाणिनीयशिक्षा सं. गोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन, वाराणसी २०११ ।



**सहायकाचार्यो व्याकरणविभागे**
**श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्,**
**(आदर्शसंस्कृतमहाविद्यालयः)**
**रमौली दरभङ्गा-847201 (बिहारम्)**
**M-9939622062**
**Email – shabda-priyavrat@gmail-com**


★★★

# भावविकारसन्दर्भे भावपदार्थः

✍डॉ. दीपेशविनोदकतिरा

**( जन्यमात्रे विकारा भवन्ति । ते च षट् । षड् भावविकारा इति प्रथितिः । भावविकारघटको भावशब्दः क्रियावाची वा द्रव्यवाची वेति विचारे उभयथा आचार्याणां वचनानि उपलभ्यन्ते-इत्यत्र सन्दर्भपुरस्सरं लेखकै-र्निवेदितम्, विमृष्टञ्च । क्रिया तावत् अमूर्त्ता, अतोऽत्र विकारः असम्भवः। द्रव्यन्तु मूर्त्तिमत्, अतस्तत्र विकारः सम्भवः इति लेखाशयः । अन्ते च आत्मनि या सत्ता सैव क्रिया वा, भावो वेत्यपि विनिवेदितम् । अत्रेदं प्रतिभाति - क्रियाक्रियावतोरभेदः इति मत्वा केचिद् द्रव्यस्य, केचित् क्रियायाश्च विकारा इति प्रायो ब्रुवन्ति । क्रिया अमूर्त्ता इत्यस्याभिप्रायः अयमेव यत् पिण्डीभूतायाः तस्याः निदर्शनं न भवतीति । अवयवशः क्रियायाः प्रत्यक्षं तु भवत्येव । अतः पतञ्जलिराह - 'न शक्या पिण्डीभूता निदर्शयितुमि'ति । किञ्च अमूर्त्तत्वेऽपि वायौ वृद्धिह्रासादयः अनुभव-विषयाः। अनुभवश्चापलपितुमयोग्यः । तस्मात् जन्मादिविकाराः क्रियाणा-मेव । ताश्च क्रियाः द्रव्यमनाश्रित्य नोपलभ्यन्ते, अतो द्रव्ये एव विकारा जायन्ते इति प्रतीतिः, न तु वस्तुस्थितिः । यथा सुखदुःखादयो जीवस्य वस्तुतः, परं शरीरस्य आश्रयीभूतस्य परिलक्ष्यन्ते तद्वत् । अतो द्रव्यनिष्ठा या क्रिया, तन्निष्ठाः एव विकाराः इति विभावनीयम् । विकारश्चा-वस्थाविशेषः क्रियाणामेव, द्रव्यवत् तस्याः जन्यत्वात् जन्मादीनां तत्र सम्भवादिति । - स. )**

वार्ष्यायणिना आचार्येण 'जायते', 'अस्ति', 'विपरिणमते' इत्यादयः षड् भावविकाराः प्रोक्ताः। त इमे भावविकाराः क्रियाविकारा वा द्रव्यविकारा वा इति जिज्ञासा उदेति । निरुक्तस्य विभिन्नासु टीकासु एतद्विषये यानि मतानि उपस्थापितानि तेषु समन्वयचिकीर्षया भावपदार्थ-बुभुत्सया चात्र प्रकृतेऽध्ययने प्रवृत्तिः।

**विषयप्रवेशः -**

यास्कप्रणीते निरुक्ते वार्ष्यायणेराचार्यस्य मतं चर्चितं, "षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति" (दृश्यतां भड्कम्कर १९८५: ४४)। वाक्यपदीयेऽपि उक्तम्, "जन्मादयो विकाराः षड् भावभेदस्य योनय" इति (दृश्यतां शुक्ल

१९८४, १)। अन्यत्रापि वाक्यपदीये भावविकाराणामुल्लेखो दृश्यते । अतिप्राचीनस्य वार्ष्यायणेराचार्यस्य भावविकारसम्बद्धं मतमिदं भारतीयदर्शनपरम्परायां सुविरूढं वर्तते। अत्र 'भाव'-पदार्थजिज्ञासा जायते ।

**भावशब्दस्य व्युत्पत्तिः -**

भू - सत्तायाम् इत्यस्मात् धातोः घञ्-प्रत्यये कृते भावशब्दो निष्पन्नो भवति । सोऽयं घञ्-प्रत्ययो 'भावे' (अष्टाध्यायी ३.३.१८) इत्यनेन सूत्रेण क्रियते । तत्र काशिका, "भावे वाच्ये धातोः घञ्-प्रत्ययो भवति । पाकः, त्यागः, रागः । क्रियासामान्यवाची भवतिः । तेन अर्थनिर्देशः क्रियमाणः सर्वधातुविषयः कृतो भवति । धात्वर्थश्च धातुना एव उच्यते । यस्तस्य सिद्धता नाम धर्मः तत्र घञादयः प्रत्यया विधीयन्ते" इति (दृश्यतां काशिका पृ. सं. २८३)। कौमुद्यामपि उक्तम्, "सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्" इति (दृश्यतां शर्मा २००८: ३१३)।

**किं भावो द्रव्यम्?**

आचार्येण वार्ष्यायणिना ये भावविकारा उक्तास्ते सर्वषु द्रव्येषु दरीदृश्यन्ते । सर्वाण्यपि द्रव्याणि जायन्ते, स्थिरीभवन्ति, पुष्यन्ति, विपरिणमन्ते, वर्धन्ते, जीर्यन्ति, विनश्यन्ति च । समग्रे संसारे निरन्तरम् इयं प्रक्रिया प्रवर्तमाना इव भाति । तस्मात् नूनम् इमे द्रव्यस्य विकाराः स्युः इति भाति । अत्र द्रव्यं नाम क्रियेतरत् मूर्तं सत्त्वप्रधानं नामपदवाच्यम् । आचार्येण यास्केन चतुर्णां पदजातानां व्याख्यानवेलायां यथोक्तं, "सत्त्वप्रधानानि नामानि" इति (दृश्यतां भड्कम्कर १९८५: २३) । तत्रैव यद् मूर्तं सत्त्वभूतं भवति तद् द्रव्यम् इति प्रतिपादितम् । तत्र क्रियावाचिनो भूधातोः सिद्धावस्थाद्योतकस्य घञ्-प्रत्ययस्य योजनेन एव भावशब्दो निष्पन्न इति प्रदर्शितम् । सेयं सिद्धावस्था एव द्रव्यत्वम् । क्रिया अमूर्ता भवति। क्रिया साधनप्रक्रियाद्योतिका भवति । उक्तं च यास्केन, "पूर्वापरीभूतं (=अपरिनिष्ठितं) भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्य-पवर्गपर्यन्तम्" इति (दृश्यतां तत्रैव)। "भावप्रधानमाख्यातम्" इत्यत्र आख्यातस्य लक्षणं विवृण्वन् दुर्गाचार्यो वदति, "नामपदवाच्यार्थाश्रयक्रियाव्यङ्ग्यो भावः पाकरागत्यागाख्यः । स यत्र प्रधानं गुणभूता क्रिया तदिदं भावप्रधानम्" इति (दृश्यतां तत्रैव पृ. सं ३७)। भावः (= परिनिष्ठिता क्रिया = द्रव्यम्) प्रधानं यस्मिन् तद् आख्यातम् इति 'भावप्रधानमाख्यातम्' इत्यस्य लक्षणस्य तात्पर्यम् इति दुर्गाचार्यस्य टीकातः फलति । यतः आख्यातं (=क्रिया) भावेनैव (=द्रव्यसिद्ध्या एव) लक्ष्यते । व्याकरणमहाभाष्येऽपि उक्तम् "कृदभितो भावो द्रव्यवद्भवति" इति (दृश्यताम् कार्दोना २००८: ३६४)।

**किं भावः क्रिया?**

यस्य च भावेन भावलक्षणम् (अष्टाध्यायी २.३.३७) इत्यस्य सूत्रस्य व्याख्याने काशिकाकारो वदति, "भावः क्रिया। यस्य च भावेन यस्य च क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति" इति (दृश्यतां काशिका पृ. सं. १६२)। निरुक्तस्य व्याख्याकारेण डॉ. देवेन्द्रनाथपाण्डेयेनापि उक्तम्, "भवतीति भावः। भावः क्रिया" इति (दश्यताम् पाण्डेय

२०११: ७)। निरुक्तव्याख्याकारेण मुकुन्दझा बक्षी महाभागेनापि उक्तम्, "भावो भावना उत्पादना। सा च असत्त्वभूतो धात्वर्थोऽत्र गृह्यते । इयमेव साध्यत्वेनाभिधीयमाना क्रियेत्युच्यते" इति (दृश्यतां बक्षी १९३०: ४)

**उभयथा भावशब्दस्य अर्थः -**

के. वी. अभ्यङ्करमहाभागेन 'अ डिक्शनरी अव् संस्कृत ग्राम' इत्यस्मिन् स्वीये ग्रन्थे भावशब्दस्य इमे अर्था उक्ताः -

1. Becoming (क्रिया'), Eñistence (द्रव्यम्')
2. Activity (साध्या') as opposed to instruments (साधनानि = कारकाणि')
3. Completed action which is shown not by verb but by verbal derivative] noun (द्रव्यम् - कृदभिहितो भावः')

इत्थम् अभ्यङ्करमहाभागेन भावशब्दस्य उभयाभिप्रायकाः अर्थाः दत्ताः लक्ष्यन्ते (दृश्यताम् अभ्यङ्कर (१९६१: २७०)। अतो वार्ष्यायणिना आचार्येण ये भावविकारा उक्तास्ते क्रियाविकारा वा द्रव्यविकारा वा इति शङ्कोत्पद्यते ।

**किं भावविकाराः क्रियाविकाराः?**

डॉ. देवेन्द्रनाथपाण्डेयमहाभागेन स्वीयव्याख्यायां स्पष्टमुक्तम् - "भवतीति भावः, भवनं वा भावः = क्रिया । तस्य भावस्य विकारः = भावविकारः" इति । हिन्दीव्याख्यायामपि तेनोक्तम्, "छह प्रकार के क्रियाविकार होते हैं" इति (दृश्यताम् पाण्डेय २०११: ७)। निरुक्तस्य प्राचीन आङ्ग्लव्याख्याकारो लक्ष्मणसरूपमहाभागो भावशब्दस्य 'becoming' इति अनुवादं सत्त्वशब्दस्य च 'इमपदह' इति अनुवादं कृत्वा ब्रूते, "According to Vārṣyāyaṇi there are siñ modifications of becoming..." (दृश्यतां सरूप २००२: ६, ७) इत्थं सर्वेऽपि इमे व्याख्याकारा भावविकाराः क्रियाविकारा एव इति अभिप्रयन्ति ।

**किं भावविकारा द्रव्यविकाराः?**

क्रिया तु अमूर्ता इति यास्केनैव उक्तम् । अतस्तस्यां विकाराः कुतः सम्भवेयुः। विकारा द्रव्याश्रितक्रियाद्वारा एव सम्भवन्ति इति तु निश्चप्रचम् । किन्तु त इमे द्रव्येषु परिलक्ष्यन्ते । चन्द्रमणि विद्यालङ्कार पालिरत्न महोदयः स्वीयायां हिन्दीटीकायां स्पष्टं लिखति, "किसी उत्पन्न पदार्थ में ६ प्रकार के क्रिया-विकार होते हैं" इति (दृश्यतां पालिरत्न १९८१: १५)। अभ्यङ्कर महाभागो भावविकारशब्दं विवृण्वन् लिखति, "Siñ modes of Eñistence" (दृश्यताम् अभ्यङ्कर १९६१: २७१)। ततो द्रव्यविकारा एव इम इति इङ्गितं भवति। 'जन्मादयो विकाराः षड्भावभेदस्य योनयः' इति वाक्यपदीयकारिकां (ब्रह्मकाण्डे ३) विवृण्वन् मराठीटीकाकारो वा. बा. भागवत महाभागो लिखति, "जन्म वगैरे सहा विकार पदार्थांच्या (भाव') वेगवेगळेपणाचीं कारणे होत"। अन्यत्रापि स लिखति, "पदार्थांच्या सहा अवस्था अस्तात" (दृश्यतां भागवत १९७२: १५, १७)। पदार्थशब्दो द्रव्यपरक एव प्रायो भवति। मुकुन्दझा बक्षी महाभागेन इदमुच्यते,

"स च पुनरुभयात्मा भावः, कार्यात्मा कारणात्मा च। तयोर्यः कार्यात्मा तमधिकृत्योक्तं क्रियानिर्वर्त्यो योऽर्थः (फललक्षणः) सः क्रियैव वा भावः (अत्र क्रियते या सा क्रिया इति व्युत्पत्तिः अवगन्तव्या इति लेखकेन पादटिप्पण्याम् उक्तम्) इति । इदानीं कारणात्मा भावो निरूप्यते (षड् भावविकाराः भवन्ति.. इत्यादिना')..." इत्यादि। अत्र 'क्रियते अनया इति क्रिया' इत्येवं करणसाधनः क्रियाशब्दः इति तेन उच्यते। (दृश्यतां बक्षी १९३०: ९)। करणव्युत्पत्त्याः स्वीकारेण क्रियायाः साधनत्वेन द्रव्यपरकः क्रियाशब्दः भवति। इत्थं भावविकारा द्रव्यविकारा एव इति फलितम् ।

**विमर्शः**

भावविकाराणां सम्बन्धः क्रियाभिरपि स्यात् द्रव्यैरपि इति पूर्वत्र नैकधा प्रदर्शितम् । प्रायः तस्मादेव भर्तृहरिणा वाक्यपदीये भावविकारा यथा क्रियासमुद्देशे चर्चिताः तथा जातिसमुद्देशे अपि। अभ्यङ्करमहाभागेन स्वीये ग्रन्थे 'भावविकार'- शब्दं विवृण्वता यल्लिखितं तत् साकल्येन इत्थं वर्तते, 'kinds of verbal activity* which are described to be siñ in number- Siñ modes of eñistence (सत्ता - द्रव्यम्)...eñplained philosophically by Bhartrhari as a mere appearance of Shabdabrahman or Satta when one of its own power & the time factor is superimposed on it and as a result of that superimposition it appears as a process' (दृश्यताम् अभ्यङ्कर १९६१: २७१)। तात्पर्यं यत् शब्दब्रह्मरूपायां सत्तायाम् इमे विकारा अवास्तविका अपि भासन्ते। ते च तदा भासन्ते यदा तस्मिन् शब्दब्रह्मणि कालशक्तेरारोपः क्रियते । 'अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः। जन्मादयो विकाराः षड्भावभेदस्य योनयः ॥* (वाक्यपदीये ब्रह्मकाण्डे कारिका ३) इत्यस्य पद्यस्य स्वोपज्ञटीकायां भर्तृहरिः इत्थं लिलेख - तत्रैवमभूत् न अभूत् इति अपूर्वापरस्य भावस्य पौर्वापर्यव्यवस्थाविकल्पे सति जन्मादयः विकाराः षट् परिणामानां सत्ताविकाराणां योनय उपप्लवन्ते (=विक्षेपात् परिलक्ष्यन्ते') (दृश्यतां भागवत १९७२: १५)। स्वोपज्ञटीकास्थ- विकल्पशब्दो योगशास्त्रे स्पष्टीकृतः, 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' (योगसूत्रम् - १.९) इत्येवम् । भावः अपूर्वापरः । किन्तु तत्र पौर्वापर्यव्यवस्थाया विकल्पो भवति । पौर्वापर्यं कालसंकल्प- नास्वीकारे सति जायते । कालश्च क्रियोपाधिर्भवति । इत्थं भावः साक्षात् शब्दब्रह्मणोऽभिन्नं तत्त्वं, तत्र अनुभूयमानो विकारः क्रियारूपविकल्पमूलकः चेति फलितम् । षड्भावविकाराणां व्याख्यानारम्भे निरुक्तव्याख्याकारेण दुर्गेण उक्तम्, "स च पुनरुभयात्मा भावः। कार्यात्मा कारणात्मा च । तयोर्यः कार्यात्मा तमधिकृत्योक्तं क्रियानिर्वर्त्यो योऽर्थः स भावः क्रियैव वा भाव इति । इदानीं कारणात्मा भावो निरूप्यते । कथम् । क्रियाद्रव्ययोः स्वात्मस्थो विशेषः कार्यात्मप्रध्वस्तयोः पुरुषोपभोगसन्तानोपक्षये कार्यात्मभावातीतो येनात्मभावेन भवनमात्राभिसंबन्धिना प्रलयकालेऽवतिष्ठते सोऽत्यन्ताविनाशधर्मा आत्मा भाव इत्युच्यते" इति (दृश्यतां भङ्कम्कर १९८५: ५२)। पुनश्चोक्तं, "सन्मात्रं भावलिङ्गं स्यात्" इति (दृश्यतां तत्रैव पृ. सं. ५४)। यदुक्तं यास्केन

'भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि' इति, तत्र यो भावशब्दः तस्मिन् यो भू-धातुः वर्तते तस्य पाणिनिना 'सत्तायाम्' इति अर्थो निर्दिष्टो वर्तते । सत्ता सत्त्वं चेति अनर्थान्तरम् । इत्थं सत्ता, अस्ति, भावः, भवति इत्येतेषु यः सुप्-तिङोः भेदो वर्तते स शब्दमर्यादामात्रम् । एते सर्वे समानार्थका भावविकारसन्दर्भे भावपदवाच्या एव। भर्तृहरेः कारिकाया भावार्थं स्पष्टयन् जे. एम्. शुक्लमहोदयो यदाह तदस्मिन् सन्दर्भे स्थाने एव ।

**अन्येत्वात्मनि या सत्ता सा क्रिया कैश्चिदिष्यते।**
**भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः ॥**

(वाक्यपदीये क्रियासमुद्देशे २४)

ज. मो. शुक्ल - ... અવિચ્છિન્ન વ્યાકરણપરંપરા ભાવને ધાતુના અર્થ તરીકે જણાવે છે- સત્તા ધાત્વર્થ પણ છે અને પ્રતિપદિકાર્થ પણ છે- તેથી સત્તાને કોઈ વખત સત્તા કહે છે] તો કોઈ વખત ભાવ કહે છે- આ મતને સત્તાદ્વૈત કહે છે- (दृश्यतां शुक्ल १९८४: ३५८)।

सत्ता धात्वर्थोऽपि प्रातिपदिकार्थोऽपि । सेयं सत्तैव कदाचित् भावशब्देनाभिधीयते । इदं सत्ताद्वैतमतं वर्तते इति शुक्लमहोदयस्य अभिप्राय इति ।

**ग्रन्थसूची**

1. अभ्यङ्कर, का. वा., (१९६१) अ डिक्श्नरी अव् संस्कृत ग्रामर. बरोडा : ओरिएन्टल इन्स्टिट्यूट ।
2. जिज्ञासु, ब्रह्मदत्त (१९६४) अष्टाध्यायीभाष्यप्रथमावृत्ति [प्रथम-तृतीयाध्यायात्मक प्रथम भाग] ।
3. सोनिपत : रामलाल कपूर ट्रस्ट [दशमसंस्करणम् २००८] ।
4. पाण्डेय, दे. ना. (२०११) निरुक्तम् (प्रथमाध्यायः) जयपुर : हन्सा प्रकाशन ।
5. पालिरत्न, चन्द्रमणि विद्यालङ्कार (१९८१) वेदार्थ दीपक निरुक्त भाष्य. दिल्ली : आर्ष कन्या गुरुकुल ।
6. बक्षी, मुकुन्दझा (१९३०) श्रीमद्यास्कमुनिप्रणीतम् (काश्यपप्रजापतिकृतनिघण्टु-भाष्य-रूपम्) निरुक्तं निरुक्तविवृत्त्या समुपेतम्. मुम्बयी : निर्णयसागरमुद्रणालयः ।
7. भड्कम्कर, ह. म. (१९८५) श्रीमद्यास्कप्रणीतं निरुक्तं निघण्टुपाठसमुपेतं दुर्गाचार्यकृत-ऋज्वर्थाख्यवृत्या समवेतम्. पूना : भाण्डारकरप्राच्यविद्यामन्दिरम्. [प्रथममुद्रणम् - १९१८] ।
8. भागवत, वा. बा. (१९७२)वाक्यपदीयं स्वोपज्ञटीकासहितं मराठी-अनुवादयुक्तम्. पुणे : टिळक महाराष्ट्र विद्यापीठ ।
9. शर्मा गिरिधर, शर्मा परमेश्वरानन्द (सम्पा.) (२००८) श्रीभट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी (कृदन्तप्रभृतिसमाप्तिपर्यन्ता) श्रीवासुदेवदीक्षितप्रणीतया बाल-

मनोरमया श्रीज्ञानेन्द्रसरस्वतीविरचितया तत्त्वबोधिन्या च समलङ्कृता. दिल्ली : मोतिलाल बनारसीदास. [प्रथममुद्रणम् ११९७९] ।

10. शर्मा, नत्थुराम (१९९९) श्रीपदबोधिनीनाम्नी संस्कृतटीका तथा रहस्यदीपिका गुजराती-टीका सहित श्रीपातञ्जलयोगदर्शन. बिलखा : आनन्दाश्रम. [प्रथममुद्रणं १९५३] ।
11. शुक्ल, ज. मो. (१९८४) महावैयाकरणभर्तृहरिविरचितं वाक्यपदीयं गुर्जरभाषानुवाद-टिप्पणसहितम्. अहमदाबाद : लालाभाई दल्पतभाई भारतीय संस्कृति विद्यामन्दिर ।
12. सरूप, लक्ष्मण (२००२) श्रीयास्काचार्यप्रणीतं शब्दव्युत्पत्ति - भाषाविज्ञानार्थविज्ञान - विषयकं निघण्टुसमन्वितं निरुक्तम्. दिल्ली : मोतिलाल बनारसीदास. [प्रथमसंस्करणम् १९२०-२७] ।
13. ई-टेक्स्ट कार्दोना, जी. (टङ्कणम्)(२००८)पतञ्जलिः व्याकरणमहाभाष्य. (मूलं फ्रान्झ कील होन्, संस्करणम् - का. वा. अभ्यङ्कर) ।
14. काशिका पाणिनीयाष्टाध्यायीसूत्रवृत्तिः काशिका न्यास - पदमञ्जरी - भावबोधिनीसहिता. राष्ट्रियसंस्कृतसंस्थानम् राजीवगान्धिपरिसरः, शृङ्गेरीद्वारा सज्जीकृता ।

**सहायकाचार्यः (व्याकरणम्),**
**श्रीसोमनाथसंस्कृतयुनिवर्सिटी,**
**वेरावलम्, गुजरातम्।**
**dipesh.katira@gmail.com**

★★★

# वाक्यपदीयस्य ब्रह्मकाण्डे जगतः शब्दपरिणामत्वम्

✍डॉ. शरदचन्द्रसाहुः

**(निबन्धेऽत्र वाक्यपदीयस्थद्वादशकारिकाः, सम्बद्धप्रमाणस्वरूपमन्त्राणां चतुष्टयं च समाश्रित्य गभीरं वाक्तत्त्वमुद्घाटितम् । वाच आधिदैविकमाधिभोतिकमैहलौकिकं पारलौकिकं च स्वरूपं लेखेनानेन व्यक्तं भवति । व्याकरणदर्शने वागेव सर्वेषां मूलम् । अतीतानागतानां सतामसताञ्च समेषामस्तित्वं वाचि प्रतिष्ठितम् । यत्रान्यान्यानि कारणानि कार्यमुत्पादयितुं निर्बलानि तत्रापि वाक्तत्त्वं सर्वमुत्पादयितुं प्रभुः । अनया रीत्यैव सङ्कल्पमात्रादेव वस्तुनः सिद्धिरिति 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावती' त्यादीनामाशयो ज्ञेयः । किञ्च, वाक्तत्त्वातिरिक्तं किमपि भिन्नं तत्त्वं नोपलभ्यते । अत आह हरिः - भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः । तथाहि वागेव भोक्त्री, वागेव भोक्तव्या, वागेव च भोगरूपेति लेखस्यास्य हृदयम् । - स.)**

श्रीमता भर्तृहरिणा विरचितस्य वाक्यपदीयस्य ब्रह्मकाण्डस्य "जगतः शब्दपरिणामत्वम्" इति विषयमवलम्ब्य शोधपत्रं प्रस्तौमि । प्रकरणेऽस्मिन् शब्दब्रह्मणः स्वरूपं विवेचयन् प्रथमकारिकायां शब्दतत्वविषये निगदितम् - अनादिनिधनम्, अक्षरं, जगत्कारणं नित्यं चेतनञ्च ।

**अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतोयतः ॥**[1]

शब्दब्रह्मणः कालशक्त्या जगदिदं विवर्तते । तस्याभिव्यक्तिः नियन्त्र्यते च । अनेन विज्ञायते यत् एकस्मिन् काले अनेकानि कर्माणि भवितुं नार्हन्ति । शब्दैरेव संसारस्य कार्याणि प्रचलन्ति । अतः शब्दपरिणामो जगदिति कथ्यते । शब्दब्रह्मणः प्राप्तिरुपायो वेदः । अनेकैरङ्गैरुपाङ्गैश्च संयुक्तस्य वेदस्य प्रधानम् अङ्गं व्याकरणं वर्तते । तेन शब्दाः व्युत्पाद्यन्ते । तैः शब्दैः जगतः परिणामत्वं दरीदृश्यते । ते शब्दाः वेदेषु निगदिताः सन्ति । वेदेभ्यः प्रथमं विश्वमेतद् व्यवर्तत । उक्तञ्च वाक्यपदीये-

**शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।**
**छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥**[2]

धर्मशास्त्रज्ञाः वेदविदश्च प्रवदन्ति यत् कल्पारम्भे विश्वमिदं वेदेभ्यः प्रादूरभूत् । वेदाः शब्दमयाः, अतो वक्तुं प्रभवामः जगदखिलं शब्दस्य परिणामोऽस्ति ।

अन्ये वैशेषिकाः दार्शनिकाश्च विवेचयन्ति यत् कार्येषु कारणधर्मसमन्वयं दृष्ट्वा व्यावृत्तभेदं सूक्ष्मम् असंवेद्यं सर्वविकारशक्त्यनुगतं प्रत्यस्तमितव्यक्तिरूपम् अणुग्रामं प्रधानशक्तिसमूहम् अविद्याकारणं जन्मपरिणामाऽसंसर्गं विवर्त्तं व्यवस्थापयन्ति ।

तथैव वेदेषु संहृतभोग्यभोक्तृशक्तेर्वागात्मनो बहुधा कारणत्वम् आम्नातम् – "स उ एवैष ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषः । पुरुषो वैलोकः । पुरुषो यज्ञः । तस्यैता लोकपृणास्तिस्र आहुतयस्ता एव त्र्याल्लिखिता वै त्रयो लोकाः" इति ।

अत्र पुरुषपदेन पुरुषाधिष्ठानत्वात् शरीरमुच्यते । यदेतत् विराट्पुरुषस्य विश्वात्मकं शरीरं दृश्यते, स एव ऋङ्मयो यजुर्मयः साममयः । अत्र ऋग्यजुःसामपदैः तदुपादानभूतं सूक्ष्मं वाक्तत्वमुच्यते, तस्यैव विश्वात्मकवैराजशरीरोपादानत्वसम्भवात् ।

पुरुषसूक्तेऽप्युक्तम्–

**तस्माद्यज्ञात्सर्वहुतऽऋचःसामानि जज्ञिरे।**
**छन्दांसि जज्ञिरेत स्माद्यजुस्तस्मादजायत ॥**[3]

भूर्भुवः स्वरात्मको लोकः पुरुष एव भोग्यत्वादित्यर्थः, भोक्तृभोग्ययोरभेदोपचारात् । यस्तु लोकसाधनं यज्ञं सोऽपि पुरुष एव, पुरुषसाध्यत्वात्, साध्यसाधनयोरभेदोपचारात् । तस्य यज्ञस्य एतास्तिस्र आहुतयो या ऋग्यजुःसाममन्त्रैर्दीयन्ते ।

तदेवं भोक्तृभोग्यभोगसाधनरूपस्य विश्वस्य वैराजपुरुषरूपत्वेन ऋग्यजुः साममयत्वोक्त्या सूक्ष्मवाक्तत्त्वोपादानकत्वं मन्त्रेणानेनोक्तम् ।

1. वाक्यपदीयम् – काण्डम् –१, श्लोकः–१
2. वाक्यपदीम् – काण्डम् –१, श्लोकः –१२०
3. शुक्लयजुर्वेदस्य पुरुषसूक्तम् – अध्यायः–३१, मन्त्रः –७

तथाऽस्मिन्नर्थेऽन्योऽपि मन्त्रो वर्तते–"एष वै छन्दस्यः साममयः प्रथमोऽक्षन्वैराजः पुरुषो योऽन्नमसृजत तस्मात्पशवोऽन्वजायन्त । पशुभ्यो वनस्पतयो वनस्पतिभ्योऽग्निः । तस्मादाहुर्न दारुपात्रेण दुह्यादग्निर्वा एष दारुपात्रम् । तस्मान्न दारुपात्रेण दुह्यते" ।

योऽन्नं पृथिवी व्रीहियवादिकं वा असृजत, एष एव छन्दोभ्यो नानाविधाभ्यो गीतिभ्यो हितः छन्दस्यः सामस्वरूपः । अत्र सामपदेन सामोपादानभूतं सूक्ष्मं वाक्तत्वमुच्यते । प्रथमः सर्गादौ वर्तमानः, अक्षन् क्षतिरहितोऽविनाशी, यद्वा उक्षन् वृषभरूपः, वाक्तत्वस्य वृषभत्वेन निरूपणात्–

**चत्वारि शृङ्गा त्रयोऽअस्य पादाद्वे शीर्षे सप्तहस्तासोऽअस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥**[4]

अस्य शब्दवृषभस्यालौकिकस्य चत्वारि शृङ्गाणि नामाख्यातोपसर्गनिपातरूपाणि, परा–पश्यन्ती–मध्यमावैखरीरूपाणि वा । अस्य त्रयः पादा भूतभविष्यद्वर्तमानकालरूपाः, तैर्ह्ययं प्रतिष्ठते शब्दवृषभः । द्वे शीर्षे नित्यः कार्यश्चेति शब्दद्वयं शीर्षस्थानीयम् । सप्त विभक्तयः प्रथमाद्या अस्य हस्ताः । त्रिधा बद्ध उरसि कण्ठे शिरसि च त्रिषु स्थानेषु बद्धः, स्थानत्रयेणोच्चार्यत्वात् ।

अन्यषामपि स्थानानां त्रिष्वेवान्तर्भावः । वृषभः प्रयोक्तुर्ज्ञातुश्च कामानां वर्षणात् । रोरवीति भृशं शब्दं करोति । महान् देवः स्वप्रकाशचिद्रूपः शब्दवृषभो मरणधर्मवतो मनुष्यान् आविवेश । व्याकरणज्ञानजन्येन शब्दरूपमहादेवज्ञानेन महता देवेन सह अस्माकम् ऐक्यं सम्पन्नं स्यादिति ।

वैराजः पुरुषः विश्वरूपतया उपवर्णितत्वात् । तस्माद् गवादयोऽजायन्त, पशुभ्यो मूत्रशकृदादिद्वारा वनस्पतयोऽन्वजायन्त । वनस्पतिभ्यो वातेन प्रतिहन्यमानेभ्योऽग्निरजायत ।

अत्र मन्त्रे वाक्तत्वस्य वैराजपुरुषरूपस्य अन्नपशुवनस्पतिस्रष्ट्टत्वम् उक्तम् । इदञ्च सर्व-सृष्ट्युपलक्षणम् ।

उक्तञ्च ऋग्वेदे-

**इन्द्राच्छन्दः प्रथमं प्रास्यदन्नं तस्मादिमेनामरूपे विषूची।**
**नामप्राणाच्छन्दसोरूपमुत्पन्नमेकं छन्दो बहुधा चाकशीति ॥**

परमैश्वर्यसम्पन्नाद् मायोपहितात् आत्मनः सर्गादौ अन्नं नामरूपात्मकं यत्स्थूलं भोग्यं तस्य यत्सूक्ष्मं स्वरूपं बुद्धौ इन्द्रियक्रमेण लयप्राप्त्याऽविभक्तम्, तदप्यन्नम् तत्तादात्म्यापन्ना बुद्धिरत्र अन्नं कथ्यते । महत्तत्वरूपा अविभक्तनामरूपात्मिका सैव मायोपहिते परमात्मनि अविभागं गता । मायायाम् अविभागप्राप्त्या सैव परमेश्वरात् प्रविभक्ता समुत्पन्नाऽभूत् ।

कथं नामरूपयोः उत्पत्तिमार्गौ भिन्नौ इत्यपेक्षायामाह - नाम प्राणात् तत्तत्स्थानेषु अभिहतात् प्राविभज्यत । विवक्षाजनितप्रयत्नवद् बुद्धितत्त्वं प्राणमाविष्टं भवति, प्रयत्नप्रेरितश्च प्राण ऊर्ध्वमायन् तत्तत्स्थानेऽभिधत्ते शब्दं जनयति । छन्दसस्तु बुद्धितत्वात् तत्तदिन्द्रियाद्भवक्रमेण अर्थो जातः । तदेवम् एकमेव छन्दो बुद्धितत्त्वं वाच्यवाचकोभयरूपेण प्रविभागं प्राप्य जगति प्रकाशते ।

तथा पुनराह-

**वागेव विश्वा भुवनानि जज्ञे वा च इत्सर्वममृतं यच्च मर्त्यम् ।**
**चद्वाग्बुभुजे वागुवाच पुरुत्रावाचोनपदं यच्चनाह ॥**

वागेव बुद्ध्यात्मना स्थितं सूक्ष्मं वाक्तत्वमेव सर्वाणि भुवनानि वाच्यवाचकोभयात्मकानि जाता, इन्द्रियाणि प्राणञ्च द्वारीकृत्य वाच एव प्रवर्तते । यदमृतम् आकल्पान्तं स्थायि यच्च मर्त्यं मध्ये एव विनाशि कार्यजातम् तज्जज्ञे । न केवलं वाग् मर्त्यामर्त्योभयरूपभोग्यात्मनैव जाता, किन्तु भोक्तृरूपेण वक्तृरूपेणापि जाता । अथ वागेव आन्तरज्ञातृरूपेण अवस्थिता बहुभिः प्रकारैः भोक्त्री वर्तते । वक्त्री प्राणं द्वारीकृत्य शब्दानां बहुधा प्रयाक्त्री । यत्किञ्चिदपि जनः वक्ति तत्सर्वं शब्दाभिधेयम् अर्थजातं वाचो न भिन्नम्, किन्तु वागात्मकमेव, वागुपादानकत्वादिति ।

१. ऋग्वेदः- मण्डलम् -४, सूक्तम्-५८, ऋक्-३ ।

विश्वजनिका शक्तिःशब्दाश्रितैव-

**शब्दाष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी।**
**यन्नेत्र प्रतिभात्मायं भेदरूपः प्रतीयते ॥**[१]

स च संसृष्टप्राप्तशक्तिविवर्तः पृथिवीकललन्यग्रोधधानादिवद् भेदमुपगृह्णाति, भेदानुरागमात्रं च परस्मिन् अभेदे शब्दात्मनि सन्निवेशयति । तत्र केषाञ्चिद् आकृतयः सूक्ष्मशब्दाधिष्ठाननिबन्धनाः । ताः आत्माभिव्यक्तिम् अधिष्ठानपरिणामेन प्रतिलभमाना वाच्यवाचकभावेन व्यवतिष्ठन्ते । यथापरेषाम् इन्द्रियेषु विषयमात्रशक्तयः प्रतिलयं गच्छन्ति, तथेन्द्रियमात्राशक्तयो बुद्धिषु, बुद्धिमात्रशक्तयः प्रतिसंहृतक्रमे वागात्मनि ।

तथा हि – पृथिवी यथाक्रमेणैव घटादिकार्यरूपतां धत्ते, न तु युगपत् । शुक्रशोणितयोः अवस्थाविशेषरूपं कललं यथा क्रमेणैव कायरूपतां बिभर्ति । न्यग्रोधधाना यथाऽङ्कुरादिक्रमेणैव न्यग्रोधतरुरूपताम् आसादयति । एवं प्रागुक्तरीत्या तत्तत्स्थानेषु अभिहतो वायुर्वर्णपदध्वनिक्रमेणैव वाक्यध्वनिरूपताम् आप्नोति, न युगपत् ।

वाच्यवाचकरूपस्यास्य विश्वस्य निबन्धनी वाच्यवाचकभावनियामिका 'अयमेव शब्दोऽस्यैवार्थस्य वाचकः' इति नियमप्रयोजिका शक्तिः शब्देष्वेवाश्रिताः । यन्नेत्र इत्यत्र नेत्रपदस्य परिच्छेदोपाये लक्षणा, प्रकाशसाधनत्वरूप – नेत्रसाधर्म्यात् शब्दशक्तेः । या शब्दशक्तेर्नेत्रं परिच्छेदोपायो यस्य वाच्यस्य पदार्थजातस्य, सोऽयं यन्नेत्रः प्रयुक्तशब्दशक्तिप्रकाश्योऽयं वाच्यः पदार्थः बुद्धौ आत्मा स्वरूपं यस्य गोचर्यत, बुद्धिविषयः सन् इति यावत् । भेदरूपो गवादिरूपवाच्यभेदभिन्नः प्रतीयते । न हि तदर्थविषयकशक्तिविशिष्टेन शब्देन विना गवादिपदार्थविषया प्रतिभा उत्पद्यत इत्यवधेयम् ।

सा चेयं स्वप्नप्रबोधप्रवृत्तिः प्रविभक्तपुरुषानुकारा महत्यपि वाक्तत्वे कारणे नित्यम् अवस्थिता । तथाऽपरेऽप्याहुः-

**वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तनोति।**
**वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ॥**

केषाञ्चिन्मते गवादिशब्दानां गोशब्दत्वादिरूपा जातयो वाचकाः, गवादिपदार्थगताश्च गोत्वादिजातयो वाच्याः। तदेतद् उभयं स्वनिबन्धनत्वेन स्वज्ञापकहेतुत्वेन सूक्ष्मं वाक्तत्वं बुद्धिस्थमेव वाच्यवाचकोभयजात्याश्रयाणां शब्दनित्यत्वानित्यत्वपक्षभेदेन विवर्तोपादानतया परिणाम्युपादानतया वाऽधिष्ठानभूतम् आश्रयते । यतो वाच्या वाचिकाश्च गोत्वादयो गोशब्दत्वादयश्च जातयः स्वाश्रयाणाम् उत्पत्तौ अनभिव्यक्ताः, न वाच्यत्वेन, न वा वाचकत्वेन व्यवहारगोचराः । अतः स्वाभिव्यक्तये स्वाश्रयाणाम् उत्पत्तिम् अपेक्षमाणाः सूक्ष्मं वाक्तत्वं नित्यत्वपक्षे विवर्तोपादानतया, अनित्यत्वपक्षे च परिणाम्युपादानतयाऽपेक्षन्त इत्येवं सूक्ष्मेषु "शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी" इत्युक्तम् ।

विषयेऽस्मिन् प्रश्नो जायते कथमस्य वाच्यवाचकभेदभिन्नस्य विश्वस्य निबन्धनी = जनिका शक्तिः सूक्ष्मे वाक्तत्वे एवाश्रिता ? केन क्रमेण च सूक्ष्मस्य प्रतिसंहृतक्रमस्य वागात्मनो वाच्यवाचकोभयरूपेण विवर्तः परिणामो वेति जिज्ञासा चेत् श्रूयताम्, शब्दसर्वस्वं श्रुत्वा चैवावधार्यताम् । इदं हि सर्वं वाच्यवाचकोभयात्मकं विषयजातं प्रविनश्यत् शक्तिरूपेण

स्वस्वग्राहकेन्द्रियेषु प्रविलयं गच्छति, तादृशशक्तिमच्चेन्द्रियजातं प्रविनश्यच्छक्तिरूपेण बुद्धिषु वृत्तिभेदभिन्नासु लयं याति, तादृश्यो बुद्धयश्च प्रविनश्यन्त्यः शक्तिरूपेण प्रतिसंहृतक्रमे सूक्ष्मे वाक्तत्वे प्रविलयं गच्छन्तीति एवमस्य विश्वस्य सूक्ष्मे वाक्तत्व एव प्रविलयः ।

एतद्वैपरीत्येन च सर्गकाले सूक्ष्माद् वाक्तत्वाद् बुद्धीनां वृत्तिभिन्नानाम् उद्भवः, बुद्धिभ्य इन्द्रियाणाम्, इन्द्रियेभ्यो विषयाणां वाच्यवाचकोभयात्मनामिति रीत्या विश्वस्य सर्गलयाधिष्ठानत्वाद् उपादानकारणं सूक्ष्मं प्रतिसंहृतक्रमं वाक्तत्वं परम् ।

सा चेयं शब्दब्रह्मणः सूक्ष्मस्य वाक्तत्वस्य दैनन्दिने स्वप्ने सर्वप्रलये वृत्तिः, प्रबोधे च प्रागुक्तक्रमेण सर्वसर्गे वृत्तिः, सम्प्रसादे = निद्रायाम् अविभागमुपागतानां पुरुषाणां प्रबोधे चैत्रमैत्रादिपुरुषप्रविभागानुकारिणी यद्यपि महती मायारूपा, तथापि वाक्तत्व एव परब्रह्मस्वरूपे जगत्कारणे नित्यम् अवस्थिता ।

1.वाक्यपदीयम् - काण्डम् - १, श्लोकः - ११८

लोके सर्वा इतिकर्तव्यता शब्दाश्रितैव-

**इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।**
**यां पूर्वाहितसंस्कारोबालोऽपिप्रतिपद्यत ।।**[६]

तदेवं महत्तत्त्वात्मनाऽवस्थितस्य शब्दस्य विश्वोपादानत्वं त्रयीरूपेणावस्थितस्य तस्य विश्वनिमित्तत्वञ्च यथाक्रमम् 'शब्दस्य परिणामोऽयम्' इति, 'छन्दोभ्य एव प्रथमम्' इति वाक्याभ्याम् आख्याय 'इदमेव कर्तव्यम्' इति इतिकर्तव्यताज्ञानेऽपि शब्दस्यैव निमित्तत्वम्, शब्दं विना सर्वेषां कार्याणाम् इतिकर्तव्यताया ज्ञापनासम्भवात् ।

सर्वोऽपि लोके इतिकर्तव्यता कर्तव्यस्य प्रकारः । लोके शब्दप्रकल्पितेन वस्तुना व्यवहारः, न तु सतापि शब्दागोचरणेति दर्शनादिति भावः । कथं तर्हि अप्रवृत्तवाग्व्यवहाराणां बालानाम् इतिकर्तव्यताज्ञानम्, तेऽपि स्ववयस्यैः सह किञ्चित्कुर्वन्त्येव इत्याशङ्क्याह - 'यां पूर्वाहितसंस्कारो बालोऽपीति' ।

पूर्वजन्मनि जनितः शब्दविषयकः संस्कारः यस्य तथाभूतः सः प्राग्भवीयशब्द-भावनासम्पन्नः अप्रवृत्तव्यक्तवाग्व्यवहारो बालोऽपि स्ववयस्यबालशब्दाद् अव्यक्तादेव क्रीडनादि-कार्येतिकर्तव्यतां प्रतिपद्यते ।

तद्यथा- पूर्वजन्मसमुद्भूतमनुष्यजात्युचितचेष्टानुभवजनिताः संस्काराः अस्मिन्नपि जन्मन्यनु वर्तन्ते, यतोऽशिक्षितस्यापि बालस्य जातमात्रस्य मनुष्यजात्युचितचेष्टाः स्वमातरम् उद्दिश्य प्रवर्तन्ते। एवं पूर्वजन्मकृतकर्मार्जितसंस्काराश्च धर्माधर्मरूपा अस्मिन् जन्मनि भोगप्रदा अनुवर्तन्ते ।

यतः स्पष्टवाचां व्यवहारकाले शब्दपूर्विकैव इतिकर्तव्यताप्रतिपत्तिर्दृष्टा, अतोऽव्यक्तवाचां बालानामपि क्रीडादिरूपव्यवहारकाले पूर्वजन्मसञ्जातशब्दसंस्काराररूढशब्दानुगमेन अनाख्येयाऽव्य-क्तवयस्यबालोच्चारित - शब्दपूर्विकैव क्रीडादीतिकर्तव्यता प्रतिपत्तिरिति । बालस्य क्रीडादीति कर्तव्यताप्रतिपत्तिनिबन्धनभूतोऽव्यक्तः शब्दः पूर्वजन्मसमुद्भूतशब्दबुद्धिजनितसंस्कारानुगतोऽनुवर्तते,

नासौ आख्यातुं शक्यते बालेन । ये वाचम् उच्चारयितुं समर्थास्ते शब्दार्थं प्रतिपद्यन्ते, तत्र निरूपयितुं शक्नुवन्ति, शब्दार्थोऽयमस्येति । बालानां तु स्वजातीयेषु बालेषु अभिलापभेदात् भिद्यन्तेऽभिलापाः, तांश्च न बाल आख्यातुं शक्नोति, इदमस्य वाच्यमिति । तदेवं शब्दात् एव इतिकर्तव्यतारूपमर्थं प्रतिपद्यते बालोऽपीति सिद्धम् ।

सर्वस्य ज्ञानस्य शब्दानुविद्धत्वम्-

**न सोऽस्ति प्रत्ययो लोके यःशब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥**[७]

शब्दोत्पत्तेः प्राग् वक्तृबुद्धौ अभिनिर्वृत्तं शब्दभावनानुविद्धं ज्ञानं शब्दोत्पादनक्रमेण श्रोतृबुद्धिस्थस्य शब्दभावनानुविद्धस्य ज्ञानस्य कारणम्, ततश्च तस्माद् वक्तृबुद्धिस्थाद् ज्ञानाद् अपृथग्भूता शब्दभावनाऽपि श्रोतृबुद्धिस्थस्य ज्ञानस्य कारणम्, यतश्च कार्येऽपि श्रोतृबुद्धिस्थे ज्ञाने शब्दभावनाऽस्तीति शब्दभावनाविशिष्टस्य श्रोतृबुद्धिस्थस्य ज्ञानस्य कार्यत्वेन शब्दभावनापि पूर्वज्ञानस्य कार्यमित्येवं सर्वस्यापि ज्ञानस्य शब्दानुवेधं दर्शयितुमाह- 'न सोऽस्ति प्रत्यय इति'।

स कश्चन उपदेष्टृबुद्धिस्थः प्रतिपत्तिः प्रत्ययो लोके नास्ति, यः शब्दानुगमादृते शब्दानुवेधशून्यः । अत्रार्थेऽनुभवमेव प्रमाणत्वेनोपन्यस्यति उत्तरार्द्धे - अनुविद्धमेवेति । यतः सर्वं ज्ञानमुपदेष्टुः प्रतिपत्तुर्वा एतत्पद्यावतरणोक्तदिशा शब्देनानुविद्धमिव भासते तादात्म्यसम्बन्धेन तन्मूलकेन वाच्यतासम्बन्धेन वार्थे विशेषणीभूतेन शब्देनानुविद्धमिव सर्वं ज्ञानं स्वग्राहकेण ज्ञानेन अनुव्यवसायेन साक्षिणा वा निमित्तेन भासत इति ।

१. वाक्यपदीयम् - काण्डम् - १, श्लोकः - १२१

२. वाक्यपदीयम् - काण्डम् - १, श्लोकः - १२३

**वाग्रूपतैव संसारिणां चैतन्यम्-**

**वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।**
**न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥**[८]

ज्ञानस्य नित्या स्वभाविकी वाग्रूपता सूक्ष्मवाक्तत्वोपरक्तता यदि अपगच्छेत्, तदा ज्ञानं न प्रकाशेत, प्रकाशकाभावात् । ज्ञानं ह्यन्तरवस्थितं परस्याग्राह्यं शब्देनाभिलप्यते, ज्ञानस्य शब्दानुविद्धत्वेन शब्दज्ञानयोस्तादात्म्यात् । असति तु ज्ञानस्य शब्दरूपत्वे ज्ञानं परस्य न प्रकाशेत, परबुद्धिगतस्य प्रकाशकाभावात् । यतः सा ज्ञानस्य वाग्रूपता प्रत्यवमर्शिनीशब्देन ज्ञानस्याभिलाप एव प्रत्यवमर्शोऽत्र, न तु अनुव्यवसायरूपः, वाचस्तत्त्वासम्भवात् ।

यथा प्रकाशकत्वम् अग्नेः स्वरूपं चैतन्यं वान्तर्यामिणः, तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम् । यापि असञ्चेतितावस्था तस्यामपि सूक्ष्मो वाग्धर्मानुगमोऽभ्यावर्तते ।

जगति सर्वव्यवहाराणां मूलरूपा वाणीति प्रचक्षते-

**सा सर्वविद्याशिल्पानां कलानां चोपबन्धिनी ।**
**तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ॥**[९]

सा वाणी अष्टादशविद्यानां वेदादीनां, शिल्पानां गृहादिनिर्माणबोधशास्त्राणां, संगीतविद्याया आरभ्य वेतालवशीकरणविद्यां यावत् चतु:षष्टिकलानां तद्गतविषयान् अवबोधयति । अनेनैव संसारस्य व्यवहार: प्रचलति । विद्याशिल्पकलादिभिर्लौकिकेषु वैदिकेषु चार्थेषु मनुष्याणां प्रायेण व्यवहार: प्रतिबद्ध: । मनुष्येतरस्य स्थावरजङ्गमात्मकस्य भूतग्रामस्य प्राणिवर्गस्य मनुष्यप्रवृत्त्यधीना: प्रवृत्तयश्च मनुष्यसमवेतविद्याशिल्पकलादिभि: सम्बन्धा: । स च सम्बन्ध: साक्षात्परम्परासाधारणो जन्यजनकभावरूप: । घटादीनां चाभिनिष्पादने प्रयोज्यप्रयोजकानाम् उपदेशसमीहादि सर्वं वाग्रूपतानुसारेण प्रकल्पते ।

न केवलं वाग्रूपता सर्वविद्याशिल्पानां कलानां चोपबन्धनी; किन्तु यैषा सर्वप्राणिषु चैतन्यरूपा संज्ञा, यस्यां सत्यां सर्वासु अर्थक्रियासु प्राणिनां प्रवृत्तय:, यदुत्क्रान्तौ च सर्वेषां प्राणिनिकायानां काष्ठकुड्यादिवत् प्रवृत्तिशून्यता, सैषा वाग्रूपतव इत्याह –

**सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।**
**तन्मात्रामप्यतिक्रान्तं चैतन्यं सर्वजातिषु ॥**[१०]

सैषा वाक् प्राणिषु चेतनाशक्तिरूपेण वर्तते । यया बाह्यलोकव्यवहार: सञ्जायते । तथा चान्त:करणस्य सुखदु:खयो: ज्ञानं कारयति । अस्मिन् जगति कोऽपि प्राणी एवं न विद्यते यस्मिन् चैतन्यमस्ति किन्तु वाग्रूपता न वर्तते । अत: संसारेऽस्मिन् सर्वत्र शब्दपरिणामत्वं परिलक्ष्यते ।

लोके यन्मूलकप्रवृत्तिसत्त्वे 'संसज्ञोऽयम्' इति व्यपदेश:, सुषुप्तिमदमूर्छामरणादिषु यदभावे विसंज्ञ इति व्यवहार: क्रियते । अत एवैवमाह–

**अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।**
**तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥**

वाग्रूपतानुविद्धं चैतन्यमेव, सफलासु क्रियासु प्राणिन: प्रवर्तयति । श्वासादिवत् स्वाभाविकीषु क्रियासु निष्फलासु चोपविष्टस्य शयानस्य वा हस्तपादादिकम्पनक्रियासु ज्ञानपूर्विकायां प्रवृत्तेरभावादिति भाव: । मरणकाले यस्य वाग्रूपस्य चैतन्यस्याभावे अयं प्राणी काष्ठकुड्यवद् विसंज्ञो वाग्रूपानुविद्धज्ञानपूर्वकप्रवृत्तिरहितो दृश्यते जगतीति ।

१. वाक्यपदीयम् – काण्डम् – १, श्लोक: – १२४
२. वाक्यपदीयम् – काण्डम् – १, श्लोक: – १२५
३. वाक्यपदीयम् – काण्डम् – १, श्लोक: – १२६

संसारे प्राणिनां जाग्रदाद्यवस्थाभिन्नेऽपि शब्दरूपाया: वाण्या: प्रभावो दृश्यते । उक्तञ्च–

**प्रविभागे यथा कर्ता तया कार्ये प्रवर्तते ।**
**अविभागे तथा सैव कार्यत्वेनावतिष्ठते ॥**[११]

जाग्रदवस्थायां सर्वेषां प्राणिनां सर्वोऽपि व्यवहारो वाग्रूपतानुविद्धचौतन्यपूर्वक एव विद्यते । इदानीं तु स्वप्ने सर्वव्यवहारसाधनत्वेऽपि सर्वव्यवहारकर्मत्वमपि वाच एवेत्येवं साध्यसाधनोभयरूपत्वं स्वप्नेऽपि वाच उपयोगमाह – प्रविभागे यथा कर्तेति ।

येन प्रकारेण कर्ता जाग्रदवस्थायां स्वकर्तव्यानां पालने प्रवृत्तो भवति, तेनैव प्रकारेण स्वप्नावस्थायामपि वाण्येव भोक्ताभोग्यभोगरूपेण परिणमते ।

**उपसंहारः-**

जगतः शब्दपरिणामत्वं प्रतिपादयन्तो वेदविदो धर्मशास्त्रज्ञाश्च प्रवदन्ति यत् सम्पूर्णं जगदिदं शब्दपरिणामरूपं वर्तते । कल्पारम्भे छन्दाभ्यो विश्वस्य सृष्टिरभूत् । यथा – 'वागेव विश्वा भुवनानि जज्ञे' इत्यादीनि उदाहरणानि प्रदत्तानि । विराट्पुरुषादेव ऋग्यजुःसामरूपाः शब्दराशयः जगतः सञ्चालन कारणभूताः सन्ति । अस्मिंल्लोके यानि कर्तव्यानि कार्यरूपेण पालनीयानि वर्तन्ते, तानि सर्वाणि वेदमूलकान्येव विद्यन्ते । शब्दानां व्यवहारेण विना संसारे किमपि कार्यं सम्पादयितुं नार्हन्ति जनाः । बालोऽपि पूर्वाहितसंस्कारेणैव स्वकार्याणि प्रतिपद्यते ।

'न सोऽस्ति प्रत्ययो लोके' इत्यनया करिकया निगद्यते यत् जगत्यस्मिन् एवं ज्ञानं नास्ति यत् शब्दं विना विज्ञातुं शक्यते । अतः सर्वाणि ज्ञानानि शब्दमयानि सन्ति । अतः कथ्यते 'सर्वं शब्देन भासते' । येन प्रकारेण अग्नेः स्वरूपं प्रकाशः, आत्मनः स्वरूपं चैतन्यं विद्यते, तथैव अवबोधस्य स्वरूपं वाग्रूपं वर्तते । वाक्तत्वं विना कस्यापि वस्तुनो ज्ञानं नैव सम्भवति ।

सैव वाणी सर्वासां वेदादिविद्यानां शिल्पादिकलानां उपबन्धनी वर्तते । जगति व्यवहारः चतुःषष्टिकलाभिः विद्याभिश्च दृश्यते । सर्वविद्याः कलाश्च वाण्या व्यवह्रियन्ते, अतो वक्तुं प्रभवामः शब्दपरिणामत्वं जगदिदम् । सा वागेव संसारस्य प्राणिनां चेतनाशक्तिः, या बाह्यलोकव्यवहारस्य साधनरूपा तथा च अन्तःकरणस्य सुखदुःखयोः विज्ञात्री । विश्वे केऽपि प्राणिन एवं न सन्ति यत्र चौतन्यं वर्तते वाग्रूपता नास्ति, अतः समग्रे जगति वाक्तत्वेनैव व्यवहारो जायते ।

**अत्यन्तमतथाभूते निमित्त श्रुत्युपाश्रयात् ।**
**दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥**[१२]

यद्यपि निमित्ते बाह्ये शशविषाणम्, अलातचक्रम्, खपुष्पम्, गन्धर्वनगरम्, इत्यादयोऽसत्शब्दाः सन्ति तथापि शब्दशक्त्या कस्यचिद् वस्तुनः स्वरूपं विज्ञापयितुम् एषां शब्दानां प्रयोगो भवति । यथा– 'भवतोऽभिमतं खपुष्पवत्' इत्यादि ।

श्रुतिरेव हि सर्वं शब्दार्थं स्वरूपपदात्मनि सन्निविष्टं दर्शयति । सा तमर्थं जनयति । स हि तस्यां प्रत्याय्यात्मना नित्यमवस्थितः । न च बाह्यवस्तुगतं सदसत्त्वं श्रुतिरपेक्षते, नापि विपर्ययाविपर्ययौ ।

यदा अत्यन्तम् असत्पदार्थोऽपि शब्देनोपपद्यते, तदा सत्पदार्थः शब्देनैव जायते । यतो हि संसारे यान्यपि वस्तूनि विद्यन्ते तानि सर्वाणि श्ब्दविषयाण्येव । यज्जगति असत्पदार्थाः शशविषाणादयो वर्तन्ते, तेषामपि सत्ता शब्देषु विद्यमानोऽस्ति । अतः शब्द एव जगतः कर्ता, जगत् परिणमते शब्दैरेव ।

**सन्दर्भाः**


1. वाक्यपदीयम् - काण्डम् -१, श्लोक:-१ ।
2. वाक्यपदीम् - काण्डम् -१, श्लोक:-१२० ।
3. शुक्लयजुर्वेदस्य पुरुषसूक्तम् - अध्याय:-३१, मन्त्र:-७ ।
4. ऋग्वेद:- मण्डलम् -४, सूक्तम् - ५८, ऋक् - ३ ।
5. वाक्यपदीयम् - काण्डम् - १, श्लोक: - ११८ ।
6. वाक्यपदीयम् - काण्डम् - १, श्लोक: - १२१ ।
7. वाक्यपदीयम् - काण्डम् - १, श्लोक: - १२३ ।
8. वाक्यपदीयम् - काण्डम् - १, श्लोक: - १२४ ।
9. वाक्यपदीयम् - काण्डम् - १, श्लोक: - १२५ ।
10. वाक्यपदीयम् - काण्डम् - १, श्लोक: - १२६ ।
11. वाक्यपदीयम् - काण्डम् - १, श्लोक: - १२७ ।
12. वाक्यपदीयम् - काण्डम् -१, श्लोक: - १२९ ।



**प्राचार्यः**
**श्रीमुक्तानन्द-संस्कृत-महाविद्यालय**
**शान्ति मन्दिर, मगोद, वलसाड (गुजरात)**


★★★

# Phonetics and Phonology: An Historical View

✍Dr. Shweta Sood

**(Phonetics is a branch of linguistics that studies the sounds of human speech, or in the case of sign languages the equivalent aspects of sign. It is concerned with the physical properties of speech sounds or signs (phones): their physiological production, acoustic properties, auditory perception, and neurophysiological status. Phonology, on the other hand, is concerned with the abstract, grammatical characterization of systems of sounds or signs. Like all linguistic fields, phonetics studies all languages. – स.)**

**Types:**

In the case of oral languages, phonetics has three basic areas of study:

- **Articulatoryphonetics:**It is the study of the organsofspeech and their use in producing speech sounds by the speaker. It is concerned with the articulation of speech: the position, shape, and movement of *articulators* or speech organs, such as the lips, tongue, and vocal folds.
- **Acousticphonetics:**It is the study of the physical transmission of speech sounds from the speaker to the listener. It is concerned with acoustics of speech: the spectro-temporal properties of the soundwaves produced by speech, such as their frequency, amplitude, and harmonicstructure.
- **Auditoryphonetics:** It is the study of the reception and perception of speech sounds by the listener. It is concerned with speech perception: the perception, categorization, and recognition of speech sounds and the role of the auditory system and the brain in the same.

Phonetic insight is used in a number of appliedlinguistic fields such as:

- Forensicphonetics: the use of phonetics (the science of speech) for forensic (legal) purposes.
- Speech recognition: the analysis and transcription of recorded speech by a computer system.

- Speechsynthesis: the production of human speech by a computer system.
- Pronunciation: to learn actual pronunciation of words of various languages.

**History:**

The history of phonetics—going back some 2.5 millennia—makes it perhaps the oldest of the behavioral sciences and, given the longevity and applicability of some of the early findings from these times, one of the most successful.

The ancient Hindu Rishis who composed the Vedas, must have been in the knowledge of phonetics. The Vedas were to be chanted and pronounced very accurately. To mispronounce a Vedic mantra or richa was regarded as a sin of the first order. Even the classification and arrangement of sounds and their formation in varnas in Sanskrit give an evidence of a sound phonetic base of this language. In the works of Panini or Patanjali, etc., we can have some concrete and outstanding evidence of the ancient phonetics of India. At about the same time the Greeks and the Romans had also made language and speech the subject of serious study.

The first known phonetic studies were carried out as early as the 4th century BCE by Sanskrit grammarians.The Hindu scholar Paṇini is among the most well-known of these early investigators, whose four part grammar, written around 350 BCE, is influential in modern linguistics and still represents "the most complete generative grammar of any language yet written" ( Keith 16). His work on Sanskrit was surprisingly modern and systematic.His grammar formed the basis of modern linguistics and described a number of important phonetic principles. Paṇini provided an account of the phonetics of voicing, describing resonance as being produced either by tone, when vocal folds are closed, or noise, when vocal folds are open. The phonetic principles in the grammar are considered "primitives" in that they are the basis for his theoretical analysis rather than the objects of theoretical analysis themselves, and the principles can be inferred from his system of phonology.

Besides the Indians, the Greeks, the Romans, the Egyptians, and the Arabs also tookinterest in speech around the seventh century A.D. in connection with Koran and Arabic studies leading to the developments in lexicography, the study of pronunciation, and language history. The Buddhist missionaries contributed to the study of the phonetics of Chinese and Japanese from as early as the fifth century A.D., and the Christian missionaries contributed towards the study of not only Greek, Roman and

Hebrew but also of a number of languages whose written forms did not exist.

Advancements in phonetics after Paṇini and his contemporaries were limited until the modern era, save some limited investigations by Greek and Roman grammarians. In the millenia between Indic grammarians and modern phonetics the focus of phonetics shifted from the difference between spoken and written language, which was the driving force behind Paṇini's account, and began to focus on the physical properties of speech alone. Sustained interest in phonetics began again around 1800 CE with the term "phonetics" being first used in the present sense in 1841. With new developments in medicine and the development of audio and visual recording devices, phonetic insights were able to use and review new and more detailed data. This early period of modern phonetics included the development of an influential phonetic alphabet based on articulatory positions by AlexanderMelvilleBell. Known as visiblespeech, it gained prominency as a tool in the oraleducationofdeafchildren.

**Vocal tract:**

The following are the important passive and active places of articulation which need mention here: (1) Exo-labial; (2) Endo-labial; (3) Dental; (4) Alveolar; (5) Post-alveolar; (6) Pre-palatal; (7) Palatal; (8) Velar; (9) Uvular; (10) Pharyngeal; (11) Glottal; (12) Epiglottal; (13) Radical; (14) Postero-dorsal; (15) Antero-dorsal; (16) Laminal; (17) Apical; (18) Sub-apical or sub-laminal.

Articulations take place in particular parts of the mouth. They are described by the part of the mouth that constricts airflow and by what part of the mouth that constriction occurs. In most languages constrictions are made with the lips and tongue. Constrictions made by the lips are called labials. The tongue can make constrictions with many different parts, broadly classified into coronal and dorsal places of articulation. Coronal articulations are made with either the tip or blade of the tongue, while dorsal articulations are made with the back of the tongue.These divisions are not sufficient for distinguishing and describing all speech sounds. For example, in English the sounds [s] and [ʃ] are both voiceless coronal fricatives, but they are produced in different places of the mouth. Additionally, that difference in place can result in a difference of meaning like in "sack" and "shack". To talk of India, many Bengalis and Oriyas also fail to maintain the distinction between /s/ and /ʃ/ in such words as 'sip' and 'ship'. Bengalis tend to pronounce both as 'ship' or even 'sheep'. They face a similar difficulty with /b/ and /v/. Therefore, 'very' often sounds like /beri/.

A given sound have a different function or status in the sound patterns of different languages.There are also variants between speakers and dialects. For example, "toad" may be pronounced [tëUd] in high-register RP, [toUd] or [toːd] in the North. All of them are different pronunciations of the same sequence of phonemes. But these differences can lead to confusion: [toUd] is "toad" in one dialect, but may be "told" in another. In some North Indian languages, consonant clusters – two or more consonants coming together – do not appear at the beginning of words as they do, for instance, in English (cream, sweet). Many Indian speakers will insert an /e/ or /^/ between the two consonants, so that, ‘sweater’ becomes /seweter/. Others will put and /I/ or /u/ before the cluster. So, ‘school’ becomes /isku:l/ or /usku:l/. Again, in English, the last consonant is never emphasized or stressed but many Kashmiris will regularly pronounce hard as /ha:d/, talk as /ta:k/.

**Relation to phonology:**

In contrast to phonetics, phonology is the study of how sounds and gestures pattern in and across languages, relating such concerns with other levels and aspects of language. Phonetics deals with the articulatory and acoustic properties of speech sounds, how they are produced, and how they are perceived. As part of this investigation, phoneticians may concern themselves with the physical properties of meaningful sound contrasts or the social meaning encoded in the speech signal (sociophonetics) (e.g. gender, sexuality, ethnicity, etc.). However, a substantial portion of research in phonetics is not concerned with the meaningful elements in the speech signal.

While it is widely agreed that phonology is grounded in phonetics, phonology is a distinct branch of linguistics, concerned with sounds and gestures as abstract units (e.g., distinctivefeatures, phonemes, syllables, etc.) and their conditioned variation (via, e.g., allophonicrules, constraints, or derivationalrules). Phonology has been argued to relate to phonetics via the set of distinctivefeatures, which map the abstract representations of speech units to articulatory gestures, acoustic signals or perceptual representations.

**Transcription:**

Phonetictranscription is a system for transcribing sounds that occur in a language, whether oral or sign. The most widely known system of phonetic transcription, the InternationalPhoneticAlphabet (IPA), provides a standardized set of symbols for oral phones. The standardized nature of the IPA enables its users to transcribe accurately and consistently the phones of different languages, dialects, and idiolects. The IPA is a useful tool not only

for the study of phonetics, but also for language teaching, professional acting, and speechpathology.

**Difference between Phonetics and Phonology:**

The difference between phonetics and phonology is that of generality and particularity. Whereas phonetics is the science of speech sounds, their production, transmission and reception and the signs to represent them in general with no particular reference to any one language, phonology is the study of vocal sounds and sound changes, phonemes and their variants in a particular language. If phonetics can be likened to a world, phonology is a country. Phonetics is one and the same for all the languages of the world, but the phonology of one language will differ from the phonology of another. According to John Lyons, "Phonetics differ from phonology…in that it considers speech sounds independently of their paradigmatic opposition and syntagmatic combinations in particular languages," (55) and that phonology is the level at which the linguist describes the sounds of a particular language.

The subject matter of phonology is the selected phonetic material from the total resources available to human beings from phonetics. The human vocal system can produce a very large number of different speech sounds. Members of a particular speech community speaking that particular language, however, use only a limited number of these sounds. Every language makes its own selection of sounds and organizes them into characteristic patterns. This selection of sounds and their arrangement into patterns constitute the phonology of the language.

To quote Robins, "Phonetics and phonology are both concerned with the same subject matter or aspect of language, speech sounds, as the audible result of articulation, but they are concerned with them from different points of view. Phonetics in general (that is, concerned with speech sounds as such without reference to their function in a particular language), descriptive and classificatory: phonology in particular (having a particular language or languages in view) and functional (concerned with working or functioning of speech in a language or languages). Phonology has in fact been called functional phonetics" (114).

**Conclusion:**

In the present century phonetics has developed immensely into various branches and is mature enough to claim an independent status as a discipline. Already some linguists have talked about linguistic sciences – by which they mean phonetics and linguistics, the former dealing with the general properties of human sound making the latter with whose properties which are of importance in the system of a particular language.

The focus of interest in this century has been to find out accurate and precise ways of the modern age. Spectographs,oscillographs, sound-monitoring machines, tape-recorders and a number of other electronic devices developed by communications engineering have been greatly helpful in studying sounds. The aim of phonetics now-a-days is not to provide a notation: it is to analyse speech into basic units, which may thereafter be transcribed in some way. Hence the phonetic description is primary: a notation secondary. The contribution of Daniel Jones, Abercrombie, Gimson in Britain and of Roman Jacobson, Morris Halle, Chomsky, Trager and Smith in the United States, besides a host of European and Russian Scholars, to the study of speech-sounds is of considerable significance.

**Works Cited**


1. Abercrombie, D. Elements of General Phonetics. Edinburgh: Cambridge University Press, 1967. Print.
2. Baumbach, E. J. M. Analytical Tsonga Grammar. Pretoria: University of South Africa, 1987. Print.
3. Catford, J. C. A Practical Introduction to Phonetics. 2nd Ed. London: Oxford University Press, 2001. Print.
4. Chomsky, Noam and Halle, Morris. Sound Pattern of English.London: Harper and Row, 1968. Print.
5. Dawson, Hope and Phelan, Michael, eds. Language Files: Materials for an Introduction to Linguistics. 12th Ed. Canada: The Ohio State University Press, 2016. Print.
6. Eklund, Robert. "Pulmonic ingressive phonation: Diachronic and synchronic characteristics, distribution and function in animal and human sound production and in human speech". Journal of the International Phonetic Association. **38** (3): 235–324. Cambridge University Press, 2008. Print.
7. Gobl, ChristerandNíChasaide, Ailbhe. "Voice source variation and its communicative functions". The Handbook of Phonetic Sciences 2nd Ed. pp. 378–424. Pretoria: University of South Africa, 2010 Print.
8. Gordon, Matthew andLadefoged, Peter. "Phonation types: A Cross-linguistic Overview". Journal of Phonetics. **29** (4): 383–406. Canada: The Ohio State University Press, 2001. Print.
9. Hardcastle, William; Laver, John; and Gibbon, Fiona, Eds. The Handbook of Phonetic Sciences. 2nd Ed. USA: Wiley-Blackwell, 2010. Print.
10. International Phonetic Association. Handbook of the International Phonetic Association. Cambridge University Press, 1999. Print.

11. Jakobson, R. and M. Halle.Fundamentals of Language. USA: Mouton& Co., 1956. Print.
12. Johnson, Keith. Acoustic and Auditory Phonetics. 3rd Ed. USA: Wiley-Blackwell, 2011. Print.
13. John Lyons. Phonetics: Approaches, Methods and Techniques. Edinburgh: Cambridge University Press, 1967. Print.
14. Lass, R. Phonology: An Introduction to Basic Concepts. Cambridge: Cambridge University Press, 1984. Print.
15. Robins, J. Approaches and Methods in Phonology. Cambridge: Cambridge University Press, 2001. Print.

**Contract Teacher**
**Department of English**
**K.J.Somaiya Sanskrit Vidyapeetham**
**Vidyavihar, Mumbai-77**
**Phone: 9967786364**
**Email: shwetasood1937@gmail.com**

★★★

# शास्त्रेषु नञर्थविमर्शः

✍डा. सन्तोषकुमारझाः

**(निबन्धेऽस्मिन् नञ्भेदनिरूपणम्, पर्य्युदासनञर्थविचारः, प्रसज्यप्रतिषेध-नञर्थविचारः, सादृश्याद्यर्थनिरूपणम्, 'नञर्थः प्रलयङ्गतः' इति विचारश्च शास्त्रीयदृष्ट्या पारम्परिकरीत्या च कृतं विद्यते । शास्त्रविचारपरोऽयं लेखः अनुसन्धितृभ्यः शास्त्रतत्त्वपिपासुभ्यश्च दिग्दर्शको वर्त्तते । - स.)**

नामाख्यातोपसर्गनिपाताश्चेति शब्दानां भागचतुष्टयं प्रसिद्धम् । तत्र नैकेषु निपातेषु नञ्नामा निपातः पदार्थदृष्ट्या क्लिष्टः विमर्शनीयश्च । तत्रेदं प्रस्ताव्यते-नञ्-रूपनिपातो द्विविधः । पर्युदासः प्रसज्यप्रतिषेधश्च । तत्र पर्य्युदासनञः समस्ते व्यस्ते च अन्योऽन्याऽभावोऽर्थः । प्रसज्य-प्रतिषेधनञः समस्तस्थले अत्यन्ताऽभावः, असमस्तस्थले चाऽन्योऽन्याऽभावोऽर्थो वर्त्तते ।

तदुक्ता नञ्भेदाः -

**द्वौ नञौ समनुख्यातौ पर्य्युदासप्रसज्यकौ ।**
**पर्य्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ॥**
**प्राधान्यन्तु विधेर्य्यत्र प्रतिषेधेऽप्रधानता ।**
**पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥**
**अप्राधान्यं विधेर्य्यत्र प्रतिषेधे प्रधानता ।**
**प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ॥**

पर्य्युदासनञर्थविचारः - अस्य आरोपविषयत्वं द्योत्यार्थः, नञ् च तस्य द्योतकः । 'आरोपविषयत्वद्योतकत्वञ्च नञः समभिव्याहृतघटादिपदानामारोपितप्रवृत्तिनिमित्तबोधकत्वतात्पर्य्य-ग्राहकत्वमि'[1]ति, समन्वयस्तु नञः युक्तानां घटादिपदानाम् आरोपितप्रवृत्तिनिमित्तस्य बोधको घटादिः, बोधकत्वं घटादौ, बोधकत्वतात्पर्य्यस्य बोधकत्वं भवति । नञः एतादृशबोधकत्व-स्वीकारादेव 'अब्राह्मण' इत्यादौ पर्य्युदासनञः स्थले 'आरोपितब्राह्मणत्ववान् क्षत्रियादि'रिति शाब्दबोधः । अत्राऽऽरोपित-ब्राह्मणत्ववान् ब्राह्मणपदार्थः, नञ् तस्य द्योतकः। उक्तबोधस्वीकारादेव पूर्वाचार्य्याणाम् 'उत्तरपदार्थप्रधानो नञ्' इति कथनं सङ्गच्छते ।

एवञ्चोत्तरपदार्थप्राधान्यस्वीकारादेव अतस्मै ब्राह्मणाय असः शिवः इत्यादौ सर्व्व-नामकार्य्यम अत्वस्मैसत्वविधानरूपं जायते, अन्यथा तत्पदार्थस्य विशेषणत्वरूपगाणत्वं[2] स्यात् । प्रवृत्तिनिमित्तस्याऽऽरोपः तत्सदृशे पदार्थे एव भवति, अत एव अभियुक्तोक्तिः 'पर्य्युदासः सदृग्ग्राही' अर्थात् पर्य्युदासो नञ् सदृशार्थस्य द्योतको भवतीति सिद्ध्यति । एवं पर्य्युदासे नञ्समभिव्याहृतशब्दजन्योऽर्थस्तु आरोपितप्रवृत्तिनिमित्तवान् इति, मानसः अर्थस्तु निषेधादयः ।

ब्राह्मणत्वाभाववान् इति बाधज्ञाने सति क्षत्रियादौ ब्राह्मणत्वारोपस्तु प्रयोक्तुः ब्राह्मणत्ववान् भवतु इति इच्छया सम्भवति । एवम् अब्राह्मण इत्यादिप्रयोगे कारणभूताः धर्म्मास्तु सादृश्य-अन्यत्व-अल्पत्व-अप्राशस्त्य-विरोधादयः सन्ति । एते सर्वे अर्थलभ्या एव, न तु नञ्समभिव्याहृतशब्दलभ्याः सन्ति ।

पर्य्युदासनञर्थः समस्तस्थले असमस्तथले कीदृग् भवतीति प्रस्तूयतेऽत्र । पर्य्युदासनञ्समभिव्याहृत-पदेन एकार्थीभावसामर्थ्यात् 'समर्थः पदविधिः' इत्यनुशासनात् प्रायः समस्तप्रयोगे 'अघटः' इत्यादौ एव भवति । क्वचित्तु 'विभाषा' इत्यधिकारेण समासविधीनां वैकल्पिकत्वात् असमस्तेऽपि दृश्यते । यथा - 'यजातिषु ये यजामहं करोति, नानुयाजेषु' इति मन्त्रे 'नानुयाजेषु' इत्यत्र, 'घटः अपटो भवति' इत्यर्थके प्रयोगे 'घटो न पटः' इत्यादौ च । उभयत्रैवाऽन्योऽन्याऽभावः एव फलितार्थः अर्थात् अर्थलभ्यो वर्त्तते । एवञ्च समस्ते व्यस्ते च नार्थभेद इति निष्कृष्यते ।

प्रसज्यप्रतिषेधनञर्थविचारः - प्रसज्यप्रतिषेधोऽपि पर्य्युदासवत् समस्तः, असमस्तश्च भवति । उभयोऽपि प्रसज्यप्रतिषेधो नञर्थः क्रियायामेव विशेष्यत्वरूपेण अन्वेतीति नियमः । तेनाऽन्वयेन नञ्समभिव्याहृतक्रियाप्रकारकः अभावविशेष्यको बोधो जन्यते । तत्र नञर्थः अभावे विशेषणम्, क्रिया च प्रकार इति भावः । समस्तप्रसज्यप्रतिषेधस्योदाहरणम् - 'असूर्य्यम्पश्या राजदाराः'[3] इत्यत्र 'असूर्य्यमि'ति पदम् । अत्र 'असूर्य्यललाटयोर्दृशितपोः' इत्यनेन खश्विधान-रूपज्ञापकात् समासः । क्रियान्वय्यभावस्य प्रसज्यप्रतिषेधनञः प्रतिपादकत्वादेवाऽऽचार्य्यैः प्रसज्य-प्रतिषेधोऽयं क्रियया सह यत्र नञ् इत्युक्तम् । अर्थात् प्रसज्यप्रतिषेधस्थले धात्वर्थक्रिया-प्रतियोगिकाभावविशेष्यक एव बोध इति भावः । अत्र क्रियापदं गुणस्याऽप्युपलक्षणमिति बहुभिः आचार्य्यैः मन्यते । अस्योपलक्षणत्वे नञ्सूत्रभाष्यं प्रमाणम् । तत्र प्रसज्याऽयं क्रियागुणौ ततः पश्चान्निवृत्तिं कुरुते इत्युक्तम् । क्रियायाः गुणस्य च पूर्वं प्रसक्तिः, पश्चात् प्रसक्तायाः क्रियायाः प्रसक्तस्य गुणस्य चाऽयं प्रतिषेधनञा प्रतिषिध्यते । तत्त गुणान्विनो नञः उदाहरणम् - 'नास्माकमेकं प्रियमि'ति । अत्र न एकम् इत्यनेन प्रिये एकत्वसङ्ख्यारूपगुणस्य प्रतिषेधेन सङ्ख्यान्तरबहुत्वविशिष्टप्रियाणां प्रतीतिः। क्रियान्वयिनो नञः उदाहरणम् - 'अनचि च', 'गेहे घटो नास्ती'ति । तत्र 'अनचि' इत्यत्र प्रसज्यप्रतिषेधः, तेन अजव्यवहितपूर्वत्वविशिष्टयरो द्वित्वं नेत्यर्थः।

तत्र समस्तस्य प्रसज्यनञः अत्यन्ताभाव एवार्थः । असमस्तस्य अत्यन्ताऽभावः, अन्योऽन्याऽभावश्च। प्रागभावप्रध्वंसाभावौ च न नञ्द्योत्यौ, तत्र तत्र अत्यन्ताभावस्यैव स्वीकृतत्वात्। अत्यन्ताभावस्याऽन्वयः विशेष्यत्वरूपेण नास्ति इत्यादौ तिङन्तस्य अस्ति इत्यादेः अर्थः या सत्तादिक्रिया, तस्यामेव भवति । तेन क्रियाप्रतियोगिकोऽभाव अत्यन्ताभाव इति बोधो जायते । कार्य्यकारणभावश्चात्र 'नञर्थात्यन्ताभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन धातुजन्यपदार्थोप-स्थितिः कारणमि'ति । तथा च अत्यन्ताभावस्य क्रियायां विशेष्यत्वेनाऽन्वयात् घटो नास्तीत्यादौ

घटकर्त्तृकसत्ताप्रतियोगिकोऽभाव इति बोधः । ईदृशनियम-स्वीकारादेव 'अहं नास्मि', 'त्वं नासि', 'घटौ न स्तः', 'घटाः न सन्ति' इत्यादिषु क्रमशः उत्तमपुरुषस्य, मध्यमपुरुषस्य, द्विवचनस्य, बहुवचनस्य च व्यवस्था युष्मदस्मदर्थकारकानुरोधेन तिङि उपपन्ना जायते । अन्यथा कारकाणामभावे, अभावस्य च क्रियायामन्वये सति 'मदभावोऽस्ती'त्यादाविव युष्मदस्मदोः तिङर्थकर्त्तृकर्म्म-समानार्थवाचकत्वाभावात् मध्यमोत्तमव्यवस्था न स्यात् । 'असन्देहः' इत्यादौ सन्देहस्य गुणत्वात्, प्रसज्यप्रतिषेधस्थले आरोपविषयार्थकेन नञा एव समासः । 'आरोपितसन्देहः' इत्यादि च ततो बोधः । अत्यन्ताभावस्तु तत्त्र फलितार्थः। 'वायौ रूपं नास्ति' इत्यत्र रूपपदं रूपाभावं बोधयतु इति तात्पर्य्यस्यऽनुपपत्त्या रूपपदस्य रूपाभावे लक्षणा, नञ्पदञ्च तादृशतात्पर्य्यस्य ग्राहकम्, तस्माद् 'वाय्वाधिकरणिका रूपाभावकर्त्तृका सत्ते'त्यर्थः। वस्तुतः समनियतानां भावानामभावानाञ्चौक्यं भवति । ययोः अधिकरणं समानम्, तौ समनियतौ यथा रूपाभावः, रूपकर्त्तृकसत्ताभावश्चेत्येतौ समनियतौ । एवं यत्र रूपकर्त्तृकसत्ताभावः तत्र रूपाभावो भवत्येव, एवञ्च यत्र रूपाभावः, तत्र रूपकर्त्तृकसत्ताभावः। एवं हि समनियतयोः अभावयोः अन्यतरज्ञाने नियमेनाऽपरं ज्ञानं भवति । तथा च 'वायौ रूपं नास्ति' इत्यतः 'वाय्वधिकरणकरूपकर्त्तृकसत्ताऽभावः' इत्येव शाब्दबोधः, 'रूपाभावकर्त्तृकसत्ता' च फलितार्थो भवति । तेन लक्षणां विनाऽपि बोधो भवत्येव । अथवा 'वायौ अरूपमस्ति' इत्यर्थकं 'वायौ रूपं नास्ती'ति वाक्यम् । अत्र 'अरूपमि'त्यस्य आरोपितरूपत्ववान् इत्यर्थः । तथा च 'वाय्वधिकरणिका आरोपितरूपत्ववत्कर्त्तृके'ति शाब्दः, रूपाभावबोधस्त्वार्थः । उक्तबोधोपपत्तिः क्रियाप्रकारकाभावविशेष्यकबोधस्य प्रसज्यप्रतिषेध एव स्वीकार उत्पद्यते । एवञ्च पुरुषवचनव्यवस्थानुरोधेन नञर्थात्यन्ताभावस्य विशेष्यतया तिङन्तार्थ-क्रियान्वयित्वस्वीकार एव कर्त्तव्यः। तार्किकोक्तः अत्यन्ताभावप्रकारकक्रियाविशेष्यकश्च बोधोऽ-समीचीन इति बोध्यम् ।

सादृश्याद्यर्थाः - भर्त्तृहरिणा नञर्थाः परिगण्यन्ते -

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥**[४]

1. तत्सादृश्यम् - प्रतियोगिनः साधारणधर्म्मवत्त्वं सादृश्यम् । यथा - 'अनश्वोऽयम्' इत्यस्य 'अश्वसदृशो गर्दभ' इत्यर्थः ।
2. अभावः - अत्यन्ताऽभावाऽन्योऽन्याऽभावौ अभावाख्यौ । यथा - 'घटो नास्ति' इत्यस्य 'घटर्त्तृकसत्ताभावः', 'घटो न पटः' इत्यस्य 'घटाभाववान् पटः' इत्यर्थः ।
3. तदन्यत्वम् - नञ्युक्तपदार्थाद् भिन्नत्वं तदन्यत्वम् । यथा - 'अमनुष्यं प्राणिनमानय' इत्यस्य 'मनुष्यभिन्न'मित्यर्थः।
4. तदल्पता - नञ्युक्तपदार्थस्य अल्पता तदल्पता । यथा - 'अनुदरा कन्या' इत्यत्र उदरस्थूलतानिषेधेन अर्थलभ्येन उदरस्याऽल्पत्वबोधनेन 'अल्पोदरवती कन्ये'त्यर्थः ।

5. अप्राशस्त्यम् – नञ्युक्तपदार्थस्य अनुत्कृष्टत्वम् अप्राशस्त्यम् । यथा – 'अब्राह्मणोऽयम्' इत्यस्य 'अप्रशस्तब्राह्मण' इत्यर्थः ।
6. विरोधः – विरोधिनि विद्यमानो धर्म्मः विरोधः । यथा – 'असुरः', 'अधर्म्मः' अर्थात् 'सुरविरोधी', 'धर्म्मविरोधी' इत्यर्थः ।

नञर्थः प्रलयङ्गतः इति विचारः – अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् 'घटो नास्ति' इत्यत्र अभावप्रतियोगिनः घटकर्तृकसत्तारूपस्य बोधे सति तदनन्तरं नञा तस्य निषेधोऽशक्यः। यतो हि सतः निषेधोऽसम्भवः, असतश्चाऽसत्त्वादेव निवृत्तिः सिद्ध्यते । अस्यां स्थितौ नञ्पदस्य वैय्यर्थ्यं प्रतीयते । तदेवोक्तं श्रीहर्षरचिते खण्नखण्डखाद्ये –

**'सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते ।**
**जगत्यनेन न्यायेन नञर्थः प्रलयङ्गतः'॥**

सत्पदार्थस्य निषेधो न सम्भवति, असत्पदार्थस्य चाऽविद्यमानत्वादेव निषेधः स्वतः सिद्धः। अनया रीत्या वाग्व्यवहारजगति नञर्थः विलोपं प्राप्तः इत्यर्थः । तन्न, बोद्धपदार्थ-स्वीकारेणाऽदोषात् । बाह्यसत्ता, बौद्धसत्तेति द्विधा हि पदार्थानां सत्ता भवति । व्याकरणं बौद्धपदार्थवादि । तदनुसारं बौद्धः एव शब्दोऽर्थवाचकः, बौद्धः एवाऽर्थः शब्दवाच्यः । तेन बुद्धिसत्तासमाविष्टस्याऽप्यर्थस्य नञा बाह्यसत्तासमा-विष्टस्य निषेधः । एवञ्च 'घटो नास्ति' इत्यस्य बुद्धौ विद्यमानोऽपि घटः बहिर्नास्ति इति । अत्र घटपदेन तथा अस्तिपदेन घटविषयिका सा सत्ताबुद्धिः उत्पन्ना, सा नञा निवर्त्यते, तस्मान्निषेधोपपत्तये बौद्धपदार्थस्वीकारः अनावश्यकः इति नैयायिकमतं न समीचीनम् । शब्दवाच्यस्यैवाऽर्थस्य नञा निषेधसम्भवात् । बुद्धिस्त्वर्थतः लब्धा, न शब्दतः । अतो न बुद्धेर्बाधः नञ्पदेन भवितुमर्हति ।

**सन्दर्भाः**

1. प.ल.म. पृ.सं. – 507, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
2. गौणत्वञ्च पदार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकत्वम्, अनुच्छेदार्थे प.ल.म पृ.स.-508, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
3. एवं नाम राजदारा गुप्ताः यदपरिहार्य्यदर्शनं सूर्य्यमपि न पश्यन्ति, किं पुनः परपुरुषमित्यर्थः, प.ल.म. अनुच्छेदार्थे पृ.स.-517, हंसाप्रकाशनम्, जयपुरम्, प्रथम-संस्करणम्, 2018 ।
4. प.ल.म. पृ.स.-507, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2 ।

**सन्दर्भग्रन्थाः**

1. व्याकरणमहाभाष्यम्, सम्पादकः – श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथम-संस्करणम्, 1938 ।

2. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः – श्री प. ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, 2005 ।
3. परमलघुमञ्जूषा, सम्पादको व्याख्याकारश्च – प्रो. बाधकुमारझाः, हंसाप्रकाशनम्, जयपुर, संस्करणम्, 2018 ।
4. लघुशब्देन्दुशेखरः, सम्पादकः – प्रो. बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, 2013 ।
5. समासस्तदव्ययीभावश्च, प्रो. बोधकुमारझाः, विद्यानिधिप्रकाशनम्, देहली, प्रथम-संस्करणम्, 2011 ।
6. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथम संस्करणम्, 2003 ।
7. तत्त्वबोधिनीसमाख्यव्याख्यासंवलितासिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, 2010 ।
8. वैयाकरणभूषणसारः प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः – श्रीबालकृष्णपञ्चोली, चौखम्बा-संस्कृतसंस्थानम्, संस्करणम्, वि.सं. 2068, ई. 2012 ।
9. परमलघुमञ्जूषा, भावप्रकाशिका, बालबोधिनी संस्कृतहिन्दीव्याख्योपेता, व्याख्योपेता, व्यख्याकारः सम्पादकश्च – डा. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011 ।

**पूर्णिमारामप्रतापसंस्कृतमहाविद्यालयः,**
**ग्राम + पोस्ट – बैगनी, थाना – बहेडा,**
**जिला – दरभङ्गा, बिहारः ।**

★★★

# वाक्यपदीये शब्दब्रह्मणः स्वरूपम्

✍ श्रीसत्यराजरेग्मी

**(शोधपत्रसंरचनारीतेरुत्कृष्टमिदमुदाहरणम् । पूर्वं प्रस्तावनायां शीर्षकानुगुणमुपस्थाप्य तदनु लघौ लघौ शीर्षके विचारान् विच्छिद्य तत्र तत्रोपलब्धविषयान् अन्विष्य युक्तिप्रमाणाभ्यां तत्र विमर्शमाविर्भाव्य तुलनीयग्रन्थान्तरसन्दर्भञ्च प्रदर्श्य पत्रसारांशोल्लेखेन समाप्तिं गतोऽयं निबन्धः शोधपराय जनाय, विशेषतस्तादृशच्छात्रायानुकरणीय इति प्रतिभाति । निष्कर्षेऽत्र 'द्वे ब्रह्मणी वेदितव्ये' इति मैत्रायणीमुद्धरता गवेषकेण शब्दब्रह्मणि निष्णाते सति परब्रह्माधिगमनमित्युक्त्वा ब्रह्मणो द्वित्वं निरूपितम्, परमिदं वैयाकरणसिद्धान्ताऽनभिमतम् । न चाऽनभिमतत्वे उपनिषद्विरोधः, शब्दब्रह्मणः, तथोक्तस्य परब्रह्मणश्चैकत्वादेव एकस्मिन् निष्णातत्वे सति तदभिन्नस्य परब्रह्मणो लाभ इति उपनिषदाशयात् । तत्र-तत्र शास्त्रे नामद्वयेन कीर्त्तनाद् द्विवचनप्रयोगोपपत्तिश्च बाध्या । - स.)**

**आपः पवित्रं परमं पृथिव्याम् अपां पवित्रं परमं च मन्त्राः ।**
**तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ॥**

तत्रभवतां शाब्दिकानां विदितमेव यत् वेदानां षट्स्वङ्गेषु व्याकरणशास्त्रस्यैव प्राधान्यं वर्तते । पदादिविभागशः शब्दानां व्याख्यानत्वात् व्याकरणेनैव ऋग्वेदादयः श्रुतिग्रन्थाः विज्ञातुं शक्याः । ऐन्द्रचान्द्रादिषु नैकेषु व्याकरणशास्त्रेषु सत्स्वपि सर्वत्राधुना महर्षिपाणिनेः शब्दानुशासनमेव प्रचलति । लौकिकवैदिकशब्दानां प्रतिपादकत्वादस्य प्राधान्यम् । वैयाकरणानां समूहे व्याकरणसिद्धान्तभूतस्य शब्दब्रह्मवादस्य निरूपणाय पदवाक्यप्रमाणज्ञेन महावैयाकरणेन भर्तृहरिणा 'वाक्यपदीयम्' इति नाम्ना व्याकरणदर्शनशास्त्रं विनिर्मितम् । ततो वाक्यपदीयमाश्रित्यैव नागेशभट्टादिभिः वैयाकरणैः शाब्दिकसिद्धान्तप्रतिपादका अनेके ग्रन्थाः विरचिताः । व्याकरणदर्शनशास्त्रपरम्परायाः परमोपादेयतां समालोच्य शाब्दिकैः महाविद्यालयेषु विश्वविद्यालयेषु च अध्ययनाय ग्रन्थोऽयं पाठ्यक्रमे स्वीकृतः ।

**वाक्यपदीयम् -**

काण्डत्रयात्मकस्य ग्रन्थस्य 'वाक्यपदीयम्' इति संज्ञात्त्वात् मानसपटले एकः प्रश्नः समुदेति वाक्यपदीयं नाम किम् ? तस्योत्तरञ्च इदमित्थम् - वाक्यञ्च पदञ्चेति वाक्यपदम्, इत्यनयोः समाहारः द्वन्द्वसमासः । वाक्यपदमधिकृत्य कृतो ग्रन्थः 'वाक्यपदीयम्' इति । वाक्य-

पदीयमित्ययं शब्दः 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः'[१] इति पाणिनीयेन सूत्रेण छप्रत्यये कृते सिद्ध्यति । शब्दे क्लीबत्वं निपातनात् वर्तते । वाक्यपदीयमित्यनेन पदेन ग्रन्थस्य वाक्यकाण्डं पदकाण्डञ्चेति काण्डद्वयात्मकताया अभिव्यक्तिर्भवति । अतो 'ब्रह्मकाण्डम्' इत्याख्यं प्रथमं काण्डं व्याकरणदर्शनशास्त्रस्य मुख्यप्रतिपाद्यत्वेन शब्दब्रह्मरूपेण यद्वा उपोद्घातरूपेण मन्वते विबुधाः । अथवा आगमखण्डात्मकं प्रथमं काण्डं सम्पूर्णग्रन्थस्य भूमिकारूपमस्तीत्यपि स्वीकुर्वन्ति ।

वाक्यपदीये ब्रह्मकाण्डे भर्तृहरिणा शब्दब्रह्मणः स्वरूपं समुपस्थाप्य शब्दानुशासनस्य स्फोटसिद्धान्तः सविस्तरं व्यवस्थापितः । इदं काण्डं मुख्यत आगमकाण्डम् इति संज्ञया अभिधी । वैयाकरणाः शब्दं ब्रह्मणः स्वरूपमिति विज्ञाय तच्च शब्दतत्त्वम् अनादिनिधनम्, अक्षरम्, जगतः कारणम्, नित्यं चैतन्यञ्चेति आमनन्ति । शब्दब्रह्म स्वतन्त्रकालशक्त्या जगत उत्पत्तिम् अभिव्यक्तिं वा नियन्त्रयति । शब्दब्रह्मणः स्वरूपं प्राप्त्युपायश्च श्रुतिर्भवति । किञ्च महर्षिभिः विविधरूपेषु दृष्टत्वात्तस्य अनेकरूपता विद्यते । साङ्गोपाङ्गयुक्तायाः श्रुतेः प्रधानमङ्गं व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवतीति न्यायाद् व्याकरणेन हि प्रत्यगात्मस्वरूपस्य शब्दस्य साक्षात्कारो जायते, येन मोक्षप्राप्तिर्भवति ।

शब्देषु प्रकृतिप्रत्ययादीनां कल्पना तेषां साधुत्वस्य ज्ञानाय भवति । शब्दस्तु नित्यः । तत्र शब्दार्थयोः सम्बन्धः नित्यः । शब्दानां नित्यत्वाद्धि व्याकरणशास्त्रस्य सार्थकता वर्तते । अन्यथा शब्दानुशासनस्य स्थिरत्वस्य परिकल्पना कर्तुमशक्या । अतः साधुशब्दानां परिज्ञानाय व्याकरणागमस्य संरचना श्रुत्याधारेण कृतास्ति । वाक्यपदीयस्य ब्रह्मकाण्डस्य मङ्गलाचरणादिचतसृषु कारिकासु वर्णितस्य शब्दब्रह्मणः स्वरूपमत्र यथामति उपस्थाप्यते –

**शब्दब्रह्मणः स्वरूपम्** –

व्याकरणागमसर्वस्वभूतं वाक्यपदीयमिति ग्रन्थं निबध्नन् महावैयाकरणो भर्तृहरिः शिष्यशिक्षायै शिष्टाचारपरम्परामनुसृत्य ब्रह्मकाण्डे प्रथमायां कारिकायां वस्तुनिर्देशात्मकं शब्दब्रह्मस्मरणरूपं मङ्गलमाचरति–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥** [2] इति ।

'अनादिनिधनं यदक्षरम् अर्थभावेन विवर्तते । यतो जगतः प्रक्रिया तत् शब्दतत्त्वं ब्रह्म' इति अस्याः कारिकाया अन्वयः ।

अनादिनिधनम् = आदिश्च निधनञ्च आदिनिधने, अविद्यमाने आदिनिधने यस्य तद्, उत्पत्तिविनाशशून्यम् अत एव नित्यम् । पूर्वापरीभावरहितम् अत उपसंहृतक्रमञ्च । यद् अक्षरम् = ककारादिवर्णरूपायाः वैखर्याः वाचः निमित्तं सद्, अर्थभावेन = अविद्यारूपया बाह्यार्थवासनया घटपटादिवत् विवर्तते = प्रतिभासते । यतः = उपसंहृतक्रमात् शब्दात् जगतः = विकारजातस्य प्रक्रिया = उत्पत्तिर्व्यवहारो वा जायते, तत् शब्दतत्त्वम् = पश्यन्तीवाग्रूपं ब्रह्म इति ।

**अत्र अवधेयम् -**

**'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।**
**अनेकतीर्थभेदायास्त्रय्या वाचः परमं पदम् ॥** इति ।[३]

'तिस्र एव वाचः परा वागेव पश्यन्ती'[४] इति च पक्षे 'पश्यन्तीवाग्रूपं ब्रह्म' इति कथनम् । यदि तु परा वाक् चतुर्थी तर्हि 'परा वाग्रूपं ब्रह्म' इत्यवगन्तव्यम् । अस्यां कारिकायां सर्वग्राह्य-ग्राहकाकारवर्जिता अपरिच्छिन्ना सर्वतः संहृतक्रमा पश्यन्तीवाग् ब्रह्म । अविद्यालक्षणया अन्तः पश्यदवस्थया भोक्तृत्वरूपया विशिष्टं ज्ञेयरूपशून्यं चैतन्यमात्रं तदेव जीवः, इति कथ्यते । यथा श्रीमद्भागवतमहापुराणे -

**'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।**
**मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरा वर्ण इति प्रविष्टः ॥**[५] इति ।

पश्यन्तीरूपः शब्दः अर्थप्रतिपादनेच्छया उपलक्षितः । मनोविज्ञानरूपत्वे आस्थितः मध्यमावाग् इत्यभिधीयते । सा एव वक्तृकुहरमागता ताल्वादिस्थानभागेषु विभक्ताकारादिवर्णरूपा वैखरीवाक् कथ्यते । अनन्तरं सा एव बाह्यार्थवासनया अविद्यारूपया क्रमेण घटपटादिरूपे चक्षु-रादिना गृह्यते । अपि च सर्वेषु अर्थजातेषु शब्दान्वयदर्शनात् सर्वपदार्थनिरूपिता कारणता शब्दे सिद्ध्यति । अत एव 'शब्दब्रह्म' इदमेकम् अविद्योपाधिदर्शितविचित्रभेदम् अविद्योपरमे यथा-वस्थितरूपं प्रकाशते । 'वागेव विश्वा भुवनानि जज्ञे, वाच इत्सर्वममृतम् यच्च मर्त्यम्'[६] इति श्रुतिवचनमपि अमुमेवार्थं द्रढयति ।

वाक्यपदीयटीकाकारेण अक्षरमिति पदस्य अक्षरस्य = विभक्तककारादिवर्णस्य निमित्तमिति व्युत्पत्तिः कृता । अपि च न क्षीयते न क्षरतीति वा अक्षरम् । अशू व्याप्तौ इत्यस्माद्धातोः 'अशेः सरः'[७] इत्यौणादिकसरप्रत्ययत् अश्नोतेर्वा सरोऽक्षरम्, अश्नुत इत्यक्षरम्, इत्यादिव्युत्पत्त्याधारेण उत्पत्तिविनाशरहितम्, नित्यम्, व्यापकं वर्णादिकार्यशब्दानां निमित्तं स्फोटात्मकं ब्रह्म, वर्णाश्च अक्षरपदविशेषत्वेन वर्तन्ते । एवमत्र कारिकायाम् 'अनादिनिधनम्' इति पददर्शनेन वर्णस्य च तथात्वाभावेन उत्पत्तिविनाशशालित्वेन च वर्णा अक्षरपदवाच्या न सन्ति, अपितु ब्रह्म एव तद्वाच्यः। अनादिनिधनत्वे सति अक्षरत्वे च सति शब्दतत्त्वं ब्रह्म इति । वस्तुतः ओ३ङ्कार एव शब्दब्रह्म । 'ओ३मिति ब्रह्म'[८] 'परं चापरं ब्रह्म यदो३ङ्कारः'[९] इत्यादिश्रुतिभ्यः । स एव ओ३ङ्कारः 'अक्षरम्' इत्युच्यते । स च पदवाच्यो वाक्यवाच्योऽपि वर्तते । तत्र उपनिषत्प्रमाणम्, यथा -

**'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओ3मित्येतत् ॥**
**एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।**
**एतद्ध्येवाक्षरं ज्ञात्वा यदिच्छति तस्य तत् ॥**[१०] इति ।

एवञ्च 'विवर्ततेऽर्थभावेन' इत्यनेन ब्रह्मणः वर्णनिमित्तत्वमपि स्फुटमेव । इत्यतः उत्पत्तिविनाशशून्यरूपार्थस्य पूर्वापरीभावरहितस्य नित्यस्य वा अभिप्रायस्य अनादिनिधनमिति पदेनैव लाभादत्र 'अक्षरम्' इति पदस्यार्थः व्यापकम् अक्षरस्य निमित्तञ्चेति निष्पद्यते । अस्यां कारिकायाम् 'अनादिनिधनम् अक्षरं शब्दतत्त्वं ब्रह्म अर्थभावेन विवर्तते' इति प्रतिपादितम् । अत्र 'विवर्तते' इति पदेन वाक्यपदीयकर्तुः किमभिप्रेतम् ? इत्यपि अत्र विचार्यते –

**को नाम विवर्तः ?**

अत्र विवर्तपदार्थकथने विवर्तपरिणामयोः को भेदः? भेदोऽभेदो वा ? इत्यादिप्रश्न-विवेचनावसरो लभ्यते । तर्हि कोऽयं विवर्तपदार्थः ? कश्च परिणामपदार्थः ? इति जिज्ञासा समुदेति । तत्र 'अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरि'[११] इति वचनमनुसृत्य तत्त्वाद् अप्रच्युतात् कारणात् कार्यनिष्पत्तिरेव विवर्त्तः । यथा – शुक्तौ 'इदं रजतमि'ति ज्ञानम् । अपि च 'सतत्त्वतोऽ-न्यथाप्रथा विकार इत्युदीर्य्यते'[१२] इति वचनमधिकृत्य तत्त्वात् प्रच्युतात्कारणात् कार्यसिद्धिरेव विकारः । तदेव परिणामपदेन अभिधीयते । यथा – 'दुग्धं दधि भवती'ति परिणामः। एवम् अधिष्ठानसमसत्ताक – कार्यापत्तिः परिणामः, अधिष्ठानविषमसत्ताककार्यापत्तिः विवर्त इति अवगन्तव्यः । भवभूतिविरचिते उत्तररामचरिते विवर्तपरिणामपदयोः पर्यायेण प्रयोगः प्राप्यते । तद्यथा–

> **'एको रसः करुण एव निमित्तभेदात्**
> **भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।**
> **आवर्तबुद्बुदतरङ्गमयान् विकारान्**
> **अम्भो यथा सलिलमेव तु तत्समग्रम् ॥'[13]इति ।**

तथैव शान्तरक्षितेन तत्त्वसङ्ग्रहे वाक्यपदीयकारस्य अनादिनिधनमिति कारिकायाः अर्थतोऽनुवदता विवर्तपदं विहाय परिणामपदमेव प्रयुक्तमस्ति । यथा –

> **'नाशोत्पादा समालीढं ब्रह्म शब्दमयं च यत् ।**
> **यत्तस्य परिणामोऽयं भावग्रामः प्रतीयते ॥** [14] इति ।

वैयाकरणानां सिद्धान्ते भावग्रामो हि शब्दब्रह्मणो विवर्त एव, न तु परिणामः । परं स एव विवर्तः अस्मिन् पद्ये परिणामपदेन अभिहितः । एवमेव उत्तररामचरिते विवर्तपदस्यार्थे परिणामशब्दस्य व्यवहारः कृतोऽस्ति । उपर्युक्तरीत्या विवर्तपरिणामयोरभेदे सिद्धे विवर्तवाद एव वैयाकरणानां सिद्धान्तः । यद्यपि भर्तृहरिणा 'विवर्ततेऽर्थभावेन'[१५] 'शब्दस्य परिणामोऽयम्'[१६] इत्यु-भयथा व्यवहारः कृतस्तथापि अद्वैतवेदान्तरीत्या अत्रापि स्फोटरूपस्य शब्दब्रह्मणोऽखिलं जगद् विवर्तः । वस्तुतः स्फुटत्यर्थो यस्मात् स स्फोटः इत्यन्वर्थतया अद्वैतवेदान्तसिद्धब्रह्मैव शब्दब्रह्म । यद्वा स्फोट इति निगद्यते । वाक्यपदीयकारेण स्वग्रन्थे सर्वत्र अद्वैतवादस्यैव समर्थनात्तस्य विवर्तवाद

एवाभिप्रेत इत्यस्माभिः अवगन्तव्यः । तथा च ब्रह्मणो विवर्तः ध्वनिरूपप्रकृतेश्च परिणामरूपं जगत्, इति विवर्तवाद एव वैयाकरणानां सिद्धान्तः ।

अनादिनिधनमित्यस्यां कारिकायाम् अक्षरमेकं नित्यं सर्वथा क्रमादिरहितं स्फोटात्मकं शब्दब्रह्म विचित्रभेदादिसमन्वितं जगद्रूपेण विवर्तत इत्युक्तम् । तत्र एकस्यैव शब्दब्रह्मणः कथं विचित्रघटपटादिकार्यजनकत्वम् ? इति जिज्ञासायां सत्याम् –

**'एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।**
**अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥** [17] इति ।

'यद् एकमेव आम्नातम्, तत् शक्तिव्यपाश्रयात् भिन्नं (प्रतीयते) अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेन इव वर्तते' इति अस्यान्वयः ।

यत् = शब्दब्रह्म, 'एकमेवाद्वितीयम्'[१८] 'सलिल एवैको द्रष्टाऽद्वैत एक एवाभवत्'[१९] 'वाग् वै सरिरम्'[२०] इत्यादिश्रुतिभिः 'अनादिनिधनमि'त्यादिकारिकया च एकमेव = केवलमद्वितीयम्, आम्नातम् = कथितं व्याख्यातं वा, तत् = शब्दब्रह्म, घटपटादिविचित्रकार्यनिष्पादनयोग्यतारूपाणाम्, व्यपाश्रयात् = आश्रयणात्, भिन्नम् = पृथक् पृथग् रूपेण प्रतीयते । ब्रह्मण एकत्वेऽपि तद्गतशक्तिवैचित्र्याद् भेदमारोप्य विचित्रकार्यजनकत्वमिति भावः ।

**अपृथक्त्वेऽपि पृथक्त्वं कुतः ?**

अप्रच्युतस्य एकस्य वस्तुनः कथं नानारूपता? इत्याशङ्कायामाह 'अपृथक्त्वेऽपी'त्यादि । अपृथक्त्वेऽपि ब्रह्म शक्तिभ्यः पृथक्त्वेनेव वर्तते । शक्तिभेदमङ्गीकृत्य भिन्नमिव अवभासते, न तु वस्तुतो भिन्नरूपमित्यर्थः । यथा आवर्तबुद्बुदतरङ्गादयो जलविकाराः भिन्नरूपेण प्रतीयमाना अपि जलमेव, न ततो व्यतिरिक्ताः । यथा घटपटादयो विकाराः परस्परं भिन्ना अपि पृथिवी एव। यद्वा यथा कटककुण्डलात्मकादिविकाराः भिन्नरूपेण प्रतीयमाना अपि तत् समस्तं सुवर्णमेव । एवं शब्दब्रह्म अपि घटपटादिपदार्थोभयविधकार्यसम्पादनशक्तिभ्यां विभिन्नरूपेण प्रतीयते । वस्तुतस्तु स्फोटात्मकं ब्रह्म अभिन्नमेव । शक्तयो ब्रह्मण एकत्वं न विरुन्धन्ति । कटक-कुण्डलादिरूपेण भिन्नत्वेऽपि सुवर्णस्य स्वतोऽभिन्नत्ववत् शक्तिरूपेण ब्रह्मणो भिन्नत्वेऽपि तस्याभिन्नत्वमिति शब्दब्रह्मणि नानात्वं काल्पनिकम्, एकत्वञ्च वास्तविकम्, इत्यत्र न काचिद् विप्रतिपत्तिः । 'वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम्'[२१] इत्यादिश्रुतेः ।

शब्दब्रह्मगतशक्तीनां नानाविचित्रकार्योपपादकत्वे नित्यानां तासां सर्वदा सत्त्वादपि नियामकत्वेन न सर्वदा सर्वकार्योत्पत्तिः । यासां शक्तीनाम् आश्रयणाद् एकं ब्रह्म नानाविचित्र – रूपेणावभासते तासु सर्वप्रधाना स्वतन्त्रा च कालशक्तिर्विद्यते ।

**यथा –**

**'अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥**[२२] इति ।

यस्य अध्याहितकलां कालशक्तिम् उपाश्रिता: जन्मादय: षड्विकारा: भावभेदस्य योनय: (भवन्ति) इत्यन्वय: ।

यस्य = ब्रह्मण:, अध्याहित – आरोपित: कलाभेद: यस्यास्ताम् अध्याहितकलाम्, कालशक्ति: = विश्वात्मा एक एव परं ब्रह्माभिधानं सत्यो भाव:, स एव नानाविधकार्यकारितया अनन्यशक्तिमत्त्वेन व्यवह्रियते । तस्य स्वातन्त्र्यशक्ति: काल: । अर्थात् तस्य ब्रह्मण: स्वातन्त्र्यशक्ति: कालो निमेषादिक्रियोपहितत्वात् नानात्वयुक्तो वर्तते । तां ब्रह्मणोऽध्याहितकलाम्, कालशक्तिमुपाश्रिता जन्मादय: = जायते, अस्ति, विपरिणमते, वर्द्धते, अपक्षीयते, नश्यतीत्येवंविधा: षड्विकारा:, भावभेदस्य = नैकविधपदार्थभेदस्योत्पत्तेर्वा, योनय: = कारणानि भवन्ति । विश्वात्मनो ब्रह्मणोऽभिन्नेनापि स्वातन्त्र्यशक्तित्वेन कालेन औपाधिकभेदमादाय भिन्नत्वमापन्नेन भावभेदस्य कारणानि स्वीकृतानि । इत्थमेकस्यापि कालस्य क्रमरूपतया क्रमवत्कार्यजनकत्वम्, इति ।

**शब्दे भावभेदस्य योनित्वम् –**

सर्वा: कारणशक्तय: कालेनानुज्ञाता: सत्य: कार्यमुत्पादयन्ति । प्रतिबद्धाश्च सत्य: कार्यं नोत्पादयन्ति । हेमन्तादिकाले प्रतिबद्धा: वसन्तादिकाले अनुज्ञायन्त इति कालशक्ते: स्वातन्त्र्यं विद्यते । अन्यासां च कालपारतन्त्र्यमपि । यथा लुब्धका: पक्ष्यन्तराणां ग्रहणाय सूत्रप्रतिबद्धान् पक्षिणश्चेष्टयन्ते तथा च ते सूत्रप्रतिबन्धात् अस्वतन्त्रा एव भवन्ति । तथैव इच्छायां तन्तुनाकर्षणात् । एवं कालसूत्रप्रतिबन्धात् पदार्था: सङ्कोचविकासलक्षणौ उत्पत्तिध्वंसौ अनवरतम् अनुभवन्ति । निरुक्तकारोऽप्याह'पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीव्युत्क्रमप्रभृत्य-पवर्गपर्यन्तम्'[२३] इति । अत एव कालसूत्रान्तर्गतं विश्वं प्राप्तकालं प्रसूयत इति 'जायते' इति व्यवह्रियते । प्रसूतमवतिष्ठते अतोऽस्तीति व्यपदिश्यते । अवस्थितस्य विकारापत्तिरिति 'विपरिणमते' । तच्च विपरिणमत् मुहूर्तमपि नावतिष्ठत इत्यतो 'वर्द्धते' इति । यावत् अनेन वर्द्धितव्यम् ततो मुहूर्तमपि अनवस्थानादेव अवसीयत इत्यत: 'अपक्षीयते' । ततोऽपि मुहूर्तमपि अनवस्थानादेव तत अवस्थितकृतकरणीयं 'विनश्यति' इति षड्भावविकारा: सर्वभावभेदस्य योनयो भवन्तीति सिद्ध्यति । एतत्सर्वं वाक्यपदीयस्य तृतीयकाण्डे कालसमुद्देशप्रकरणे भर्तृहरिणा विस्तरेण प्रतिपादितम् । यथा –

**'उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम् ।**
**निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम् ॥** [24] इत्यादि ।

एवं हि कालशक्ते: अनन्तशक्तीनां प्रतिबद्धानुज्ञाकरणेनैव नित्यानां स्फोटात्मकशब्दब्रह्म-निष्ठशक्तीनां सर्वदा विद्यमानतायामपि न सर्वदा सर्वकार्योत्पत्ति: । पूर्वस्यां कारिकायां ब्रह्मणो नानात्वस्यापि सर्वकार्यजनकत्वं सयुक्तिकम् उपपादितम् । तस्य शब्दब्रह्मण: सर्वव्यवहार-हेतुत्वस्थितिम् उपपादयति –

**'एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।**
**भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥** [25] इति ।

सर्वबीजस्य यस्य एकस्य इयं स्थितिः । अनेकधा भोक्तृभोक्तव्यरूपेण भोगरूपेण च (वर्तते) इत्यन्वयः ।

सर्वबीजस्य = सर्वजगतः कारणस्य यस्यैकस्य ब्रह्मण इयं तत्त्वान्यत्वाभ्याम् अनिर्वाच्या, ब्रह्मत्वेन ब्रह्मभिन्नत्वेन च व्यपदेष्टुम् अशक्या । शक्तिरूपा स्थितिः लोकव्यवहाराय अनेकधा भोक्तृभोक्तव्यरूपेण भोगरूपेण च प्रवर्तते । अत्र भोक्ता पुरुषः, भोक्तव्या विषयाः । विषयोपभोगजन्यसुखदुःखाद्यनुभवो भोगः, इति । उक्तञ्च यथा –

**'सर्वशक्त्यात्मभूतत्वमेकस्यैवेति निर्णयः ।**
**भावानामात्मभेदस्य कल्पना स्यादनर्थिका ।।'**[26] इति ।

**शब्दब्रह्मणः स्थितिः –**

यद्यपि ब्रह्म एकमेव, तथापि सदसद्भ्याम् अनिर्वचनीया विरुद्धकार्यप्रसवानुमितविरोधाः शक्तयः एकस्मिन्नधिष्ठाने ब्रह्मणि यौगपद्येन वृत्तेर्विरोधिन्यो भवन्ति । श्रुतिभिरस्य ब्रह्मणः पराशक्तिः विविधा एव ज्ञायते । तद्यथा – 'इन्द्रो मायाभिः पुरुरूप ईयते'[२७] इति । ताभिः शक्तिभिः रूपविभागः प्रविभक्तेषु च रूपेषु जीवेषु भोक्तृभोक्तव्य-भोगग्रन्थयोऽनादिभाव-सञ्चितानुभव-जनित-वासनाः स्वप्नविज्ञानपुरुषवद् अबहिस्तत्त्वाः । अयञ्च शब्दब्रह्मणो विवर्तः तदुपाधिभूतानां तत्तद्वासनानुविद्ध-शक्तीनां परिणाम एवास्ति । तस्य च ब्रह्मणः वासनानां विवर्ते सति इयमनेकधा भोक्तृभोक्तव्यभोगरूपेण लोके व्यवहारव्यवस्था प्रकल्प्यते । एवं हि एकमेव शब्दब्रह्म 'सर्वशक्तिः' इतिप्रमाणेन सिद्धे अविद्याप्रकल्पितस्य भावभेदस्य अपारमार्थिकत्वात् कार्यवैविध्यरूपेण उन्नीयमानः शक्तिभेद एकस्यैव युक्तो न तु स्वरूपभेदे ।

**निष्कर्षः**

वस्तुतस्तु वाक्यपदीयब्रह्मखण्डे महावैयाकरणेन भर्तृहरिणा व्याकरणमहाभाष्यस्य पस्पशाह्निकोक्तः स्फोटसिद्धान्तः सविस्तरेण प्रतिपादितः । परं न केवलं तावदेव, श्रुतिस्मृत्यादिषु सविस्तरं वर्णितं समग्रमपि शब्दब्रह्मणः स्वरूपं तेन ब्रह्मकाण्डे उक्तमस्ति । श्रुतिस्मृतिपुराणादिग्रन्थेषु शब्दब्रह्मणः स्वरूपम् इदमित्थमस्ति –

**'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥** [28] इति मैत्रायण्युपनिषदि ।

इदमेव पद्यं महाभारतेऽपि शान्तिपर्वणि[२९] एवमेव पठितम् । एवं ब्रह्मपुराणे[३०] नारदपुराणे पूर्वार्द्धे[३१]अपि अस्योल्लेखः प्राप्यते । श्रीमद्भगवद्गीतायां शब्दब्रह्माख्यानम् 'जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ।'[३२] इत्यादिरूपेणास्ति । 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा'[३३] इति

महाभारतस्यार्द्धपद्यांशेन अनादिनिधनता प्रोक्ता । वाक्यपदीयकारेण 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरमि'ति श्लोकार्द्धेन अभिहिता । 'विवर्ततेऽर्थभावेने'ति उत्तरार्धस्तु –

**'शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः ।**
**ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ॥** [34]

इति श्रीमद्भागवतोक्तश्लोकेन समर्थ्यते । अस्य चतुर्थश्चरण 'एकमेवाम्नातमि'त्यादिषु उत्तरवर्तिकारिकाष्वनुगच्छति । 'जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यती'ति[३५] वार्ष्यायण्युक्तानां षण्णां भावविकाराणां कालं लक्ष्यीकृत्य 'अध्याहितकलामि'ति कारिकया शब्दब्रह्मणो नानाशक्तयः प्रदर्शिताः । इत्थमुत्तरकारिकास्वपि विविधाः शक्तयः विवेचिताः सन्ति । ताश्च शक्तयो यथा–'अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु ।'[३६] 'निर्ज्ञातशक्तेर्द्रव्यस्य सा शक्तिः प्रतिबध्यते ।'[३७] 'सङ्कीर्णा इव शक्तयः ।'[३८] 'अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः ।'[३९] 'स्वशक्तौ व्यज्यमानायाम् ।'[४०] 'तस्य प्राणे च या शक्तिः ।'[४१] 'शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।'[४२] 'शब्दानामेव सा शक्तिः ।'[४३] इत्यादि ।

उत्पत्तिविनाशरहितम्, नित्यम्, व्यापकम्, पूर्वापरीभावरहितम्, शब्दार्थोभयरूपम्, अकारादिवर्णसमुदाय-रूपपदस्य सर्वलोकव्यवहारस्य च निमित्तं यत्, तच्छब्दतत्त्वं परावाग्रूपं स्फोटात्मकं ब्रह्म । तदेव नानापदार्थरूपेण भासते । तस्मादेव जगतः प्रवृत्तिः सर्वव्यवहारश्च जायते ।यथा प्रकाशस्य एकत्वेऽपि तत्तत्प्रकाशाकारावग्रहकृत आरोपितः प्रकाशे पृथक्त्वव्यवहारः तथैव ब्रह्मणोऽपृथक्त्वेऽपि शक्तिभेदतः पृथक्त्वावभासः आरोपितः । प्रकाशादभेदेन प्रकाश्यमानानां परस्परं भिन्नत्वं नहि । एवं भिन्नाः शक्तयो विकारमात्राश्च शब्दब्रह्मणः पृथक्त्वेन प्रतीयमानत्वेऽपि न भिन्नाः । यद्यपि सर्वेऽपि विकाराः स्वस्वकारणाधीनाः तथापि तेषां सर्वेषामुत्पत्तौ कालशक्तिः सहकारिकारणं तु भवत्येव । कालशक्तिः काञ्चित् कारणशक्तिं प्रतिबध्नाति काञ्चिच्च ना । अतः प्रतिभावं क्रमेण नानारूपत्वम् अनुभूयते । तेन क्रियाविशेषस्य ब्रह्मरूपसत्ताविकारविशेषस्य षड्भावविकारा योनयः सम्पद्यन्ते । ब्रह्म एकमेवाम्नातं, सत्स्वपि यौगपद्येन वृत्तेः अविरोधिनीष शक्तिषु अस्ति । 'परास्य शक्तिर्विविधैव श्रूयते'[४४] इत्यादिश्रुतिभिः । ताभिः शक्तिभिः ब्रह्मण अनेकधा विभेदः प्रकल्प्यते । स च ब्रह्मणो विवर्तरूपः । तदुपाधिभूतानां तत्तद्वासनानुविद्धानां शक्तीनां तु परिणाम एव । ब्रह्मणो ग्रन्थ्यन्तररूपसमतिक्रमेण स्थितानां ग्रन्थीनां वासनानां विवर्ते सति इयमनेकधा शक्तिः भोक्त्रादिरूपेण लोके व्यवहारव्यवस्था प्रकल्प्यते ।

मोक्षप्रतिबन्धद्वारनिरसनाय व्याकरणशास्त्रस्य अध्ययनं परमावश्यकं भवति । व्याकरणसंस्कृतचेतसा वैखर्या पूर्वं मध्यमां प्राप्य वाग्विकाराणां प्रकृतिं समस्तपदार्थहेतुभूताम् आवृतां पश्यन्तीम् अनुसरति । ततः शब्दपूर्वयोगाभ्यासभावनावशाद् अनावृतां पश्यन्तीं पराख्यम् अधिगच्छतीति तदधिगमश्च तत्तादात्म्यम्, तदेवापवर्गः ॥

**सन्दर्भाः**


1. पाणिनीयसूत्राष्टाध्यायी - ४/३/८८ ।
2. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १।
3. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १४३ ।
4. शिवदृष्टिः - २/१ ।
5. श्रीमद्भागवतम् - ११/१२/१७ ।
6. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १२० टीकायाम् ।
7. वैयाकरणसिद्धान्तकौमुदो, उणादयः - ३५० ।
8. तैत्तिरीयोपनिषत् - १/८/१ ।
9. प्रश्नोपनिषत् - ५/२ ।
10. कठोपनिषत् - १/२/१५-१६ ।
11. वेदान्तसारः - ४७ ।
12. वेदान्तसारः - ४७ ।
13. उत्तररामचरितम् - ३/४७ ।
14. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १ तत्त्वसङ्ग्रहः ।
15. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १ ।
16. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १२० ।
17. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - २ ।
18. छान्दोग्योपनिषत् - ६/२/१ ।
19. बृहदारण्यकोपनिषत् - ४/१/३१ ।
20. शतपथब्राह्मणम् - ७/५/२/५३ ।
21. छान्दोग्योपनिषत् - ६/१ ।
22. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - ३ ।
23. निरुक्तम् - १/१/११ ।
24. वाक्यपदीयम्, पदकाण्डम्, कालसमुद्देशः, कारिका - ३ ।
25. वाक्यपदीयम्, ब्रह्मकाण्डम् कारिका - ४ ।
26. वाक्यपदीयम्, पदकाण्डम्, कारिका - १२।
27. ऋग्वेदसंहिता - ६/४७/१८ ।
28. मैत्रायण्युपनिषत् - ६/२२ ।
29. महाभारतम्, शान्तिपर्व - १२/२३२/३० ।
30. ब्रह्मपुराणम् - २३४/६१-६२ ।
31. नारदपुराणम् - ४६/८ ।

32. श्रीमद्भगवद्गीता - ६/४४ ।
33. महाभारतम्, शान्तिपर्व - २३२/२४ ।
34. श्रीमद्भागवतम् - ३/१२/४८ ।
35. निरुक्तम् - १/१/३ ।
36. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - ३२ ।
37. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - ३३ ।
38. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १८ ।
39. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - ११०।
40. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १११ ।
41. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - ११७ ।
42. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - ११८ ।
43. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका - १३० ।
44. श्वेताश्वतरोपनिषत् - ६/८ ।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई - 77**

★★★

# 'इष्यते पुत्रः' इत्यत्र क्यजभावस्य रहस्यम्

✍ब्र. अजयः

**(व्याकरणे दीक्षितप्रभृतयः सर्वत्रैव भावे, कर्म्मणि, कर्त्तरि च व्यापारमुख्य- विशेष्यकं, नागेशादयश्च कर्म्मणि फलमुख्यविशेष्यकं शाब्दबोधं स्वी- कुर्वन्ति । तत्र नव्यनागेशादीनां मते यन्महाभाष्यस्य 'सुप आत्मनः क्यच्' इत्यंशः प्रमाणत्वेन सम्मन्यते, तदंशमेवाश्रित्य लेखकेन विषयविश्लेषण- पूर्वकमत्र निष्कर्षमुपन्यस्यति । - स.)**

'सुप आत्मनः क्यच्' (अष्टा. 3.1.8) इति सूत्रस्य भाष्य एकः प्रसङ्ग आयाति यत्, कर्तृवाच्ये - आत्मनः पुत्रमिच्छति - पुत्रीयतीतिवद् 'आत्मनः पुत्रः इष्यते' इति कर्मवाच्ये, 'इष्टः पुत्रः' इति कर्मक्तान्तस्थले च क्यच्प्रत्ययः स्याद्वा न वेति । तत्र भाष्यकारेण निदर्शितं यद् - 'अथेह क्यचा भवितव्यम्? इह भवन्तस्तावदाहुः न भवितव्यम् इति । किं कारणम्? यश्चेहार्थो वाक्येन गम्यते 'इष्टः पुत्रः' 'इष्यते पुत्रः' इति नासौ जातुचित् प्रत्ययान्तेन गम्यते' इति । प्रदीपकारः कैयटोऽत्र व्याचिख्यासया लिखति - 'यदा क्रियाफलस्य कर्मणः प्राधान्यं प्रतिपि-पादयिषति तदा वाक्यमेव प्रयुज्यते 'पुत्रः इष्टः' इत्यादि, न तु क्यजन्तः ।' अनेन भाष्यप्रघट्टकेन स्पष्टं लक्ष्यते यद् - भाष्यकार आत्मनः पुत्रमिच्छतीति कर्तृवाच्ये, आत्मनः पुत्र इष्यत इति कर्मवाच्ये (अन्यच्च कर्मक्तान्तस्थलेऽपि) च भिन्नार्थत्वमङ्गीकुरुत इति । पदानां या विधिरस्ति स समर्थानामेव भवति । यथा - आत्मनः पुत्रमिच्छतीति विग्रहे योऽर्थः प्रतीयते, सः क्यजन्तेन पुत्रीयतिनाप्यवबुध्यते । अतः समर्थत्वात् विवरणविव्रियमाणयोः समानार्थत्वाच्च निष्प्रत्यूहं क्यज् भवत्यत्र, परन्तु कर्मणि क्तान्ते च विवरणविव्रियमाणयोरैकार्थ्याभावान्न क्यज् भवति । सा चासमर्थता (भिन्नार्थता) एवंविधा -

अखिलशब्दसागरस्य तारणसाधनभूतधातोरर्थद्वयं स्वीकृतं तत्रभवद्भिः सर्वैः (प्राच्यैः, नव्यैश्च) शाब्दिकैः - फलम्, व्यापारश्चेति[1] । तत्रापि फलमिति - धात्वर्थव्यापारेणोत्पन्नं सत्, तद्धातोरेवार्थभूतं 'फलम्'[2] इति परिष्कृतपरिभाषोपात्तं शाब्दिकनयेन । तिङर्थाश्च कर्तृकर्मसंख्याकालाः । यद्यपि पाणिनिना कर्तृकर्मणी अर्थौ लकारस्यैव विहितौ तथापि उच्चारित एव शब्दोऽर्थस्य प्रत्यायको भवति, नानुच्चारित इति भाष्यानुरोधात्[3], लोके तथैवानुभवाच्च (पच् + ल् इत्युक्ते कर्तृकर्मार्थाधिगमाभावाच्च) तदादेशतिङामेवार्थावित्यूरीक्रियते[4] ।

तत्र आख्यातार्थकर्मण फलाश्रयत्वात्[5], कर्मण आधेयतासम्बन्धेन धात्वर्थफलेऽन्वयः । कर्त्तुश्च व्यापाराश्रयत्वात्[6], आख्यातार्थकर्तुः धात्वर्थव्यापारेऽन्वयः । संख्या तु कर्तप्रत्ययसमभि-

व्याहारे कर्तरि, कर्मप्रत्यययसमभिव्याहारे च कर्मण्यन्वेति । कालस्तु धात्वर्थव्यापरे विशेषणम्[7] ।[8] शाब्दबोधे च व्यापारप्रधानबोधो भवति 'भावप्रधानमाख्यातम्' (निरु. अ. 1, खण्ड 1) आख्यातम् – धातुः, भावप्रधानम् – व्यापारप्रधानो भवतीति यास्कवचनप्रामाण्यादित्युदीरितं तत्रभवद्भिः प्राच्यशाब्दिकैः कौण्डभट्टप्रभृतिभिः[9] । तथा च देवदत्त आत्मनः पुत्रमिच्छति – पुत्रीयतीत्यस्य – देवदत्ताभिन्नाश्रयक आत्म(स्व) जन्यपुत्राभिन्नविषयकेच्छानुकूलो वर्तमानकालिको व्यापार इति कर्तरि, देवदत्तेनात्मनः पुत्र इष्यत इति कर्मणि च – देवदत्ताभिन्नाश्रयक आत्म (स्व) जन्यपुत्रविषयकेच्छानुकूलो वर्तमानकालिको व्यापार इति बोधः । उभयत्रापि व्यापारस्यैव प्रधानतया बोधः । तत्कुतः समानार्थभानभङ्ग इति शङ्का वर्तत ?

'फले प्रधानं व्यापारः'[10] इति भूषणसारकारिकांशानुरोधात् धात्वर्थव्यापारस्य प्राधान्यात्, फलस्य प्रकारत्वम् – विशेषणत्वं प्राप्तम् । कर्तृकर्मभाववाच्यानां च शाब्दबोधेषु व्यापारस्यैव प्रधानतया बोधः । यथा च प्रदर्शितं श्रीकौण्डभट्टेन – 'पचतोत्यत्रैकाश्रयिका पाकानुकूला भावना। पच्यते इत्यत्रैकाश्रया या विक्लित्तिस्तदनुकूला भावनेति बोधः'[11] इति । तथैव 'इष्' धातोरपि कर्तृवाच्ये कमवाच्ये च व्यापारस्यैव प्रधानतया बोधो भवति । यथा च तत् प्रदर्शितम्पूर्वमेव । उभयत्रापि व्यापारस्यैव प्राधान्ये गम्यमानेऽपि भाष्यकारः 'आत्मनः पुत्रमिच्छती'ति कर्तृवाच्ये विवरणेन व्यापारस्यार्थो मुख्यरूपेण बोध्यते, विव्रियमाणप्रत्ययान्तेन च व्यापारस्यैव प्रधानतावगम्यत इति समानार्थमूरीकृत्य पुत्रीयतीति क्यच् साधयति, अपरत्र 'आत्मनः पुत्र इष्यत' इति कर्मवाच्ये तु विवरणविव्रियमाणयोर्भिन्नार्थमङ्गीकृत्य गदति – 'यश्चेहार्थो वाक्येन गम्यते नाऽसौ जातुचिद् प्रत्ययान्तेन गम्यत' इति । तदेतत् भाष्यकथनं प्राच्यमतानुसारं शाब्दबोधमाधृत्य परिशीलिते न सङ्गच्छते । यतो हि – 'यः समानविशेष्यकबोधजनको भवति सः समानार्थक एव भवति' इति सिद्धान्तस्य स्वीकृतत्वात् । अतस्तत्संगत्यै भिन्नप्रकारकं शाब्दबोधमादाय परिशीलनीयम् । यस्मिन् कर्तृवाच्ये व्यापारस्य प्राधानतया गम्यते, कर्मणि च तद्भिन्नप्रकारेण बुद्धिः संलगेत् । तच्च वर्तते नव्यानाम् । अत एव दर्पणे – 'कर्माख्याते भावनाविशेष्यकबोधोपवर्णनन्तु प्राचामनुरोधेन' इत्युक्तः भवति, तेन नव्यानां शाब्दिकनये तद्भिन्नः शाब्दबोधः । तेषां हि मते कर्माख्याते फलविशेष्यः शाब्दबोधः । एवञ्च व्यापारप्रधानत्वमङ्गीकर्तृणां प्राच्यानां व्यापारस्यैव प्राधान्यबोधः । अन्यादृग्-व्युत्पत्तिमतां नव्यानाञ्च अन्यथा – फलविशेष्यकबोधः । तथा च वर्णयति नागेशः – 'कर्मणि च फलस्य विशेष्यत्वम् 'इष्टः पुत्रः' इत्यादौ सामानाधिकरण्यानुरोधेनावश्यमङ्गीकार्य- मिति'[12]

तदेवं नव्यानां मते कर्तरि कर्मणि च शाब्दबोध एवं प्रकारकः – देवदत्त आत्मनः पुत्रमिच्छति – पुत्रीयति – 'देवदत्ताभिन्नैककर्तृक आत्म (स्व) जन्यपुत्रविषयकेच्छानुकूलो वर्तमानकालिको 'व्यापारः' इति कर्तरि । देवदत्तेनात्मनः पुत्र इष्यत इति कर्मणि तु – 'देवदत्ताभिन्नैककर्तृनिष्ठवर्तमानकालिकव्यापारजन्या आत्म(स्व)जन्यपुत्रविषयिका 'इच्छा' इति । एवमेव – देवदत्तेनात्मनः पत्र इष्ट इति कर्मक्तान्ते च – देवदत्ताभिन्नैककर्तृनिष्ठभूतकालिक-

व्यापारजन्या आत्म(स्व)जन्यपुत्रविषयिका 'इच्छा' इति । प्राच्यानान्त्वत्र - 'देवदत्ताभिन्नैक-कर्तृनिष्ठ आत्म(स्व)जन्यपुत्रविषयकेच्छानुकूलोऽतीतो 'व्यापार'इति ।[13]'

एवञ्च कर्तृशाब्दबोधे व्यापारस्य प्राधान्यात्, कर्मशाब्दबोधे च फलस्य - इच्छायाः प्राधान्याच्च स्पष्टमुभयोः अर्थयोर्भिन्नता । अत एव नागेशेन वर्ण्यते - 'विग्रहे फलस्य विशेष्यतया, पुत्रीयतीत्यादौ व्यापारस्य विशेष्यतया भिन्नार्थत्वान्न तदर्थेऽयं क्यच्, किं तु पुत्रमिच्छतीत्यत्रार्थ एव'[14] इति । यतोहि - विशेष्यफलस्याश्रयरूपकमसद्भावात्, कर्मणि च क्य-जन्तस्य ('पुत्रीय' इत्यस्य) अप्रवृत्तित्वात् । यथा पदमञ्जर्यां हरदत्तो विषयेऽस्मिन् विचारयति- 'अथास्माल्लकृत्यक्तखलर्थाः भवन्तः क्व भवन्ति? यथायोगं भावे कर्तरि च, न तु कर्मकर्मणि । प्रकृत्यर्थविशिष्टाया नियतविषयाया इच्छायाः क्यजन्तेनाभिधानम्, न सा वस्त्वन्तरं विषयीकरोति, अतो जीवत्यादिव कर्मकः क्यजन्त'[15] इति । इदमित्थंप्रकारेण सिद्धं कर्मस्थले क्यचोऽप्रवृत्तित्वम्। सङ्गच्छत एवञ्च भाष्यस्येयं पंक्तिः - 'यश्चेहार्थो वाक्येन गम्यते 'इष्टः पुत्रः' 'ईष्यते पुत्रः' इति नासौ जातुचित् प्रत्ययान्तेन गम्यते' (म. भा. 3.1.6) इति ।

तत्र केचन यद्याशङ्केन् यद् - एवं मन्यमाने 'भावप्रधानमाख्यातमिति यास्कवचनविरोधः स्यात् इति चेत्, तन्न, यतो हि तत्र - भाव इति द्व्यर्थः - एकः - भाव्यतेऽनेनेति भावः - व्यापारः, अपरश्च - भावयत्येनमिति भावः - फलम् इति । सः प्रधानं मुख्यो यस्मिन्निति तद् भावप्रधानम् । कर्तृवाच्ये भावभूतस्य व्यापारस्य कर्मवाच्ये च भावभूतस्य फलस्य प्राधान्यमिति परमलघुमञ्जूषायाम् ।[16] एवमेव 'फले प्रधानं व्यापारः' (वै. भू. सारः 1.2) इति कारिकांशविरोधोऽपि न भवति - 'फले प्रधानं, फले अप्रधानमि'ति द्विधा विग्रहसंभवात् ।'

**सन्दर्भाः**

1. 'फलव्यापारयार्धातुः' (वैयाकरणभूषणसारः - 1.2), 'धातुः क्रियामेकफलां ब्रवीति' (ऋग्वेदानुक्रमणी - आख्यातनुक्रमणी - 1.10), '....फलस्यैकस्य साधकः........क्रियेति व्यपदिश्यते' (तत्रैव - 1.7)
2. तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थत्वं फलत्वम् (वै.भू.सारः - 1.2, दर्पणव्याख्या) ।
3. उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति । (म. हा. 1.1.69)
4. द्र. परमलघुमञ्जूषा - धात्वर्थनिरूपणम्, अपि च - बोधकतारूपा शक्तिस्तिङ्क्ष्वेवे. (वै.भू.सारः - 1.2)
5. फलाश्रयत्वं कर्मत्वम् ।
6. व्यापाराश्रयत्वं कर्तृत्वम् ।
7. तथाहि - वर्तमाने लट् इत्यत्राधिकाराद् धातोरिति लब्धम्, तच्च धात्वर्थं वदत् प्राधान्याद् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः (द्र.वै.भू.सारः - 1.2) । अपि चात्र 'क्रियाभेदाय कालस्तु.' (वा. प. 3.9.2) इति वाक्यपदीयवचनमप्युपोद्धलकम् ।

8. (ल.कर्मणि च. सूत्रविहित) कर्तृकर्मणी फलव्यापारयोर्विशेषणे, संख्या कर्तृप्रत्यये कर्तरि, कर्मप्रत्यये कर्मणि, समानप्रत्यय (कर्तृकर्मजनकतिङैव संख्याया अपि) उपात्तत्वात् (वै. भू.सार. – 1.2) ।
9. वै. भू. सारः – 1.2 ।
10. वै. भू. सारः – 1.2 ।
11. वै. भू. सारः – 1.2 ।
12. 'सुप् आत्मनः क्यच्' (म. भा. 3.1.8) उद्योतः ।
13. देवदत्तकर्तुः फलव्यापारयोः समवाय (अभिन्न) सम्बन्धेनान्वय इत्यवसेयमेतेषु शाब्दबोधेषु ।
14. महाभाष्यम् 3.1.8 उद्योतः ।
15. 3.1.8 पदमञ्जरी ।
16. क्रियाप्रधानमाख्यातमिति यास्कोक्तौ क्रियापदं करणव्युत्पत्त्या व्यापारपरं, कर्मव्युत्पत्त्या फलपरमिति बोध्यम् (द्र. दशलकारादेशार्थनिर्णयः)

## सन्दर्भग्रन्थसूची


1. वैयाकरणभूषणसारः, कौण्डभट्टः, सम्पा. चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2016 ।
2. दर्पणः, हरिवल्लः, सम्पा. चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2016 ।
3. ऋग्वेदानुक्रमणी, वेङ्कटमाधवः, सम्पा. विजयपाल विद्यावारिधि, रामलाल कपूर ट्रस्ट, सोनिपत – हरियाणा, 1979 ।
4. महाभाष्यम्, पजञ्जलि, सम्पा. भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2011।
5. परमलघुमञ्जूषा, नागेशभट्टः, सम्पा. लोकमणिदाहाल, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2013 ।
6. वाक्यपदीयम्, भर्तृहरिः, सम्पा. प्रो. हरिनारायण तिवारी, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 2015 ।
7. पदञ्जरी, हरदत्तमिश्रः, सम्पा. जयशङ्कर लाल त्रिपाठी, तारा बुक एजेन्सी, वाराणसी, 1986 ।



**वेदगुरुकुलम्, पिडिचेड,**
**गज्वेल, सिद्धिपेट,**
**तेलंगाणा – ५०२२७८**


★★★

# उदात्तादि स्वरों का स्वरूपविवेचन

✍आचार्य उदयन मीमांसक

**(संस्कृत वाणी की श्रेष्ठता में अनेकों कारक हैं, जिनमें से स्वरमीमांसा विलक्षण है । संसार की सभी भाषाओं के व्यवहार में यद्यपि आरोह-अवरोह का प्रयोग होता है, पर वह स्वरमीमांसा नहीं है । स्वर से अर्थ परिवर्त्तित होता है, साथ में वाक्शुद्धि होती है । किन्तु आरोह-अवरोह से अर्थपरिवर्त्तन तथा शुद्धता का कोई लेना-देना नहीं है । हाँ, व्यञ्जना में भेद होता है । वाच्यार्थ में कोई अन्तर नहीं पड़ता । किंबहुना, स्वर के साथ-साथ हस्तमुद्राएँ भी निश्चित हैं । इस तरह मुद्रा एवं स्वर सहित वाक् का ही संस्कृतवाक्त्व होता है । इस तरह की वाक् का भौतिक एवं आध्यात्मिक दोनों महत्त्व हैं । भारतवर्ष के वाग्योगियों ने महान् अनुसन्धान कर वाक् की समग्रता को ध्यान में रखकर जो स्वर विधान किया है, वह अद्भुत है । संसार के भाषावैज्ञानिकों से यह अंश अभी भी प्रच्छन्न है । अस्तु, उदयन मीमांसकजी का यह लेख अत्यन्त परिश्रम तथा मनोयोग का प्रतिफल है । इस लेख से हमें स्वरों के बारे में चिन्तन करने के लिए एक दृष्टि मिलती है । - स.)**

वैदिक वाङ्मय में उदात्तादि स्वरों का विशेष महत्त्व है । शतपथ ब्राह्मण में कहा गया है, 'आर्त्विज्यं करिष्यन् वाचि स्वरमिच्छेत् । तया वाचा स्वरसम्पन्नया आर्त्विज्यं कुर्यात् । तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एव' (श. ब्रा. 14.4.1.27) । यहाँ ऋत्विक्कर्म (यज्ञ) में मन्त्रों को स्वरयुक्त वाणी से बोलने का विधान है । साथ में यह भी कहा गया है कि ऐसे स्वरयुक्त ऋत्विक् को लोग देखने (सुनने) की इच्छा करते हं । सस्वर पाठ केवल श्रवण के सौष्ठव के लिए नहीं अपितु वेदार्थ जानने के लिए भी अनिवार्य है । वेंकटमाधव ने कहा भी है - 'अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित् । एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा' इति (ऋग्वेदानुक्रमणी 1.8.12) । महर्षि पतञ्जलि ने भी स्वर की अनिवार्यता का निरूपण किया - 'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्व्रजो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्' (तु. नारदीयशिक्षा 1.1.5) 'यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति' (म. भा. पस्प.) एकश्रुति पक्ष में स्वरों का प्रयोजन बतलाते हुए मीमांसा में शबरस्वामी ने कहा - 'अथ त्रैस्वर्यादीनां कथं समाम्नानमिति? उच्यते, अर्थावबोधनार्थं भविष्यति' (मीमांसा 9.2.31) । इस प्रकार के अनेको प्रमाण है, जिनसे सिद्ध

होता है कि वेद की अर्थावगति में स्वरों की अत्यन्त आवश्यकता है । पर यह उद्देश्य तभी पूर्ण होगा, जब स्वरों का शुद्ध-शुद्ध उच्चारण ज्ञात होगा । अत: इनके उच्चारण प्रकार को समझने का प्रयत्न करते है ।

**उदात्त के लक्षण -**

उदात्त के लक्षणों (जिनसे उच्चारण का प्रकार लक्षित होता है) को आचार्यों ने इस प्रकार बताया है - 'उच्चैरुदात्त:' (अष्टाध्यायी 1.2.29, सरस्वतीकण्ठाभरण 1.1.93, तैत्तिरीय-प्रातिशाख्य 1.1.38, वाजसनेयप्रातिशाख्य 1.106) । जैनेन्द्रव्याकरण में उच्चनीचावुदात्तानुदात्तौ (1.1.13) के रूप में कहा गया है तो अनुभूतिस्वरूपाचार्य ने अपने सारस्वत व्याकरण की स्वापज्ञवृत्ति में लिखा है कि, 'उच्चैरुपलभ्यमान उदात्त' (1.2) 'उच्चैरुपलभ्यमानो योऽच् स उदात्तसंज्ञो भवति'(काशिका 1.2.29) इस उदात्त के लिए उत्[1], उच्च[2], उद्घात[3], अनत[4], आद्यस्वर आदि संज्ञान्तर प्राप्त होते हैं ।

**अनुदात्त के लक्षण -**

'नीचैरनुदात्त:' (अष्टा. 1.2.30, तैत्तिरीयप्राति. 1.1.39, वाजसनेय - पाति. 1.109, शौनकीया चतुराध्यायिका 1.15, सरस्वतीकण्ठाभरण 1.1.94, सारस्वतव्याकरण-स्वोपज्ञ-वृत्ति 1. 2), 'उच्चनीचावुदात्तानुदात्तौ' (जैनेन्द्रव्याकरण), 'नीचैरुपलभ्यमानो योऽच् सोऽनुदात्तसंज्ञो भवति' (काशिका 1.2.30) । 'अल्पीयोऽर्थतरमनुदात्तम्' (निरुक्त 4.25) । अनुदात्त क लिए नीच[5], अनुच्च[6], निघात[7], सन्न[8], विक्रम[9] नत आदि शब्द प्रयुक्त होते हैं ।

**स्वरित के लक्षण -**

'समाहार स्वरित' (अष्टा. 1.2.31, तै. प्राति. 1.1.40, सरस्वतीकण्ठाभरण 1.1.95) । 'व्यामिश्र: स्वरित:' (जैनेन्द्रव्याकरण 1.1.14), 'समवृत्त्या स्वरित:' (सारस्वतव्याकरण-स्वोपज्ञवृत्ति 1.2) 'उभयवान् स्वरति:' (वाज. प्राति. 1.10), 'उदात्तानुदात्तसन्निकर्षात् स्वरित इति' (पाणिनीयशिक्षा 8.23), आक्षिप्तं स्वरितम् (शौनकीयाचतुराध्यायिका 1.16), उदात्ता-नुदात्तसमाहारो योऽच् स स्वरितसंज्ञो भवति (काशिका 1.2.31), 'उदात्तत्वानुदात्तत्वे वर्णधर्मो समाह्रियते यस्मिन् सोऽच् स्वरित संज्ञ स्यात्' (सि. कौमुदी - 7) । प्रवण[10], द्वियम[11], स्वार[12], रि[13] मध्यम आदि शब्द स्वरित के ही अनर्थान्तर हैं ।

**लक्षणों के विवेचन -**

उदात्तादि तीनों स्वरों के लक्षणों का निष्कर्ष यह है कि उच्चध्वनि, नीचध्वनि एवं मध्यमध्वनियों को क्रमश: उदात्त, अनुदात्त एवं स्वरित कहते हैं । परन्तु किसी भी लक्षण में यह स्पष्ट नहीं किया कि उच्चैस्त्व और नीचस्त्व क्या होता है । इसका कारण यह हो सकता है कि पाणिनी आदि आचार्यों के समय तक वेदमन्त्र ही नहीं, अपितु लौकिकभाषा में भी उदात्तादि स्वरों का उच्चारण व्यवहार में था । इसके लिए अनेक स्पष्ट संकेत उपलब्ध होते हैं। काशिकाकार ने कहा भी है कि, 'उदात्तादिशब्दा: स्वरे वर्णधर्मे लोकवेदयो: प्रसिद्धा एव'

(1.2.29) 'लोकवेदयो: प्रसिद्धौ गुणावेव वर्णधातुवुदात्तनुदात्तौ गृह्येते' (1.2.31) ।[14] लौकिक व्यवहार और वेदपाठ में उच्चैस्त्व तथा नीचैस्त्व सर्वविदित होने के कारण उनकी अवगति के लिए किसी विशेष व्याख्या की आवश्यकता नहीं हुई ।[15] पर आज वे सन्देहास्पद बने हुए है । क्योंकि सम्प्रति लोक में संस्कतभाषा का प्रचलन व व्यवहार ही नहीं, स्वरोच्चारण का कहना ही क्या है? वेदमन्त्र भी विस्वर पढे जाते हैं ।

'उच्चै:' शब्द महान्, अत्यधिक, ऊँचे शब्द और ऊँचे देश या स्थान अर्थों में प्रयुक्त होता है । सभी अर्थों में यह अव्यय अधिकरण प्रधानार्थक है । अधिकरण कारक होने से क्रिया की अपेक्षा रखता है । 'उच्चैरुदात्त:' सूत्र में 'उच्चै:' शब्द अधिकरणभूत ऊर्ध्वस्थान अर्थ मं प्रयुक्त हुआ है । उसका अधिकरणत्व उपलब्धि या उच्चारण क्रिया के प्रति है ।[16] अत एव काशिकाकार ने 'उच्चैरुपलभ्यमानो योऽच्.' ऐसा अर्थ किया ।[17] अब सूत्रस्थ 'उच्चै:' शब्द का अर्थ यह निकलता है कि 'ऊर्ध्वस्थान में उपलभ्यमान' । 'ऊर्ध्व' शब्द अवयव वाची होने से 'अवयवी' की भो अपेक्षा रखता है, जिसमें उर्ध्व, अध: आदि अवयव विद्यमान हों ।[18] सूत्र का निष्कृष्ट अर्थ यह निष्पन्न होता है - 'वर्णाभिव्यक्ति में समर्थ एवं अवयवीभूत कण्ठाादि स्थानों के ऊर्ध्वावयव में उपलब्ध या उच्चारित अच् उदात्तसंज्ञक होता है ।' यही अर्थ 'उदात्त' इस महती संज्ञा से भी द्योतित होता है । यतोहि महती संज्ञाएँ अन्वयर्थक होती है ।[19] उदात्त शब्द उत्पूर्वक आङ्पूर्वक 'दा' धातु से 'क्त' प्रत्यय होकर बनता है, 'स्व-स्व-स्थानस्य उत्-उच्चै:-ऊर्ध्वभागे आदीयते-गृह्यते-उच्चार्यते य: स उदात्त: ।'[20] यहाँ एक जिज्ञासा होती है कि उदात्तादि लोक और वेद में प्रसिद्ध है, जैसे कि पूर्व में कहा गया है, तो पाणिन्यादि लक्षणकारों को 'उच्चैरुदात्त:' आदि लक्षणों को बनाने की क्या आवश्यकता है? इसका समाधान देते हुए काशिकाकार लिखते है कि 'त इह तद्गुणेऽचि परिभाष्यन्ते' इसका आशय यह है कि लोकादि में उदात्तादि शब्द वर्णों के गुणों वा धर्मों के लिए प्रसिद्ध हैं, न कि वर्णों के लिए । लोकप्रचलित अर्थ व्याकरण में ग्रहण करने से 'उदात्तानुदात्तस्य स्वरित:' (अष्टा. 8.4.65) इस सूत्र का 'उदात्त गुणों से उत्तर अनुदात्त गुणों को स्वरित गुण हो जाता है', इस प्रकार का अनभीष्ट अर्थ गृहीत होता है । इस अर्थ में यह दोष है कि गुणों में भी पौर्वापर्यभाव और स्थान्यादेशभाव उपपन्न नहीं हो सकते ।[21] अत: लक्षणों के द्वारा उदात्तादि गुणों को गुणवान् अचों में परिभाषित किया जा रहा है, ऐसा अभिप्राय काशिकाकार आदि वैयाकरणों का है ।[22]

उपरोक्त चर्चा से विशेषतया ध्यातव्य विषय यह है कि 'उच्चैरुदात्त:' आदि लक्षण उदात्तादियों के गुणी या धर्मी अचों के हैं, न कि गुणों वा धर्मों के । सभी शिक्षाकार, प्रातिशाख्यकार और वैयाकरणों ने उदात्तादि गुणों को बाह्यत्न माना है, स्वयं पाणिनि का भी यही मत है ।[23] पाणिन्यादि आचार्य इन्हें बाह्यत्न मानते हुए 'कण्ठादि के ऊर्ध्वभाग से निष्पन्न अच्' ऐसा अन्त:प्रयत्न (आस्यप्रयत्न) के रूप में कैसे लक्षण कर सकते है? अत: ये लक्षण

अन्त:प्रयत्नजन्य अचों के बोधक हैं । अर्थात् नाभि से उत्थितवायु कण्ठ आदि स्थानों के ऊर्ध्वभाग में आघात करने पर उत्पन्न हुआ वर्ण 'उदात्त' कहलाता है ।[24] यहाँ यह भी अवधेय है कि ये गुण अचों के है और अज्वर्णों के उच्चारण में जिह्वादि करणों का कण्ठादि स्थानों में अभिघात कराता है । जिसमें उदात्तादि गुणवान् अज्वर्णो की उत्पत्ति होती है, अस्तु ।

'उच्चैरुदात्त:' आदि लक्षणों का इतना व्याख्यान समझने पर भी उदात्तादि का उच्चारण अज्ञात, अप्रत्यक्ष ही प्रतीत होता है । क्योंकि जब तक उदात्तवान् अचों की निष्पत्ति के कारणभूत, निमित्तभूत बाह्ययत्नों को हृदयंगम नहीं कर लिया जाता, तब तक अचों का उदात्तत्त्व (ऊर्ध्वभागनिष्पन्नत्व) अज्ञात या अप्रत्यक्ष ही रह जाता है । अत एव काशिकाकार को पुन: 'यस्मिन्नुच्चार्यमाणे गात्राणामायाम: – निग्रहो भवति0' इस बाह्ययत्नविषयक लक्षण को प्रस्तुत करना पडा[25] और यह लक्षण काशिकाकार का स्वकीय नहीं है, अपितु 'उच्चैरुदात्त:' आदि सूत्रों के प्रणेता महर्षि पाणिनि भी अपनी शिक्षा में लिखते हैं कि, 'तत्र यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति, तदा गात्राणां निग्रह:, कण्ठबिलस्य चाल्पत्वं, स्वरस्य च वायोस्तीव्रगतित्वाद् रौक्ष्यं भवति, तदुदात्तमाचक्षते' (शिक्षा. 8.21) अन्य आचायां के भी इस प्रकार के लक्षण मिलते है ।[26] इन्हीं कारणभूत बाह्ययत्नों से कार्यभूत अन्त: प्रयत्न निष्पन्न होते हैं । अत: ये बाह्ययत्नविषयक (गुणबोधक) लक्षण अन्त: प्रयत्नविषयक (गुणीबोधक) लक्षणों के पूरक हैं । जैसे गुण-गुणी में विधर्मता नहीं हो सकती है, वैसे ही इन द्विविध लक्षणों में भी विधर्मता नहीं है । दोनों एक दूसरे के पूरक है, इनमें जन्यजनकताभाव या कार्यकारणभाव सम्बन्ध है । आयामादि बाह्ययत्नों के विना ऊर्ध्वभागनिष्पन्नत्वादि अन्त:यत्न सम्भव नही है और ऊर्ध्वभागनिष्पन्नत्वरूपी लक्षण (उच्चैरुदात्त) के विना आयामादि गुणबोधक लक्षण निरर्थक हो जाते है, क्योंकि गुणी के विना गुण, आश्रय कि विना आश्रयी का अस्तित्तव नहीं रहता । अत एव महर्षि पाणिनि को शिक्षाशास्त्र में आयामादि गुणबोधक लक्षणों के उपदेश के बाद अष्टाध्यायी में गुणी बोधक 'उच्चैरुदात्त:' आदि लक्षणों को भी बताना पडा । इसी प्रकार का विवेचन 'नीचैरनुदात्त:' एवं 'यदा मन्द: प्रयत्नो भवति, तदा गात्राणां प्रसन्नत्वम्, कण्ठबिलस्य च महत्त्वम्, स्वरस्य च वायोर्मन्दगतित्वाद् स्निग्धता भवति, तमनुदात्तमाचक्षते' (शिक्षा.-8.22) इन लक्षणों में भी जान लेना चाहिए । इतने विवेचन के पश्चात् मैं यह कहना चाहता हूँ कि जो परम्परया उदात्तादि स्वरों के उच्चारण में पूर्ण अभ्यस्त हैं तथा लक्षणविद् भी हैं, उनके लिए आयामादि बाह्यलक्षण एवं ऊर्ध्वभागनिष्पन्नत्वादि उदात्त के लक्षण अनुभव से बाहर नहीं है । हाँ! जो केवल उच्चारण मात्र जानता है, लक्षणों को नहीं अथवा जो लक्षणमात्र को जानता है, उच्चारण को नहीं, उनके लिए तो ये विषय अनुभूत नहीं हो सकते हैं ।

ऋक्प्रातिशाख्य में त्रैस्वर्य का लक्षण इस प्रकार प्राप्त होता है कि –

**उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।**
**आयामविश्रम्भाक्षेपैस्त उच्यन्ते ॥ ( ऋ.प्रा. ३.१ )**

इसकी व्याख्या करते हुए उवट लिखते है – 'आयामो नाम वायुनिमित्तमूर्ध्वगमनं गात्राणां, तेन य उच्यते स उदात्तः । विश्रम्भो नामाधोगमनं गात्राणां वायुनिमित्तम् । आक्षेपो नाम तिर्यग्गमनं गात्राणां वायुनिमित्तम् ।' यहाँ स्पष्टरूप से व्याखत है कि उदात्त के उच्चारण में वायु के निमित्त से शरीरावयव ऊर्ध्वगमन करते हैं तो अनुदात्त के उच्चारण में अधोगमन । उदात्त और अनुदात्त के उच्चारण में उपयुक्त सभी अवयवों में यदि ऊर्ध्वगमन और अधोगमन होता है, तो उसमें जिह्वा अपवाद नहीं हो सकती । जब की जिह्वा वर्णोच्चारण मे उपयुक्त सभी अवयवों में प्रधानतम साधन है । इतना ही नहीं उवट के वचन में 'गात्र' शब्द का मुख्य अर्थ 'जिह्वा' ही प्रतीत होता है, क्योकि स्वरित के उच्चारण में वायुनिमित्तक जो तिर्यग्गमन (आक्षेप) कहा गया है[27], वह जिह्वा के अतिरिक्त किसी अन्य गात्रावयव में दखा नहीं जाता। अतः जब उदात्त इवर्ण एवं अनुदात्त इवर्ण का उच्चारण करना होगा, तब जिह्वा की गति अन्य अवयवों के सदृश तालु स्थान में ही क्रमशः ऊर्ध्व एवं अधः भाग की ओर होगी ही ।[28] इसमें सन्देह का अवसर ही नहीं है । जहाँ तक अप्रत्यक्षत्व या अननुभवत्व का प्रश्न है, वह एक सामान्य व्यक्ति व स्वरोच्चारण के अनभ्यस्त व्यक्ति के प्रति कथित कथन है । सूक्ष्मदर्शी वा सूक्ष्मनिरीक्षक के लिए तो वह सब प्रत्यक्ष एवं अनुभूत का ही विषय है । वर्णों के नाद, श्वास, घोष, अघोषादि गुण सभी के लिए प्रत्यक्षविषयक नहीं है, तो क्या कोई इनका भी निषेध कर सकेगा?

अब महाभाष्य की ओर प्रस्थान करते है – 1.1 'इदमुच्चनीचमनवस्थितपदार्थकम्, तदेव हि कञ्चित् प्रत्युच्चैर्भवति, कञ्चित् प्रति नीचैः । एवं हि कश्चित् किञ्चदधीयानमाह किमुच्चै रोरूयसे शनैर्वर्ततामिति । तमेव तथाऽधीयानमपर आह मिन्तर्दन्तकेनाधीषे उच्चैर्वर्ततामिति । एवमुच्चनीचमनवस्थितपदार्थकम्, तस्यानवस्थितत्वात् (उदात्तदेः) संज्ञाया अप्रसिद्धिः' ।

1.2 एवं तर्हि लक्षणं करिष्यते – आयामो दारूण्यमणुता खस्येति उच्चैः कराणि शब्दस्य (–अचः) (तै. प्राति. 29.9) । आयामो गात्राणां निग्रहः । दारुण्यं स्वरस्य दारुणता रूक्षता । अणुता खस्य कण्ठस्य संवृतता । उच्चैः कराणि शब्दस्य (–अचः) । अन्ववसर्गो मार्दवमुरुता खस्येति नीचैः कराणि शब्दस्य (–अचः) (तै. प्राति. 22.10) । अन्ववसर्गो गात्राणां शिथिलता। मार्दवं स्वरस्य मृदुतास्निग्धता । उरुता खस्य महता कण्ठस्येति नीचैःकराणि शब्दस्य (अचः)।

2.1 एतदप्यनैकान्तिकम् । यद्ध्यल्पप्राणस्य सर्वोच्चैस्तद्धि महाप्राणस्य सर्वनीचैः ॥

2.1 सिद्धमेतत् । कथम् ? समाने प्रक्रम इति वक्तव्यम् । कः पुनः प्रक्रमः? उरः कण्ठः शिर इति ।[29] (म. भा. 1.2.29,30)

भाष्यकार ने यहाँ दो खण्डों में अपने मत को प्रश्नोत्तर शैली में प्रस्तुत किया । सर्वप्रथम सूत्रस्थ उच्चै:, नीचै: शब्दों के श्रुतिप्रकर्ष अर्थ को लेकर उन्हें अनवस्थितपदार्थक कहा, अर्थात् श्रुतिप्रकर्ष अर्थ को अप्रासंगिक मानकर निराकरण कर दिया । तत्पश्चात् आयाम, अन्ववसर्ग आदि के द्वारा उच्चत्व एवं नीचत्व का सैद्धान्तिक समाधान प्रस्तुत कर दिया । पुन: द्वितीय खण्ड में आक्षेप उठाया कि उदात्तादि गुणों के कारणभूत आयामादि यत्न वक्ता के शरीरगत होने से वक्ता के ही अनुभव में आ सकते हैं, न कि श्रोता के अनुभव में । श्रोता को तो कार्यभूत श्रुतिप्रकर्ष ही अनुभूत होता है, जो कि अनवस्थितपदार्थक ही है । यहाँ यह ध्यातव्य है कि प्रथम खण्ड के आक्षेप और द्वितीय खण्ड के आक्षेपों के भाव व तात्पर्य में कोई भेद नहीं है । तथा च 'एतदप्यनैकान्तिकम्0' शब्दों से भाष्यकार ने जो आयामादि लक्षण का निराकरण किया है, वह श्रोता की अपेक्षा से है, न कि वक्ता की अपेक्षा से । अर्थात् वक्ता को वे अनुभूतविषयक होने से वक्ता की दृष्टि में भाष्यकार ने आयामादि लक्षण को सिद्धान्तत: स्वीकार कर लिया है, सर्वथा निराकरण नहीं किया । अन्यथा पौन: पुन्येन इन्हीं लक्षणों को उद्धृत नहीं करते । अस्तु, अब उदात्तादि स्वर श्रोता[30] को भी अनुभव के विषय बन सके, उसके लिए[31] उत्तर देते है कि, 'समान प्रक्रमे....... उर:, कण्ठ:, शिर इति ।' यहाँ भाष्यकार ने जिस उद्देश्य से अन्तिम समाधान दिया है, उसे उसी के परिप्रेक्ष्य में समझना चाहिए । यद्यपि कैयट ने 'प्रक्रम' का अर्थ 'स्थान' कर लिखा है, 'एकस्मिंस्ताल्वादिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेनोच्चार्यमाण उदात्त:, अधरभागनिष्पन्नोऽनुदात्त: । एवं चोच्चै-रित्यनेनोर्ध्वभागो गृह्यते, नीचैरित्यधरभाग: ।' यह व्याख्यान श्रोतृविषयक न होने से भाष्यविरुद्ध सिद्ध होता है । अत: कैयट का व्याख्यान अनुचित ही है । यह व्याख्यान इसलिए भी अनुचित है कि कैयटकृत वह अर्थ तो सूत्र से भी प्राप्त हो जाता है । जैस कि लेख के आरम्भ में वर्णन किया गया है । सूत्र से ही वह अर्थ ज्ञात होने के कारण ही और समाधानान्तर के विद्यमान होन से भाष्यकार ने उसे 'उच्चनीचमनवस्थितपदार्थकम्' आक्षेप के समाधान में प्रस्तुत नहीं किया ।

पाठकों का ध्यान पुन: एक बार इस ओर आकर्षित करना चाहता हूँ कि उच्चत्वादि के अनवस्थितपदार्थक प्रश्न का सैद्धान्तिक समाधान भाष्यकार ने अपनी ओर से आयामादि के रूप में दे दिया है । उर: कण्ठ और शिर: के समानप्रक्रम का समाधान केवल श्रोता की संतुष्टि के लिए प्रस्तुत किया है । भाष्यकार के आशय को समझने से पूर्व यह लिखना अप्रासंगिक नहीं होगा कि संगीत के षड्ज, ऋषभ, गांधार आदि सप्त स्वरों के प्रशिक्षण काल में अध्यापक छात्रों (श्रोताओं) की सुविधा के लिए हस्तादि अवयवों का विशेष रूप से संचालन करता है, जिससे उन स्वरों के उच्चारण प्रकार का बोध सरलतया हो जाता है और वैसे ही हस्तादि का संचालन उन छात्रों से भी कराया जाता है, जिससे कि हस्तादि के साथ-साथ तदनुकूल शरीरगत प्रयत्नों का संचालन उन छात्रों से भी कराया जाता है, जिससे कि

हस्तादि के साथ-साथ तदनुकूल शरीरगत प्रयत्नों का अभ्यास हो सके । ऐसा ही सामगान के प्रशिक्षण में भी देखा जाता है, अपि च तद्विषयक ग्रन्थों में हस्तादि के संचालन का विधान भी मिलता है । पर जब पूर्ण अच्छा अभ्यास हो जाता है, उन हस्तादि के संचालनों को छोडा भी जाता है । इतना ही नहीं जब गायकवृन्द सामूहिक रूप से गान करते हैं, तो उनके सामने एक व्यक्ति विना गायन के ही केवल हस्तादि का सञ्चालन करता है । जिससे गायको के स्वर, श्रुति, लय आदि में एकता व समानता बनी रहे । लिखने का तात्पर्य यह है कि सामने के व्यक्ति या श्रोता को स्वरबोध कराने के लिए हस्तादि का संचालन किया जाता है, यह सर्वविदित ही है । अस्तु, प्रकृतमनुसरामः । उत्तरादि स्वरों के उच्चारण में भी कहा गया है कि –

**समं स्वरं पठेन्नित्यं मार्गं हस्ते प्रदर्शयेत् ।**
**यद् वाणी गच्छति स्थानं तद्हस्तेन प्रदर्शयेत् ॥**
**दक्षिणाक्षिनिपातेन दृष्टिं हन्यात् कनीयसीम् ।**
**नासागण्डभ्रुवोः सन्धिमुदात्तविषये विदुः ॥**

(चारायणीशिक्षा, पूना पा. सं. 21.25, गटिंगनपत्र – 6)

**यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत् ।**
**यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ॥**
**यथा धनुष्यवितते शरे क्षिप्ते पुनर्गुणः ।**
**स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ॥**

**( याज्ञवल्क्यशिक्षा – ४६,४७ )**

अपि च द्रष्टव्य कौहालिशिक्षा (36), मल्लशर्मकृता शिक्षा (7) । इन वचनों मे स्पष्टतया कहा गया है कि वाणी उच्चत्व आदि जिन अवस्थाओं में रहती है, उन अवस्थाओं को पाणि के द्वारा दिखावें । वाजसनेयप्रातिशाख्यय में भी उदात्तादि स्वरों से प्रदर्शित करने का उल्लेख है – 'हस्तेन ते' (1.121) ।

उदात्तादि का बाह्यप्रदर्शन निम्नप्रकार से किया जाता है – 'तत्रोदात्ते ऊर्ध्वगमनं हस्तस्य, अनुदात्तेऽधोगमनं हस्तस्य0' (उव्वटः – वा. प्राति. 1.121) । 'हृदयसमीपे दक्षिणहस्ते- नानुदात्तप्रदर्शनं भवतीति भावः ....... । मूर्धनि मुखप्रदेश इत्यर्थः ..... । उदात्तानुदात्तधर्मविशिष्टः स्वरितः श्रुतिमूले दक्षिणकर्णमूलसमीपे दर्शनीयमिति ।' श्लोकात्मक पाणिनीयशिक्षा में भी वर्णित है –

**अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।**
**स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥**

(पा. शिक्षा – 48, शैशिरीयशिक्षा – पृ. 7)

**उदात्तं भ्रुवि पातेन प्रचयं नासिकाग्रतः ।**

**हृत्प्रदेशेऽनुदात्तं तु तिर्यग्जात्यादिकाः स्वराः ॥**
(प्रातिशाख्यप्रदीपशिक्षा 1.11)

**अनुदात्तादुदात्तश्चेत्स्वरितोत्तर एव च ।**
**हृच्छिरः कर्णमूलेषु न्यसेद्धस्तमसंशयम् ॥**
**अनुदात्तादुदात्तश्चेदनुदात्तपरस्तथा ।**
**अनुदात्तं हृदि न्यस्योदात्तं वामभ्रुवि न्यसेत् ॥**
**पुनर्हृदि न्यसेच्चीचमिति शास्त्रव्यवस्थितिः ।**
**प्रचितोच्चारणे न्यासो हस्तस्य नासिकाग्रतः ॥**
(केशवीशिक्षा 1.3)

इसी बात को भाष्यकार ने कहा कि आयामादि प्रयत्नजन्य उदात्तादि को 'उरः, कण्ठः, शिरः' से श्रोतृगण के अवबोधार्थ प्रदर्शित करें ।[32] इस प्रसंग में भाष्य के 'प्रक्रम' शब्द का नाभितल के प्रयत्नों से कोई सम्बन्ध नहीं है । क्योंकि वह तो 'आयामो दारूण्यं......' के अन्तर्गत ही गृहीत होता है । नाभितल के यत्न आयामादि से भिन्न नहीं है, अपितु नाभितल के यत्नों से ही आयामादि यत्न निर्वर्तित होते हैं । भाष्यस्थ 'प्रक्रम' शब्द तात्पर्य 'उदात्तादि के उच्चारण में आयामादि बाह्ययत्न एवं ताल्वादि के ऊर्ध्वभागस्थ अन्तः प्रयत्नो के साथ-साथ हस्तसंचालन की क्रिया भी प्रारम्भ होनी चाहिए ।' इसी के लिए भाष्य में 'समानप्रक्रम' (-एकसाथ क्रिडाद्वय का प्रारम्भ) शब्द का प्रयोग किया गया है । यही भाव नीचे के श्लोंकों में वर्णित है -

**निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन् ॥**
**सममुच्चारयेद् वर्णान् हस्तेन च मुखेन[३३] च ।**
**स्वरश्चैव तु हस्तश्च द्वयं तु युगपद् भवेत् ॥**
**हस्तात् भ्रष्टः स्वराद् भ्रष्टो न वेदफलमश्नुते ।**

(शैशिरीयशिक्षा पृ. 8, याज्ञवल्क्यशिक्षा 22-24, तु. माण्डूकीशिक्षा 30-31)

इन श्लोकों में प्रयुक्त 'हस्तेन च मुखेन च समम्' एवं 'द्वयं युगपद्' शब्दों से 'समानप्रक्रम' शब्द के मत्कृत अर्थ की पुष्टि होती है ।

भाष्यकार के उक्त आशय को समझे विना ही पौराणिक जगत् के प्रसिद्ध विद्वान् पं. मधुसूदन ओझा जी ने अपने 'वर्णसमीक्षा' नामक गन्थ में काशिकादि को उपेक्षणीय लिखा है - 'यत्तु कैयटेन प्रक्रमः स्थानमुच्यते, स्थानञ्च ताल्वादिकमूर्ध्वाधरभागयुक्तम् ...... इत्येव व्याख्यातम् । काशिकाकौमुदीकारादिभिरपि कैयटवर्त्मैवानुसृतम् । तदेतत् सर्वं भगवत्पतञ्जल्यादि-महर्षितात्पर्यविरुद्धत्वादुपेक्ष्यम् । न हीमानि ताल्वादिस्थानानि तथोर्ध्वाधरभागयुक्तानि श्रूयन्ते वा

स्मर्यन्ते वानुभूयन्ते वा । [34] तिर्यग्भागैः सभागत्वेऽप्यूर्ध्वाधरभागैः सभागत्वस्याप्रामाणिकत्वात् । अथ खल्वेकैकस्मिन् स्थाने प्रकल्पितेषु अग्रमध्यमपश्चाद्भागेषु उच्चादीनामभिनिष्पत्तिरिष्यते इति चेत् – स्यादेतदेवम्, यदि नाम ताल्वादिनि स्थानानीह विवक्षितानि स्युः । न च तथा विवक्षां पश्यामः । द्विविधानि हि वर्णस्थानानि भवन्ति – सवनस्थानानि च मुखस्थानानि च । तत्रोरः कण्ठशिरोरूपस्त्रिभिः सवनस्थानैरेवैतेषां सम्बन्ध सूत्रवार्त्तिकभाष्येषु प्रदर्श्यते । ...तस्मात् ताल्वादि-सभागस्थानेषूर्ध्वभाग निष्पन्न उदात्तः । अधोभागनिष्पन्नोऽनुदात्त इत्येवमुक्तिः केषाञ्चिद-पदार्थत्वादुपेक्ष्येति दिक्' (पृ. 144) । ओझा जी के इन विचारों से पूर्ण सहमत होते हुए इन्हीं युक्तियों से डॉ. विजयपाल प्रचेता जी ने भी एक लेख लिखा है, जो कि आचार्य श्री विजयपाल विद्यावारिधि जी के अभिनन्दनग्रन्थ (पृ. 155-163) में और वेदविद्या (जनवरी-जून 2012, पृ. 113-130) में 'कैयटादिभाष्यव्याख्याताओं की उदात्तादिस्वरूपविषयक महती भ्रान्ति' के शीर्षक से मुद्रित हुआ । अब इनके विचारों की समीक्षा की जाती है –

**उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मय ।**
**सवनान्याहुरेतानि सन्ति चाप्यधरोत्तरे ॥**

(नारदीयशिक्षा – 1.1.7)

इन सवनों के विषय में स्वमत प्रकट करते हुए ओझा जी ने लिखा है – 'सवन प्रक्रमः । मूलस्थानात् प्रक्रममाणस्य गम्यस्थानसंसर्गं यावन्मध्यतः संविभक्ते पर्यवस्थाने यो यः संयोग स सवनः । स प्रायेण सर्वत्र त्रेधा कृत्वाभ्युपगम्यते 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्' इति....। इह नाभिस्थानादुत्थितस्य वायोरुरसि प्रथमः प्रक्रमः ।[35] कण्ठे द्वितीयः । शिरसि तृतीयः । .......अस्ति किञ्चिदुच्चरणमुरसैव प्रक्रमते, न कण्ठान्न शिरसः । अपरे कण्ठादेव नोरसो न शिरसः । अथान्यच्छिरस एव नोरसो न कण्ठात् । तथा चैते त्रयः स्वराः सिद्धाः मन्द्रः, मध्यः, तारश्चेति ।'

**'हृदि मन्द्रो गले मध्यो मूर्ध्नि तार इति क्रमात् ॥' इति**

'प्रातः सवनोच्चारणे गम्भीरः स्वरो भवति स मन्द्रः । स एष उरः कण्ठशिरः स्थानाना-मौत्तराधर्यक्रमेण सन्निविष्टानामधरादुत्पन्न इत्यनुदात्तः । मध्यन्दिनसवनेनोच्चारणे तु मध्यः स्वरो जायते । स स्वरितः मन्द्रतारोभयधर्मवत्वात् । अथ सायंसवननोच्चारणेऽत्युच्चैः स्वरो जायते। स तारः । स उदात्तः । उच्चस्थानगृहीतत्वात् (वर्णसमीक्षा पृ. 135-136)'

'क पुनरसौ प्रक्रम इति चेदुच्यते, वर्णस्वरूपसम्पत्तये नाभ्युत्थितो वायुः प्रथमं यदाहत्य, यत्र वाऽऽत्मानं निपात्य पुनः क्रममाणां वर्णान् जनयति स प्रक्रमः । स त्रिविधः, उरः कण्ठः शिरः इति (तत्रैव पृ. 142) ।'

इन्हीं विचारों को अन्यान्य शिक्षाकार आदि के वचनों को उद्धृत करते हुए डॉ. प्रचेता जी ने अपना शोधलेख लिखा है । इन दोनों विद्वानों का मत यह है कि वर्णों को उत्पन्न करने

के उद्देश्य से अग्निप्रेरित वायु नाभितल से उत्थित होकर मध्य में अर्थात् मुख में वर्णों को उत्पन्न करने से पूर्व ही कुछ स्थानों पर आघत करता है, वे आहत स्थान एक, दो या तीन भी हो सते हैं, उस से अधिक नहीं । वे तीन स्थान है । – उरः, कण्ठः, शिरः । इन्हीं तीन स्थानों को सवन या प्रक्रम कहते हैं । इन्हीं स्थानों से क्रमशः अनुदात्त, स्वरित और उदात्त गुणों की उत्पत्ति होती है । ये सब विषय अविचारितरमणीय अवश्य है, पर तथ्य से सुदूर हैं । क्योंकि इनके मत में स्वरित का उच्चारण तब होता है, जब नाभितल से उत्थित वायु कह गति उरः एवं शिरः के मध्य में विद्यमान कण्ठ तक ही होती है, अर्थात् वह वायु उदात्त के उच्चारण स्थान शिर तक पहुंचता ही नहीं है । फिर स्वरित में उदात्त का मिश्रण कहाँ हुआ? जिस पाणिन्यादि सभी आचार्य मानते हैं । स्वरितात्पादक मध्यमगति वाला वह वायु यदि केवल कण्ठ को आहत करता है तो उसमें उदात्त एवं अनुदात्तों का सर्वथा अभाव है । यदि उरः और कण्ठ दोनों को आघात करता है तो उसमें केवल अनुदात्त का ही मिश्रण है । ऐसी स्थिति में अनुदात्त तथा स्वरित में भेद ही क्या है ? यदि वह वायु कण्ठ और शिरः में आहनन करता है तो उसमें केवल उदात्त का ही मेल है । तब स्वरित उदात्त से भिन्न कैसे हुआ ? 'य इनानीमुभयगुणः स तृतीयामाख्यां लभते स्वरित इति' भाष्य की यह पंक्ति कैसे सुसंगत होगा ? यह विद्ववद्वृन्द ही स्वयं विचार करें ।

इन दोनों विद्वानों की महती भूल यह भी है कि इन्होंने स्वरित को उदात्त एवं अनुदात्त के मध्य में माना है जब कि सभी शिक्षाकार, प्रातिशाख्यकार एवं वैयाकरणों ने इसे उदात्त और अनुदात्त का मिश्रण मानते हैं । इतना ही नहीं आचार्य शौनक[36] और चतुरध्यायिकाकार[37] ने स्वरित को 'आक्षिप्त' मान है । आक्षिप्त का अर्थ करते हुए उवट ने लिखा है – 'आक्षेपो नाम तिर्यग्गमनं गात्राणां वायुनिमित्तम्' (ऋक्प्राति0 3.1) जिसका तात्पर्य है कि स्वरित के उच्चारण में पहिले अनुदात्त और उसके बाद उदात्त का उच्चारण नहीं करना चाहिए, अपितु उसके विपरीत (उल्टी गति से) पहिले उदात्त का उच्चारण कर उसके पश्चात् अनुदात्त का करना चाहिए ।[37] यही सर्वमान्यसिद्धान्त है ।[38] पर इनके मत में जब उरः एवं शिरः के मध्य में स्थित कण्ठदेश से स्वरित का उच्चारण होगा, तब वे 'आक्षिप्तः' का क्या अर्थ करेंगे ? वे ही प्रष्टव्य है । इनके मत में तो यही कहना पडेगा कि स्वरितोत्पक वायु पहिले शिर में आघात कर, पुनः पीछे लौटकर कण्ठ में आघात करेगा । इसे कौन बुद्धिमान मान सकता है विज्ञ ही विचार करें ।

उक्त दोनों विद्वानों ने अपने-अपने शोधलेख में कहीं भी यह बताने का पुरुषार्थ नहीं किया कि उरः, कण्ठः और शिरः ये नाम किस स्थान के है ? क्यो ये बाह्ययत्नों के क्षेत्रीय हैं ? या बाह्याभ्यन्तर यत्नों के उभयक्षेत्रीय हैं ? यहाँ यह भी विचारणीय है कि उदात्तादि को तीन सवनों या प्रक्रमों से उत्पाद्यमान मानने पर वे उदात्तादि गुण बाह्ययत्न कहलायेंगे या अन्तः यत्न ? उरः आदि का अर्थ लोकप्रचलित अर्थ ही यदि इन्हें स्वकार्य हैं, तो इनके मत में तो

यही कहना पडेगा कि अनुदात्त एवं स्वरित गुण बाह्ययत्न है और उदात्त शिरोज (मूर्धज, आस्यज) होन से अन्त:यत्न है । जब की मुनित्रय आदि सभी आचार्य इन्हें केवल बाह्ययत्न मानते हैं । काशिकाकार, कैयट, नागेश, भट्टोजीदीक्षित आदि वैयाकरणों के वचनों को मुनित्रय के आशय से विरूद्ध मानकर उन्हें अमान्य या उपेक्षणीय सिद्ध करने वाले विद्वद्वरेण्यं ओझाजी और प्रचेता जी मुनित्रय को कहाँ प्रामाणिक रहने दिया ? शिर: शब्द का अर्थ इन्होंने तदेकदेशीभूत मूर्धा में संकुचित कर दिया, अन्यथा लोकप्रसिद्ध अर्थ लेते तो नाभितल का वायु उदात्त के उच्चारणार्थ तीव्रगति से आकर जैसे ही सीधा शिर के मस्तिष्क आदि किसी भी अवयव में आघात करेगा, वैसे ही व्यक्ति या ता उन्मत्त होगा या मृत हो जाएगा । है ना, अद्भुत ऊहापोह । उदात्तोत्पादक वायु स्वरयन्त्र (कण्ठ) में आघात किए विना ही यदि सीधा शिर: (मूर्धास्थान, तृतीयप्रक्रम) में पहुँच जायेगा, तो क्या किसी वर्ण की उत्पत्ति होगी ? वर्ण (गुण या धर्मी) के विना उसके गुण वा धर्म का अस्तितत्व रहेगा ? इतना ही नहीं 'शिर:' का अर्थ 'मूर्धा' मानना भी उचित नहीं है । क्योंकि अनेकत्र उदात्त का उच्चारण भ्रूमध्य व भ्रूप्रान्त माना गया है ।[39] जहाँ वायु का आघात हो ही नहीं सकता । हाँ, वहाँ उदात्त के प्रदर्शनार्थ हाथ पहुँच सकता है । इसमे न ही कोई असम्भावना है, न ही दोष । यही आचार्यों को अभीष्ट भी है । जैसे कि मैंने पूर्व में प्रतिपादित किया ।

स्वरयन्त्र की विशेषक्रियाओं वा अवस्थाओं के कारण एक ही वायु में नाद, श्वास, घोष, अघोष आदि विभिन्न व विरूद्ध धर्म उत्पन्न होते है, यह एक वैज्ञानिक प्रक्रिया है । पर उर: आदि तथाकथित सवनत्रय (प्रक्रमत्रय) में ऐसी क्या क्या क्रियायें होती है, जिससे नाभितल से उत्थित समानधर्मी (एक ही) वायु में उदात्तादि भिन्न-भिन्न धर्म उत्पन्न होते हैं, इसका विवेचन उक्त पण्डितद्वय ने कहीं भी नहीं किया । जिसे ओझा जी अनुभूतविषयक मानते हैं और एक महत्वपूर्ण विचारणीय विषय यह है कि अनुदात्त का उच्चारण इन्होंने उर: स्थान से माना । इसका तात्पर्य है - अनुदात्तगुणवान् कण्ठ्य अवर्ण, तालव्य इवर्ण, मूर्धन्य ऋवर्ण आदि सभी अच् उर: स्थान से बोले जाते हैं । क्या ऐसा उच्चारण सम्भव है ? क्या इसके लिए किसी भी प्रामाणिक आचार्य का प्रमाण है ? महर्षि पाणिनि ने तो यह सिद्धान्त उपस्थित किया था कि केवल 'हूँ' और 'विसर्जनीय' ही उर:स्थान से बोले जाते हैं - 'हविसर्जनीयावुरस्यावेकेषाम्'[40] (पाणिनीयशिक्षा 1.3) । यहाँ यहा भी अवधेय है कि उर: स्थानीय वर्ण केवल उर: (छाती) से ही बोले जाते हैं, उसमें स्वरयन्त्र (कण्ठ) और मुख के किसी भी अवयव का कोई उपयोग नहीं होता ।[41] अनुदात्तगुणवान् सभी अचों को उरस्य मानना, वैसे ही स्वरितगुणी सभी अचों को कण्ठ्य मानना और उदात्तगुणविशिष्ट अचों को शिरस्य मानना क्या पाणिनि एवं उनके प्रागर्वाचीन आचार्यो के सिद्धान्तों का अवमूल्यन नहीं है? अवश्य है, पुनरपि ओझा जी के द्वारा इन्हें अनुभवविषयक एवं भाष्यादि के अनुकूल व प्रामाणिक मानना उपहास के योग्य हैं ।

पूर्व में सिद्ध किया जा चुका है कि भाष्यकार का 'उर: कण्ठ: शिर इति' का समाधान वक्ता की अपेक्षा से नहीं, अपितु श्रोता की दृष्टि से है । यह बात केवल भाष्य में ही नहीं अपितु जिस-जिस ग्रन्थ में उर: आदि का वर्णन आया है, वहाँ वहाँ सर्वत्र स्पष्टतया हस्तसंचालन द्वारा स्वरप्रदर्शन ही अभिप्रेत है, न कि तत्तद् स्थानों में होनेवाले कोई विशेष प्रयत्न या वायु के त्रिविध (मन्द्र, मध्य, तार) गतिक आघात का वर्णन । इसमें हेतु यह भी है कि उर: आदि का वर्णन उन्हीं ग्रन्थों में है, जिस-जिस में मन्त्रोच्चारण में हस्तसंचालन का विधान है । तद्यथा प्रातिशाख्यों में वाजसनेयप्रातिशाख्य में उदात्तादि स्वरों को हस्त के द्वारा भी प्रदर्शित करने का विधान है - 'हस्ते ते' (1.121) । इसीलिए इस प्रातिशाख्य में वर्णित है - 'सवनक्रमेणोर: कण्ठभ्रूमध्यानि' (1.30)[42] त्रैस्वर्य के प्रदर्शनार्थ हाथ के स्थान सवनों के क्रम से उर:, कण्ठ और भ्रूमध्य (शिर:) होते हैं । 'आयाममार्दवाभिघाता:' (1.31) - त्रैस्वर्य के प्रदर्शनार्थ जब हाथ उर: आदि स्थानों में पहुँच जाता है, उसी (समान) समय आयामादि शरीरगत यत्न प्रारम्भ (प्रक्रम) करना चाहिए । यही समानप्रक्रम है । इसप्रकार सर्वत्र 'यद् वाणी गच्छति स्थानं तद्धस्तेन प्रदर्शयेत्' इत्यादि वचनों के परिप्रेक्ष्य में समानप्रक्रम को या उर:, कण्ठ (कर्णमूल), शिर: (भ्रूमध्य) स्थानों को समझने में कोई कठिनाई नहीं होगी, न ही व्यर्थ के अशास्त्रीय कपाल कल्पनाओं की आवश्यकता पडेगी, अस्तु ।

जिन ग्रन्थों में त्रैस्वर्य के उच्चारण में हस्तसंचालन का विधान नहीं है, उनमें न सवनों का उल्लेख है, न उर: आदि शब्दों (तथाकथित प्रक्रमों ) का वर्णन है । जैसे पाणिनीयशिक्षा (सूत्रात्मक), अपिशलिशिक्षा, चान्द्रशिक्षा, ऋक्प्रातिशाख्य आदि । उर: आदि शब्द यदि शरीरगत अवयवों में होनेवाले प्रयत्नविशेषों के द्योतक हैं, तो सभी ग्रन्थों में इनका उल्लेख मिलना चाहिए । इतना ही नहीं जहाँ जहाँ उल्लेख मिलता है, वहाँ वहाँ मतभेद नहीं होना चाहिए था। जबकि मतभेद देखा जाता है ।[43] यह मतभेद हस्तसंचालन में सम्भव है, पर उच्चारण में नहीं। शुक्लयजुर्वेद में जिस प्रकार उर: आदि तीन स्थानों पर उदात्तादि का प्रदर्शन होता है, सामगान में वैसा नहीं होता । उसमें तो केवल हाथ की अंगुलियों में ही स्वर प्रदर्शित होते हैं । अत: यजु: सम्बन्धी भारद्वाज आदि शिक्षाआं में और सामसम्बन्धी नारदीयशिक्षादि में हस्तसञ्चालन के विधान में पर्याप्त मतभेद देखा जाता है । तैत्तिरीयसंहिता सम्बन्धी व्यासशिक्षा में सामलक्षणों से मिलता जुलता हुआ हस्तसंचालन का विधान मिलता है (व्या.शिक्षा. 326-329)। स्पष्ट है यजु: के विधान सामादि में घटित नहीं हो सकते और साम की विधियाँ यजु: आदि में प्रवर्तित नहीं हो सकतीं । भाष्यकार के शब्दों में कहूँ तो ये सभी विधियाँ यजु: आदि में प्रवर्तित नहीं हो सकतीं । भाष्यकार के शब्दों में कहूँ तो ये सभी विधियाँ पार्षदकृतियाँ है, जब कि पाणिनि के शास्त्र (उपदेश) सर्ववेदपारिषद् हैं - 'सर्ववेदपारिषदं हीदं[44] शास्त्रम्' (म. भा. 2.1.57) । अत: ये पार्षदकृतियाँ (हस्तसञ्चालन की विधियाँ) पाणिनि क तन्त्र में स्वीकृत नहीं हो सकती।[45] अर्थात् 'उच्चैरुदात्त:' आदि सूत्रों से हस्तसञ्चालन के विधानों को (उर:-

कण्ठ–शिरः–गत प्रयत्नविशेषों को) ग्रहण करना महती भूल ही नहीं, अपितु अपाणिनी भी होगा।[46] भाष्यकार ने तो सैद्धान्तिक समाधान प्रस्तुत करने के पश्चात् वेदपाठ में प्रचलित हस्तसंचालन के परिप्रेक्ष्य में श्रोता की सन्तुष्टि के लिए 'समानप्रक्रम' का समाधान दिया है । भाष्यपारग सभी विद्वान् भलीभांति जानते हैं कि भाष्यकार के सभी समाधान सैद्धान्तिक नहीं होते और उनसे कदापि यह भूलते नहीं बनता कि 'पक्षान्तरैरपि परिहारा भवन्ति' । यहाँ प्रसंगतः मैं यह भी कहना अप्रासंगिक नहीं समझता कि–श्लोकात्मकशिक्षा पाणिनीय नहीं है । क्योंकि इसमें हस्तसंचालनादि पार्षदकृतियां विद्यमान हैं । विद्वद्वृन्द पूर्वाग्रह को त्यागकर सत्य को स्वीकार करें ।

लक्षणों का निर्माण यद्यपि अतिव्याप्ति आदि दोषों से रहित ही किया जाता है । पर उसमें स्व–स्व शास्त्र के प्रतिपाद्य विषय भी विशेषतया अपेक्षित होते हैं । अतः उनकी दृष्टि से ही लक्षण बनाये जाते हैं । तद्यथा प्रकृत प्रसंग में उदात्तादि स्वरों के लक्षणों को देखें । वे चार प्रकार के दृग्गोचर होते है – 1. गुणबोधक, 2. गुणीबोधक, 3. अर्थबोधक और 4. उपलक्षक (गौण) ।

1. 'आयामो दारुण्यम्0' आदि लक्षण उदात्तादि गुणों के बोधक है । इस प्रकार के लक्षणों से महर्षि पाणिनि का व्याकरणकार्य चल नहीं सकता ।
2. अतः उन्हें 'उच्चैरुदात्तः' आदि गुणी बोधक लक्षण बनाने पडे । यहाँ गुणियों के माध्यम से उदात्तादि गुणों का बोध होता है ।
3. उक्त द्विविध लक्षणों से निरुक्तकार का कार्य चल नहीं सकता, क्योंकि उन्हें न तो वर्णोच्चारण सिखाना है, न ही शब्दों की निष्पत्ति सिखानी है । उन्हें तो शब्दों के अर्थ का प्रतिपादन करना अभीष्ट है ।

   अतः तद्दृष्ट्या आचार्य यास्क ने लक्षण बनाया कि 'तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम्' (निरु. 4.25)[47]। ये त्रिविध लक्षण लोक तथा सभी वेदों के लिए समानरूप से घटित होते हैं । अतः ये सर्ववेदपारिषद् के लक्षण हैं । चतुर्थ प्रकार के लक्षण की चर्चा से पूर्व मैं स्वकल्पित लक्षण को प्रस्तुत करना चाहता हूँ – 'भूसमानान्तराधस्तनरेखांकितोऽजनुदात्तः, वृक्षवदुपरितनरेखांकितोऽच् स्वरितः, निरंकितोऽजुदात्तः ।' ये लक्षण सभी संहिता व ब्राह्मण ग्रन्थों में स्वराङ्कन का प्रकार एक समान नहीं है । इतना ही नहीं ये लक्षण लोक व्यवहार के लिए सर्वथा अनुपयुक्त है, क्योंकि लोकव्यवहार में उदात्तादि उच्चारणविषयक है या श्रवणविषयक हैं । उसमें स्वराङ्कन का कोई सम्बन्ध नहीं है । इसलिए ये लक्षण अमान्य हैं । अब चतुर्थ प्रकार के लक्षण को देखते है ।

4. 'हृद्देनोच्चार्यमाणोऽजनुदात्तः, कण्ठदेशेनोच्चार्यमाणोऽच् स्वरितः, शिरोदेशेन भ्रूप्रान्तेन वोच्चार्यमाणोऽजुदात्तः ।' हस्तसंचालन सम्बन्धी ये लक्षण भी सर्ववेदपारिषद् न होने से

और लोकव्यवहार के लिए अनुपयुक्त होन से अर्थात् अव्याप्ति दोषदूषित होने से पाणिनीय परम्परा में मान्य नहीं हो सकते ।

उदात्तादि के उच्चैस्त्व, नीचैस्त्व एवं समाहार (समभाव) को लेकर जहाँ कहीं भी थोडा बहुत सादृश्य देखा गया है, वहाँ-वहाँ उदात्तादि के साथ उपमान-उपमेय-भावरूपी सम्बन्ध स्थापित किया गया है । तद्यथा -

**'शुक्लमुच्चं विजानीयात् नीचं लोहितमेव च ।**
**श्यामं तु स्वरितं विद्यादग्निरूच्चस्य दैवतम् ॥**
**नीचं सोमं विजानीयात् स्वरिते सविता भवेत् ।**
**उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमेव च ॥**
**वैश्यं तु स्वरितं विद्याद् भारद्वाजमुदात्तकम् ।**
**नीचं गौतममित्याहुर्गार्ग्यं तु स्वरितं विदुः ॥**
**विद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमेव च ।**
**जागतं स्वरितं विद्यादेवमेव नियोगतः ॥'**

(या. शिक्षा. 2.5, शैशिरिशिक्षा पृ. 7.8)

इनसे अतिरिक्त अन्यत्र अनुदात्त, स्वरित और उदात्तों को क्रमशः काल में प्रातः, मध्याह्न, सायं यज्ञों में प्रातः सवन, माध्यंन्दिनसवन, तृतीयसवन, प्राणों में अल्पप्राण, मध्यप्राण, महाप्राण आदि के रूप में वर्णन किया गया है । इन वचनों को देखकर कोई कहे कि ब्राह्मण उदात्त को, क्षत्रिय अनुदात्त को, वैश्य स्वरित को बोलता है । वैसे ही प्रातः या प्रातः सवन में अनुदात्त, मध्याह्न वा माध्यन्दिनसवन में स्वरित को बोलता है । वैसे ही प्रातः या प्रातः सवन में अनुदात्त, मध्याह्न वा माध्यन्दिनसवन में स्वरित एवं स्वरित एवं सायम् अथवा तृतीयसवन में उदात्त बोला जाता है । इस कथन को सर्वथा अव्यावहारिक, अशास्त्रीय, अप्रामाणिक ही मानना चाहिए । उन उपमान उपमेयों में जिस रूप में, जितने परिणाम में सादृश्यता सम्भव है, उतना अंश ही ग्राह्य है । न कि सर्वांशतः, यतोहि सर्वांशता का ग्रहण करने से उपामानोपेयता नहीं रहती । अन्यथा शास्त्रों मे अनेकत्र अनेकविध अनिष्ट ही अनिष्ट दृग्गोचर होगें ।

**प्रातः पठेन्नित्यमुरः स्थितेन स्वरेण शार्दूलरुतोपमेन ।**
**मध्यन्दिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥**
**तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।**
**मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरं स्थितेन ॥**

(श्लोकात्मक पाणिनीयशिक्षा - 36-37)

क्या मन्द्र (अनुदात्त) स्वर केवल प्रात:काल ही पढा जाता है ? मध्याह्न तथा सायं में नहीं पढा जाता? वैसे ही क्या मध्य (स्वरित) एवं तार (उदात्त) स्वर क्रमश: मध्याह्न तथा सायं ही पढे जाते है? अन्य कालों में नहीं? वेदपाठियों और संगीतज्ञों का अनुभव क्या इसीप्रकार का है? इस प्रकार के प्रश्नों का समाधान इन श्लोकों के रचयिता वा अध्येताओं से ही पूछना चाहिए ।

डॉ. प्रचेता जी ने अपने लेख में दो स्थानों पर लेख का निष्कर्ष लिखा है – 'इस पूर्वोक्त विवचेन से यह बात सुतराम् स्पष्ट हो गई है कि जोर लगाकार ऊँचे से बोलने पर उदात्त स्वर बनाता है तथा विना जोर लगाए शरीर को ढीला छोडकर मन्दध्वनि वाला अनुदात्तस्वर बनता है' (पृ. 159/1) । 'जबकि सूत्रकार, वार्त्तिककार व भाष्यकार का आशय सर्वथा स्पष्ट है कि जोर से बोलना उदात्त व धीरे से बोलना अनुदात्त है, जिसे मन्द व्यक्ति भी समझ सकता है और यह लोक में आबालवृद्ध द्वारा प्रयुक्त है' (पृ. 162/2) । भाष्यकार ने जिस उच्च, नीच भाव (श्रुतिप्रकर्ष) को अनवस्थितपदार्थक मानकर खण्डन किया था, उसे ही प्रचेता जी ने सिद्धान्तित किया है । यह आश्चर्यजनकपदार्थक मानकर खण्डन किया था, उसे ही प्रचेता जी ने सिद्धान्तित किया है । यह आश्चर्यजनक है । प्रचेता जी का निष्कर्ष उपांशुकी स्थिति में घटित न होन से अव्याप्तदोषदूषित है ।[48] सबसे बडा असत्य यह है कि उदात्तादि को आबालवृद्ध जानते है । यथार्थ यह है कि परम्परागत गुरु के मुख से प्रशिक्षित हुए विना कोई भी व्यक्ति उदात्तादि को बोल नहीं सकता ।

आधारहीन ऊहापोह की कल्पनाओं में प्रवाहित होने में ही अपना पाण्डित्य समझने वालों में से एक हैं पं. मधुसूदन ओझा जी । ऐसे विद्वान् के आलेखों को प्रामाणिक मानकर सर्वाङ्गीणतया विचार किए विना ही डॉ. प्रचेता जी के द्वारा यह निर्णय निश्चित कर लेना कि 'तत्र य: समाने स्थाने ऊर्ध्वभागनिष्पन्नोऽच् स उदात्त:' इत्यादि काशिकाकार के वचनों को हटाकर 'अल्पप्राणमहाप्राणयो: समाने प्रक्रमे उच्चैरुचार्यमाणोऽजुदात्तसंज्ञो भवति' तथा इसी प्रकार 'अल्पप्राणमहाप्राणयो: समाने प्रक्रमे नीचैरुच्चार्यमाणोऽजनुदात्तसंज्ञो भवति' इस प्रकार का संशोधन कर लेना चाहिए । यह सर्वथा अनुचित ही नहीं, अपितु प्रातिशाख्य, शिक्षा, व्याकरण आदि की शास्त्रीय परम्परा का अवमूल्यन भी है । अत: डॉ. प्रचेता जी से मेरा नम्र निवेदन है कि इस विषय पर शास्त्रीय दष्टिकोन से आप पुन: विचार करें ।

**सन्दर्भा:** –


1. ऋक्तन्त्र 2.6.1।
2. फिट्सूत्र 4.10 ।
3. पुष्पसूत्र 10.9।
4. नातानतिकम् (द्र. काशिका – पदमञ्जर्यौ – 4.3.67) ।

5. ऋक्तन्त्र 2.6.4.5 ।
6. फिट्सूत्र 4.10 ।
7. पुष्पसूत्र - 10.9, म. भा. 2.1.1
8. अष्टाध्यायी - 1.2.40 ।
9. तै. प्रा. 19.1 ।
10. तै. प्रा. 1.47 ।
11. तै. प्रा. 19.3 ।
12. उच्चनुदात्तयोर्योगे स्वरितः स्वार उच्यते (याज्ञवल्क्यशिक्षा - 228), अपि च द्र. वर्णरत्नप्रदीपिका शिक्षा - 102-103 ।
13. सामतन्त्र 7.5.6 ।
14. उदात्तत्वादीनामज्धर्मतया एव लोकप्रसिद्धत्वेन (लघुशब्देन्दुशेखरः) ।
15. लोकप्रमाणता के आधार पर प्रणीत अशिष्यप्रकरण के सूत्र (अष्टा. 1. 2. 53-57) हमारे कथन की पुष्टि करते है ।
16. उच्चैरित्यधिकरणशक्तिप्रधानम्, अधिकरणत्वञ्चोच्चारणं प्रति (लघुशब्देन्दुशेखरः, बृहद्शब्देन्दुशेखरः) ।
17. उच्चैरित्यस्याधिकरणप्रधानत्वात् क्रियापेक्षत्वाच्चाधिकरणस्योपलभ्यमान इत्युक्तम् । (पदमञ्जरी - 1.2.29)
18. ऊर्ध्वावयवस्य चावयव्यपेक्षायां तालुकण्ठादिवर्णाभिव्यक्तिस्थानानामित्यर्थल्लभ्यते (बालमनोरमा - 5)
19. अन्वर्थत्वं महासंज्ञाः व्यञ्जन्त्यर्थान्तराणि च (गार्ग्यगोपालयज्वा - तै. प्राति. 1.2) । महत्याः संज्ञायाः करण एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत (म.भा. 1.2.43)
20. ऊर्ध्वम् आत्तमिति चात उदात्तम् । (म. भा. 1.2.32) ।
21. सत्यं प्रसिद्धा एव ते (उदात्तादयः शब्दाः ), कुत्र प्रसिद्धाः? धर्ममात्र स्वरे (ध्वनौ), न तु तद्वत्यचि । ततश्च 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरिताख्यस्य धर्मस्यैव विधिः स्यात्, न च धर्मधर्मिणोः स्थान्यदेशभावः सम्भवतीति ..... 'तस्मादित्युत्तरस्य' इत्येतदपि न प्रवर्तेत (पदमञ्जरी) ।
22. द्र. न्यासपदमञ्जर्यौ, अपि च - समानस्थाने मूर्ध्न आसन्ने उपरिभागे जातेन प्रयत्नेन उच्चार्यमाणस्वर 'उदात्तगुणकत्वादुदात्तसंज्ञो भवति' (वैदिकाभरण तै. प्रा. 1.38) ।
23. कालो विवारसंवारौ श्वासनादावघोषता । घोषाऽल्पप्राणता चैव महाप्राणः स्वरास्त्रयः ॥ बाह्यं करणमाहुस्तान् वर्णानां वर्णवेदिनः (शिक्षा - 8.30,31)
24. प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतोऽचं व्यञ्जयति तदा स उदात्तः (द्र. शब्देन्दुशेखरद्वयम्) । अष्टौ स्थानानि...... स्थानानि, तेषु चोच्चनीचसमभेदात् त्रयोंऽशास्त्र

नाभिदेशादूर्ध्वमाक्रामदुदानवाय्वाभिघाताद् वर्णाभिव्यक्तिस्तत्रोच्चभागेऽभिव्यक्त उदात्तः (पाणिनीयशिक्षा की प्रभाटीका पृ. 1.2) । स्पष्ट है समानस्थान के ऊर्ध्वादि भागों में वर्णाभिव्यक्ति के लिए नाभिप्रदेश के यत्न अनिवार्य है । अर्थात् आयामादि बाह्‌ययत्नों से ही ऊर्ध्वभागनिष्पन्नत्वादि अन्तःप्रयत्न उत्पन्न होत हैं । अत एव काशिकाकार को द्विविधप्रयत्नपरक लक्षण बताना पडा ।

25. ऊर्ध्वभागनिष्पत्तेरप्रत्यक्षत्वाद् तन्निश्चये लिङ्‌गमाह – यस्मिन्निति (पदमञ्जरी) ।
26. आयामो दारुण्यमणुता खस्येति उच्चैः करणानि शब्दस्य (तै. प्राति. 22.9, म. भा. 1.2. 29,30) । आयामो नाम वायुनिमित्तमूर्ध्वगमनं गात्राणाम्, तेन य उच्यते स उदात्तः (उवटः ऋ. प्रा. 3.1, अपि च द्र. वाज. प्राति. 1.106) । समानस्थाने मूर्ध्न आसन्ने उपरिभागे जातेन प्रयत्नेन उच्चार्यमाणस्वर 'उदात्तगुणकत्वादुदात्तसंज्ञो भवति' (वैदिकाभरण तै. प्रा. 1.38) । उच्चैरुच्चार्यते यस्तु स उदात्त उदाहृतः । आयामो दृढता सौक्ष्म्यं गात्रेऽङ्‌गेषु तथा गले । उच्चत्वकारकानेतानाहुः प्राज्ञा विशेषतः (कौहिलीशिक्षा – 3) ।
27. इस के लिए मद्विरचित 'शिक्षाशास्त्र' की भूमिका, पृ. 37 देखें ।
28. उदात्तोच्चारणे तस्य देहदैर्घ्यं भवेद्यतः । उच्चारणेऽनुदात्तस्य देहस्य भवेत् (व्यासशिक्षा – 228, 289) । यहाँ भी स्पष्टतया कहा गया है उदात्तानुदात्त के उच्चारण में अध्येता के शरीरावयों में क्रमशः दीर्घता एवं ह्रस्वता होती है । यहाँ भी शरीरावयवों में जिह्‌वा में दीर्घता एवं ह्रस्वता होगी, परिणामतः उदात्त के उच्चारण में वायु का आघात तालु के ऊर्ध्वभाग में होगा और अनुदात्त क उच्चारण में तालु के अधोभाग में ।
29. भाष्यकार के इस अन्तिम समाधान पर सभी विद्‌वान गम्भीरता से विचार करें । क्योंकि जहाँ तक मैंने अध्ययन किया है, प्रायः सभी विद्‌वानों ने यहाँ बडी कठिनाई का अनुभव किया है । इसमें कैयट, प. मधुसूदन ओझा आदि भी अपवाद नहीं है । सभी ने अपने-अपने ढंग से निष्कर्ष निकाला है । मैं भी अपनी स्वल्पमति के आधार पर संगति व समाधान प्रस्तुत कर रहाँ हूँ ।
30. यहाँ श्रोतृशब्द छात्रादि का उपलक्षक है ।
31. श्रोता हि वक्तृगतानायामादीन् धर्मान् कार्यादवस्यति, कार्यं च संकीर्णम् । तथापि महाप्राणो नीचैरप्युच्चारयन् स्वरेण महान्तं देशं व्याप्नोति । अल्पप्राणस्तूच्चैरपि वदन्नल्पं देशं व्याप्नोति (प्रदीपः) । उद्योतोऽप्यत्र द्रष्टव्यः ।
32. स्वरित का प्रदर्शन भाष्य में कण्ठदेश से कहा है तो उद्‌धृत वचनों में श्रुतिमूल या कर्णमूल के प्रदेश से कहा गया है । वैसे ही उदात्त के प्रदर्शनार्थ भाष्य मं शिरोदेश का वर्णन है, तो उक्त वचनों में मूर्धा व भ्रू (वामभ्रू) देश का उल्लेख है ।

33. यहाँ 'मुख' शब्द आयामादि बाह्ययत्नों का भी उपलक्षक है ।
34. ताल्वादि के ऊर्ध्व, अधर, मध्य विभागों को सप्रामाणिक युक्तियों से लेखारम्भ में सिद्ध कर चुके हैं । और यह भो बताया जा चुका है कि इन भागों से उच्चारण करना अनुभव से बाहर नहीं है ।
35. उदात्तादि के उच्चारण के प्रसंग में एवं भाष्य के प्रकरण में 'प्रक्रम' शब्द का नाभितलगत वायु से अथवा प्रयत्नों से कोई सम्बन्ध नहीं है, ऐसा सप्रमाण प्रतिपादन किया जा चुका है । साथ में यह भी प्रतिपादित है कि स्वर के उच्चारण के साथ-साथ हस्तप्रदर्शन का प्रक्रत (प्रारम्भ) होना चाहिए ।
36. उदात्तश्चानुदात्तश्च स्वरितश्चैव त्रयः स्वराः । आयामविश्रम्भाक्षेपैस्त उच्यन्ते । (ऋक्प्राति. 3.1) ॥
37. आक्षिप्तः स्वरितः (च. अ. 1.16) ।
38. तस्यादित उदात्तमर्धह्रस्वम् (अष्टा. 1.2.32), ऋ. प्रा. 1.41, तै. प्रा. 1.41, वा. प्रा. 1. 126, च. अ. 1.17, ना. शिक्षा. 2.3.6, या. शिक्षा. 1.91 आदि ।
39. वाज. प्राति. 1.30, याज्ञवल्क्यशिक्षा - 51,108, प्रातिशाख्यप्रदीपशिक्षा - 1.11, केशवीयशिक्षा - 2 आदि ।
40. एकेषाम् - आचार्य शौनक (ऋक्प्राति. 1.40), शाकटायन (ऋक्तन्त्र-3) आदि ।
41. The Authoritu who called the aspirations chest-Sounds may also be commended for his acuteness, since in their production it may even be said htat the throat has no part. It is only, like the mouth, the avenue by whicht the breath expelled from the chest find exit. (ह्विटनी-चतुरध्यायिका 1.19)।

    अपि च 'अस्ति किञ्चिदुच्चारणमुरस्यैव प्रक्रमते, न कण्ठान्न शिरसः (ओझा-वर्णसमीक्षा, पृ. 135) ।'
42. इस सूत्र के भाष्य में लिखित '.... त्रीणि स्थानानि वायोर्भवन्ति' इस प्रकार के उवट एवं अनन्तभट्ट के शब्दों से सम्भवतः ओझा जी भ्रमित हुए ।
43. इस मतभेद का उल्लेख पूर्व में हो चुका है ।
44. 'इदम्' शब्द से प्रायः 'अष्टाध्यायी' का ही ग्रहण किया जाता है । पर यहाँ पाणिनि के पाँचों उपदेशों का ग्रहण करना चाहिए । क्योंकि पतञ्जलि की भावना पाणिनि के किसी एक शास्त्र के प्रति नहीं है, अपितु पाणिनि की प्रामाणिकता की ओर इंगित करती है । अतः 'इदम्' शब्द पाणिनीय शिक्षादि सभी उपदेशों का उपलक्षक है । भाष्यकार ने भी 'पार्षदकृतिरेषा तत्रभवताम् । नैव हि लोके नान्यस्मिन् वेदेऽर्ध ओकारो वास्ति' (एओङ्, एऔच्) । इन शब्दों से छन्दोगों के मत का निराकरण कर पाणिनीय शिक्षा को भी सर्ववेदपारिषद् घोषित कर दिया ।

45. तत्र नैकः पन्थाः शक्य आस्थातुम् (म. भा. 2.1.57) ।
46. साक्षात् पतञ्जलि भी अपाणिनीयत्व से भयभीत होकर अनेकत्र नतमस्तक हो जाते हैं – 'सिध्यत्येवम् अपाणिनीयं तु भवति । यथान्यासमेवास्तु ।' तब हमारा अस्तित्व ही क्या है ?
47. इसके विवरण के लिए निरुक्त के उक्त पूरे सन्दर्भ को और उसकी व्याख्याओं को देखें । साथ में युधिष्ठिर मीमांसक विरचित 'वैदिक-स्वर-मीमांसा' के पंचम अध्याय को भी देखें ।
48. नात्र श्रुतिकृतमुच्चैस्त्वम्, उपांशुप्रयोगेऽव्याप्तेः (शब्दन्दुशेखरद्वयम्-उच्चैरुदात्तः) । नादधर्मविशेष उच्चैस्त्वं नेह विवक्षितम्, उपांशूच्चार्यमाणे अव्याप्तेः । (बालमनोरमा - 5)

**सहायकाचार्य, व्याकरण विभाग**
**वेदगुरुकुलम्, पिडिचेड,**
**गज्वेल, सिद्दिपेट,**
**तेलंगाणा - ५०२२७८**

★★★

# भर्तृहरिदृशा अपभ्रंशशब्दविमर्शः

✍सुश्रीविदुषीबोल्ला

**(भर्तृहरेर्वाक्यपदीयं समेषां सम्बद्धानां शास्त्राणां पक्षं स्थिरीकृत्य पुनश्च तत्खण्डनपुरस्सरं महाभाष्यसम्मतं सिद्धान्तं समुपस्थापयति । ग्रन्थस्यास्य ब्रह्मकाण्डे अपभ्रंशानामर्थात् व्याकरणसंस्कारहीनानां शब्दानां वाचकत्वं न वेति बहु विचारितम् । यदि च वाचकत्वं तर्हि कीदृशम् ? तत्र तार्किकाः अपभ्रंशानां वाचकत्वं न स्वीकुर्वन्ति । तन्मते अपभ्रंशं श्रुत्वा साधुशब्द-स्मरणादर्थबोधः । परं ये न साधून् जानन्ति तेषां शक्तिभ्रमाद् बोध इति तेषामाकूतम् । परमेतन्न विचारसहम्, व्यवहारे साधुरिव असाधोरपि साक्षा-दर्थबोधकत्वस्यानुभवात् । अनुभवस्य चापलापानर्हत्वात् । तदुक्तं पत-ञ्जलिना - 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च'त्यादि । एतन्मूलकमेव हरिराह - 'वाचकत्वाविशेषेऽपि नियमः पण्यपापयोः'इति । अत्रेदमवधेयम् - शक्तत्वं यत्र भवति तत्रैव साधुत्वमिति नैयायिका आशेरते, किन्तु शाब्दिकाः शक्तत्वं साधुत्वं च पृथक् पृथक् स्वीकुर्वते । अपभ्रंशानां वाचकत्वेऽपि तेषां साधुत्वं न भवतीति भर्तृहरिहृदयम् । तथाहि - शब्दप्रयोगस्य प्रयोजनद्वयम् - अर्थबोधः, पुण्यञ्च । तत्रापभ्रंशेन प्रथमस्यैव प्रयोजनस्य सिद्धिः, साधुशब्देन च द्वयस्यैवेति परमार्थः । प्रकृतनिबन्धे अनुसन्धात्र्या क्रमेण प्रमाणपुरस्सरं सर्वानेतान् विषयान् प्रख्यापयति । -स.)**

संसारेऽस्मिन् यावन्तो वर्त्तमाना व्यवहारास्ते समेऽपि शब्दानुपातिन एवेति प्रत्यक्षानु-भवाच्छब्दस्य सकलकार्य्योपादानत्वं सिद्ध्यति । तदेव हरिणाऽप्युक्तम् -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ इति ॥**

अपि च, 'वागेव विश्वा भुवनानि जज्ञे' इति मन्त्रेणाऽपि शब्दमाहात्म्यमवगम्यत एव । शब्दाः अर्थप्रत्यायकाः भवन्ति । देशविशेषसम्बद्धशब्दसमूह एव तद्देशविशेषभाषारूपेण प्रसिद्ध्यते । इयं भाषा द्विविधा - शिष्टानामशिष्टानाञ्च । तत्र शिष्टैः साधुशब्दाः प्रयुज्यन्ते, अशिष्टैश्च अपभ्रंशशब्दाः । तत्र अपभ्रंशशब्दाः शक्ताः उत अशक्ताः इति विशदी चर्चा शास्त्रेषु दरीदृश्यते । विषयेऽस्मिन् विव्रियमाणाः बिन्दवः सन्ति -

1. किं नाम साधुत्वम् ?
2. अपभ्रंशत्वं किम् ?

3. साध्वसाधुत्वयोर्भैन्न्यम्
4. अपभ्रंशानां बोधकत्वे मतत्रयम्
5. तत्र तार्किकमतम्
6. भूषणकृन्मतम्
7. मञ्जूषाकृन्मतम्
8. वाक्यपदीयकृन्मतम्
9. निष्कर्षः

1. **किं नाम साधुत्वम्** – 'शास्त्रपूर्वके प्रयागे धर्म्मः', 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवती' त्यभियुक्तात्तेः साधुत्वञ्चात्र व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकत्वम् । साधुत्वज्ञानं व्याकरणागमाद् भवति, उक्तञ्च – 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृति' रिति ।
2. **अपभ्रंशत्वं किम्?** – अपभ्रंशत्वञ्च संस्कारहीनशब्दत्वम् । हरिणाऽप्युक्तम् –

**शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।**
**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥**

अस्यैव शब्दान्तरं वर्त्तते असाधुत्वमिति ।

3. **साध्वसाधुत्वयोर्भैन्न्यम्** – अर्थबोधकत्वन्तु साधुष्विव असाधुष्वपि तिष्ठति । किन्तु धर्म्मजनकत्वं केवलं साधुषु शब्देष्वेव वर्त्तते । यथा तुल्येऽपि रूपत्वे नीलं चक्षुषोऽनुग्राहकं भास्वरं तूपघातकम्, तुल्येऽपि रसत्वे मधुरः श्लेष्माणं जनयति, कटुकः पित्तम्, केषाञ्चिच्छब्दानां विषापहरणादौ सामर्थ्यमन्येषामसामर्थ्यम्, तथैव साधुशब्दानां धर्म्मजनकत्वम्, असाधूनाञ्च धर्म्मजनकत्वाभाववत्त्वम् । उक्तञ्च हरिकारिकायाम् –

**असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।**
**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ॥**

4. **अपभ्रंशानां बोधकत्वे मतत्रयम्** –

(क) अपभ्रंशशब्देन साधुस्मरणं तत एव बोधः इति तार्किकाः ।

(ख) अपशब्दः शब्देन तादात्म्यापन्नोऽर्थम्बोधयतीति द्वितीयम् ।

(ग) अपशब्दः शब्दवत् साक्षादेवार्थं बोधयतीति शाब्दिकाः ।

तदेव वाक्यपदीयकारिकायामपि दृश्यते –

**असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।**
**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ॥**
**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।**
**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥ इति॥**

5. **तत्र तार्किकमतम्** – नैयायिकाः ब्रूवते – अपभ्रंशो न वाचकः । द्विविधो हि जनः, व्युत्पन्नः, अव्युत्पन्नश्च । अपभ्रंशशब्दं श्रुत्वा साधुशब्दस्मरणेन परम्परया व्युत्पन्नानां बोधः, न तु अपभ्रंशात् साक्षात् बोधो जायते । अपि च, ये अव्युत्पन्नाः सन्ति, ते असाधुः = अपभ्रंशः शक्तः इति शक्तिभ्रमात् अपभ्रंशेनैव शाब्दबोधं लभन्ते । तदेवाक्तं शाबरभाष्ये – 'गौरिति प्रयोक्तव्ये केनचिदशक्त्या प्रमादेन वा गावीति प्रयुक्तम् । ततः श्रोतुः गौरितिप्रयोक्तव्ये गावीत्यनेन प्रयुक्तमिति गोपदस्मृत्या गोविषयको बोधो जातः, ततः पार्श्वस्थेन गावीशब्दादेवास्य बोधो जात इति भ्रान्त्या प्रतिपन्नमिति तेन गावीशब्दस्य गोरूपऽर्थे तादात्म्याभावेऽपि तादात्म्यमुपगम्य गावीशब्दादेव साक्षाद्बोधो भवती'ति । स्पष्टञ्चेदं 'तदशक्तिश्चानुरूपत्वात्' इति सूत्रे शाबरभाष्ये । भर्तृहरिणाऽपि स्वकारिकायां प्रदर्शितम् – **ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।**

**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥**
**न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः ।**
**न यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥**

वाक्यपदीये अपभ्रंशानां साधुस्मरणद्वारेण बोधकत्वे, एतेषां साक्षात् वाचकत्वाभावे च दृष्टान्तः प्रदर्श्यते – यथा दन्तादिकरणानामपूर्णसामर्थ्याद् बालेन प्रयुक्तेऽपभ्रंशे सति तत्प्रकृतिकसाधुशब्दज्ञैः श्रोतृभिः तच्छब्दम् अनुमीय तदर्थं ज्ञायते । साधुशब्द-एवार्थबोधकमिति निश्चिन्वन्ति, न तु बालोच्चारितापभ्रंशशब्दः । अत्र कारिका स्तु –

**अम्बाम्बेति यदा बालः शिक्ष्यमाणोऽपभाषते ।**
**अव्यक्तन्तद्विदां तेन व्यक्ते भवति निश्चयः ॥**
**एवं साधौ प्रयोक्तव्ये योऽपशब्दः प्रयुज्यते ।**
**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥**

6. **भूषणकृन्मतम्** – अपभ्रंशादपि लोके बोधदर्शनात् बोधकजनकत्वरूपशक्तिस्तत्राऽपि वर्त्तते। शक्तत्वस्येव साधुतायाः व्याकरणाधिकरणे शास्त्रदीपिकेति ग्रन्थे प्रतिपादनात्, शक्तत्वे साधुताऽपि भवेदेव इत्याशङ्कां द्विधा समाधत्ते – अपभ्रंशानां साक्षाद्बोध-जनकत्वरूपशक्त्य – नभ्युपगमेन, वाचकत्वस्य सत्त्वेऽपि साधुत्वस्याऽन्यथानिर्वचनेन चेति प्रकारद्वयेनेति तत्त्वम् ।

अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणादेव अपभ्रंशेभ्यो बोधो भवतीति विभावनीयम् । तानजानतां पामराणामपि लोके बोधदर्शनात्, एतेषां साधोरबोधाच्च । न च अपभ्रंशेषु शक्तिभ्रमाद् बोधो भवतीति वक्तव्यम्, बोधकत्वाभावरूपबाधज्ञानाऽसम्भवेन अर्थात् तदभाववत्ताज्ञानम्प्रति तद्वत्तानिश्चयस्य प्रतिबन्धकत्वात् तद्ग्रहस्याभ्रमत्वाच्च । अर्थात् किमपि ज्ञानं तावद् भ्रमः न कथ्यते, यावत् तस्य ज्ञानस्य कश्चित् बाधकः न भवेत् । यथा कस्यचित् असाधुः शब्दः शक्तः

इति शक्तिज्ञानम् अस्ति, परन्तु पश्चात् असाधुः शब्दः न शक्तः इति पूर्वज्ञानस्य बाधकं ज्ञानं जायते, तदा पूर्वज्ञानं भ्रमः कथ्येत । अर्थात् सन्देहरहितज्ञानं बाधकज्ञानं विना भ्रमो भवितुं नार्हति । तथा च अज्ञानिनां जनानां तु बाधकज्ञानं भवति नहि, तर्हि तेषां शक्तिभ्रमात् शाब्दबोधो भवतीति न सम्यक् । अत एव स्त्रीशूद्रबालकादिद्वारा अन्यथा उच्चारिते साधुशब्दे यदा अर्थसन्देहो भवति, तदा तेषाम् उच्चारितेन अपभ्रंशशब्देन एव लोके अर्थनिर्णयः क्रियते ।

7. **मञ्जूषाकृन्मतम्** – नैयायिकाः व्याकरणनिष्पाद्यत्वं साधुत्वम्, शक्तत्वम् एव साधुत्वमिति स्वीकुर्वन्ति । वयाकरणमते तु साधुत्वं शक्तत्वञ्च भिन्नमेव । तथा च शक्तत्वम् अपभ्रंशऽपि भवति, किन्तु अपभ्रंशाः साधुत्वाभाववन्तः भवन्ति ।

नागेशमते वाच्यवाचकभावरूपा शक्तिः यथा साधुशब्देषु तिष्ठति, तथा अपभ्रंशेषु अन्यथोच्चारितेषु असाधुशब्देष्वऽपि तिष्ठति । तथा च नानाशक्तिग्राहकेषु व्याकरणोपमानकोशादिषु शिरोमणिः श्रेष्ठस्य व्यवहारः साधूनाम् असाधूनाञ्च समानरूपेण शक्तिं ग्राहयति । पदपदार्थम् अजानतां बालानां जडपशूनाञ्च प्रवृत्तिं दृष्ट्वा पूर्वजन्मनः ज्ञातायाः शक्तेः स्मरणं भवतीति कल्प्यते । तेन च तेषां शाब्दबोधः । जडपश्वादीनाञ्चाऽपि स्वजात्यनुसारं सुनिश्चिता काचित् प्रतिभा भवति, अतः तेषामपि अनादिवासनया एव स्तन्यपाने जलतरणादौ प्रवृत्तिः । एवञ्च बाल्यकाले, पशूनां प्राथमिकप्रवृत्तौ च शक्तिग्रहस्य असम्भवात् जन्मान्तरीयशक्तिग्रहः कारणत्वेन बुद्ध्यते । अपभ्रंशशब्दाः शक्ताः इत्यत्र मञ्जूषायां त्रीणि प्रमाणानि प्रदर्शितानि –

क. भाष्यकारवचनमेव प्रमाणम् – समानायामर्थावगता शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः।

ख. भर्त्तृहरेः प्रमाणम् – वाचकत्वाऽविशेषेऽपि नियमः पुण्यपापयोः इति ।

ग. मीमांसकानामार्य्यम्लेच्छाधिकरणमपि प्रमाणम् –

आर्य्यम्लेच्छाधिकरणे म्लेच्छप्रचलितार्थज्ञानस्य अपेक्षया आर्य्यप्रसिद्धेः – आर्य्यप्रचलि– तार्थज्ञानस्य वैदिकवाक्यात् जायमान शाब्दबोधे बलवत्त्वं प्रतिपादयन्ति । अयमाशयः – द्वौ यदि कार्य्यसाधकौ स्तः, तर्हि अनयोः कतरः बलवान् कार्य्यसाधकः इति विचारः क्रियते । यदि एकः कार्य्यस्य साधकः, एकश्च कार्य्यस्य असाधकः भवेत्, तर्हि साधकस्य बलवत्त्वं स्वतः सिद्धं भवति । तदर्थं विचारस्य आवश्यकता न जायते ।

8. **वाक्यपदीयकृन्मतम्** – एकतरपक्षपातियुक्तिरूपविनिगमनाविरहाच्छक्तिः साधुशब्देष्विव अपभ्रंशेष्वपि तिष्ठति । शब्दानां साधुत्वासाधुत्वव्यवस्थायाः निमित्तं न केवलं शब्द– स्वरूपमेव प्रत्युत प्रवृत्तिनिमित्तभेदप्रयुक्तार्थभेदः । तथा च व्याकरणप्रक्रियया व्युत्पादि– तोऽपि 'अस्व'शब्दः एकशफत्वरूपाश्वत्वप्रवृत्तिनिमित्तविशिष्टेऽर्थे प्रयुक्तोऽसाधुः, किन्तु स एव स्वभिन्ने धनाभावे निर्धने वा स्वशक्यार्थे प्रयुक्तः साधुर्भवति, एवं 'गोणी'शब्दः सास्नादिमत्त्वरूपगोत्वप्रवृत्तिनिमित्तविशिष्टे स्वशक्यार्थे 'गवि' अर्थे प्रयुक्तोऽसाधुर्भवति,

परन्तु गोदोहनपात्रत्वरूपावपनत्वविशिष्टे स्वार्थे प्रयुक्तः साधुर्भवति । तदेवोक्तं भर्तृहरिणा – **अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।**
**निमित्तभेदात् सर्वत्र साधुत्वन्तु व्यवस्थितम् ॥**

करणपटुत्वोच्चारणसामर्थ्यादिगुणरहितसंस्कृतज्ञानरहितवक्तृणां कृते अनादिपूर्वपूर्व-प्रयोगमूलकोत्तरोत्तरप्रयोगप्रवाहात् प्रसिद्धिं लब्धाः अपभ्रंशशब्दाः मातृभाषारूपेण रूढित्वमापन्नाः साक्षाद् वाचकाः भवन्ति । तेषां कृते अपभ्रंशशब्दानां मूलसंस्कृतशब्दाः अज्ञातशक्तिकत्ववन्तः स्मृतेरविषयः सन्तः अर्थबोधकाभाववन्तो भवन्ति । तदेवोक्तं वाक्यपदीये – **पारम्पर्य्यादपभ्रंशा निर्गुणेष्वभिधातृषु ।**
**प्रसिद्धिमागता ये तु तेषां साधुरवाचकः ॥**

अपभ्रंशेष्वपि शक्तिस्वीकारे नानात्वापत्तिस्तु न स्यात् । संस्कृतवत् सर्वभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् । किञ्चानुपूर्वी वाचकतावच्छेदिका । सा च पर्य्यायेष्विव अपभ्रंशेष्वपि अन्यान्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः । तथा च संस्कृतवद् अपभ्रंशस्य सर्वत्रैकत्वेन प्रत्येकं शब्दा शक्ता एव । न च पर्य्यायतया अपभ्रंशानां गणनापत्तिः, साधूनामेव कोशादौ विभागाभिधानात् ।

9. **निष्कर्षः** – अत्राऽनित्यवादिनां मतं यत् अपभ्रंशा एव साधूनां प्रकृतयः, साधवस्तु संस्काराज्जाताः संस्कृताः । इत्थञ्चापभ्रंशा एव वाचका इति तत् प्रकरणविरुद्धमेव । शक्तत्वं साधुत्वमिति स्वीकुर्वतां तार्किकाणां मतमप्यसमीचीनम्, उभयोः पृथग्विषयत्वात्। साध्वसाध्वोः प्रकृतिविकृतिभावाग्रहं विहाय साधूनामसाधूनाञ्च तुल्यं वाचकत्वमिति भर्त्तृहरीणां प्रमाणभूताचार्य्याणां हृदयम् । किन्त्वत्र पुण्यजनकत्वन्तु साधूनामेव 'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः' इति कारिकया स्फष्टीक्रियते मुनिपुङ्गवेन हरिणा ॥

**सहायकग्रन्थसूची**


1. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः – सूर्यनारायणशुक्लः, रामगोविन्दशुक्लः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, प्रथमसंस्करणम्, 2006 ।
2. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः, व्याख्याकारश्च – आचार्य्यवेदान्तझाः, मन्दाकिनीसंस्कृतविद्वत्परिषद्, दहली, प्रथमसंस्करणम्, 2002 ।
3. व्याकरणमहाभाष्यम्, सम्पादकः – श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथम-संस्करणम्, 1938 ।
4. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः – श्री प. ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, 2005 ।

5. परमलघुमञ्जूषा, सम्पादको व्याख्याकारश्च – प्रो. बोधकुमारझाः, हंसाप्रकाशनम्, जयपुर, संस्करणम्, 2018 ।
6. लघुशब्देन्दुशेखरः, सम्पादकः – प्रो. बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, 2013 ।
7. समासस्तदव्ययीभावश्च, प्रो. बोधकुमारझाः, विद्यानिधिप्रकाशनम्, देहली, प्रथमसंस्करणम्, 2011 ।
8. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथमसंस्करणम्, 2003 ।
9. तत्त्वबोधिनीसमाख्यव्याख्यासंवलितासिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, 2010 ।
10. वैयाकरणभूषणसारः प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः – श्रीबालकृष्णपञ्चोली, चौखम्बा-संस्कृतसंस्थानम्, संस्करणम्, वि.सं. 2068, ई. 2012 ।
11. परमलघुमञ्जूषा, भावप्रकाशिका, बालबोधिनी संस्कृतहिन्दीव्याख्योपेता, व्याख्योपेता, व्यख्याकारः सम्पादकश्च – डा. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011 ।
12. संस्कृतभाषाविज्ञानम्, अनुसन्धाता – चक्रवर्ती श्रीरामाधीनचतुर्वेदी, चौखम्बाविद्याभवनम्, वाराणसी, प्रथमसंस्करणम्, 2005 ।

**गवेषिका**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**मुम्बई – ४०००७७**

★★★

# वाक्यपदीये स्फोटविमर्शः

✍डॉ. सुभाषचन्द्र मीणा

**(स्फोटसिद्धान्तो हि शाब्दिकानां दार्शनिकचिन्तनस्य भूमिः । पत्रप्रस्तोता विषयान् संक्षिप्य तत्सिद्धान्तसम्बद्धान् विषयान् समुपस्थापयति । तत्र वेदादीनां प्रामाण्यमपि निरूप्य स्फोटस्य भेदान्, वाक्स्फोटस्य मुख्यत्वम्, ध्वनेः स्वरूपम्, शब्दनित्यत्ववादादिकं च प्रस्तौति । - स.)**

स्फुट्यन्ते, अभिव्यज्यन्ते वर्णा अनेनेति स्फोटः, फुटति अभिव्यक्तीभवति अर्थः अस्मादिति वा स्फोटः ।




**अर्थक्रियासु वाक् सर्वा समीहयति देहिनः ।**
**यदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥**[1]
**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥**[2]

अर्थ बुद्धवा शब्दरचनेति वक्ता अर्थज्ञानपूर्वकं श्रोतुः तद्बोधाय शब्दप्रयोगं करोति तदर्थं विदित्वा श्रोतुः प्रवृत्तिः निवृत्तिर्वा भवति । एवञ्च पदज्ञानं, पदार्थबोधः, ततः पदार्थसंसर्गात्मकवाक्यार्थबोधः इति क्रमोऽनुभवसिद्धः । पदाथानां परस्परसंसर्गात्मकवाक्यार्था एव शाब्दबोध इत्युच्यते । अपदं न प्रयुञ्जीतेति वचनात् सुबन्तस्य तिङन्तस्य अर्थात् परिष्ठितस्यैव पदत्वव्यवहारः । यद्यपि शक्तं पदमिति प्रकृत्यादीनामपि पदत्वेन व्यवहारः नव्यनैयायिकैः क्रियते तथापि न्यायदर्शने गौतमः सुबन्ततिङन्तयोः पदत्वमन्वाचष्टे । पदज्ञानपूर्वकपदार्थज्ञानमात्रेण निराकाङ्क्षत्व भावात् पदसमुदायात्मकं वाक्यमपेक्ष्यते । न्यायभाष्यकारः वात्स्यायनः वदति पदसमूहो वाक्यमर्थ-

समाप्तौ इति । सुबन्ततिङन्तपदसमुदायात्मकः अर्थसमाप्तौ समर्थ इत्यर्थः । पदसमूहो नाम सुबन्तसमुदायः तिङन्तसमुदायः, सुबन्ततिङन्तसमुदायश्च । यथा चैत्रेण गन्तव्यम्, पचति भवति, चैत्रौ गच्छतः ।

शब्दनित्यतावादिनः वैयाकरणाः । नित्यस्यैव शब्दस्य वाचकत्वमिच्छन्ति । तस्य स्फोट इति व्यवहारः । वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयः जातिस्फोटा इति अष्टौ पक्षाः सिद्धान्तिताः । तत्र वाक्यस्फोटो नाम वाक्यं वाचकमिति मुख्यसिद्धान्तः । अत एवोक्तं न्यायभाष्यकृता – 'पदसमूहो वाक्यमर्थसमाप्तौ' इति वाक्यस्य मुख्यत्वम् । वाक्यस्फोटात्मकवाक्यस्याखण्डस्य मुख्यत्वेऽपि प्रागुक्तनिर्वाहाय पदवर्णस्फोटकल्पना कृतेति बोध्यम् । वाक्यकल्पितपदतदेकदेशयोर्मध्ये वर्णस्फोटः शास्त्रप्रक्रियानिर्वाहकः । वर्णपदं पदैकदेशपरम् । प्रकृतिः प्रत्ययश्च ।

एवं वाक्यस्फोटात्कस्य वाक्यस्य मुख्यं वाचकत्वं सिद्धम् । अर्थान्तरवाचकस्य शब्दस्यार्थान्तरे प्रयोगे कृते श्रोतुः कथञ्चित् अर्थबोधे जातेऽपि न हि तस्य प्रमाणत्त्वम् । किन्तु आप्तोच्चारितस्यैव शब्दस्य प्रामाण्यम् । आप्तस्य लक्षणं चरके पतञ्जलिना उक्तम् आप्तो नामानुभवेन वस्तुतत्त्वस्य कात्स्न्र्येन निश्चयवान्, रागादिवशादपि नान्यथावादी यः सः इति । रागादिपराधीनतयाऽन्यथाभाषणस्वभावरहितत्वे सति सर्व वस्तुयाथार्थ्यविषयका परोक्षसाक्षात्कार-जन्यसर्वांशिकनिश्चयवत्त्वम् आप्तत्वम् । 'आप्तोपदेशः शब्दः' इति सूत्रव्याख्याने न्यायभाष्यकारः – अर्थसाक्षात्कारवानाप्तः । सः यथा दृष्टार्थबुबोधविषया यं प्रयुङ्क्ते सः प्रमाणशब्दः इति ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणम् इत्याह ।

स्फोटवादस्य प्रेरणास्रोतांसि सन्ति वेदब्राह्मणोपनिषद्महाभारतादीनि । स च स्फोटो नित्यो ब्रह्स्वरूपो निरुपाधिकः । तस्मादेव सम्पूर्णस्यार्थजातस्य विवर्तनम् । ध्वनितश्चायमर्थः –

**ऋचो अक्षरे परमे व्योमन् देवा अधि विश्वे निषेदुः ।**[3]
**चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**[4]
**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ।।**[5]

इत्येवं रूपेण वैदिकवाङ्मयादिषु ।

वैयाकरणसम्प्रदाये स्फोटवादस्य प्रचलनं कदा प्रभृति समारब्धमिति निश्चप्रचं न शक्यते वक्तुं तथापि पाणिनिना 'अवङ्स्फोटायनस्य' इति सूत्रनिर्माणादवगम्यते यत् पाणिनेः पूर्वमेवास्य प्रचारो वैयाकरणसम्प्रदाये संबभूव नागेशभट्टेनापि स्वकीयस्फोटवादनामके पुस्तके लिखितम् ।

**वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।**
**परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः ।।**[6]

एतद्वादानुसारं शब्दानां नित्यत्वमङ्गीकार्यम् । शब्दनित्यत्ववाद एवास्य वादस्याधारशिला अस्ति । यद्यपि पाणिनेरष्टाध्याय्याः कस्मिन्नपि सूत्रे स्फोटस्य नाम न दृश्यते । तथापि 'तदशिष्यं

संज्ञाप्रमाणत्वात्', 'पृषोदरादीनि यथोपदिष्टम्' इत्यादीनि सूत्राणि प्रणीय पाणिनिना शब्दरूपं नित्यत्वं स्पष्टमेवोद्घुष्टम् । 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिकमारभता कात्यायनेनापि स्पष्टमेव स्वीकृतं तत् तथ्यम् । महाभाष्यकारेण पतञ्जलिनापि 'नित्येषु शब्देषु' इत्याद्येवं रूपेण व्याहरता शब्दस्य नित्यत्वमङ्गीकृतम् । तदुक्तम् -

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥**[7]

एवं प्रकारेण प्राप्तमान्यताकस्यास्य सिद्धान्तस्य प्रौढं विवेचनं भर्तृहरेः वाक्यपदीये द्रष्टुं शक्यते । स्फोटस्य नित्यत्वं ब्रह्मरूपत्वं च स्पष्टीकुर्वतोक्तं तत्र -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[8]

एवं लक्षणलक्षितस्य स्फोटस्य यद्यप्यस्ति निरुपाधिकत्वं तथापि व्यञ्जकवर्णपदादि-रूपेणैवास्माकं ज्ञानविषयता तस्य । ब्रह्मात्मकस्य तस्यैकत्वेऽपि व्यञ्जकध्वनीनामानन्त्येनानन्त्यं भवति । अस्माकं मुखेभ्यः क, ख, ग, इत्यादिवर्णरूपेण, घटपटादिपदरूपेण, निःसृतं तत् सर्वं ध्वनिरेव । तेन व्यक्तोऽत एव तदाकाराकारितः आन्तरः स्फोट एव शब्दः सः एव सर्वार्थवाचकः। वक्तुः मुखात् यादृशो ध्वनिः निःसरति तादृगेव श्रोतुरान्तरोऽभिव्यज्यते स्फोटः । ध्वनिश्च द्विविधो भवति प्राकृतो वैकृतश्च । तत्र प्राकृतस्यैव ध्वनेः कालः स्फोटे उपचर्यते । वैकृतध्वनिस्तु केवलं तत्र द्रुतमध्यविलम्बितादिवृत्तिभेदापादक एव भवति । तदुक्तम् -

**स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।**
**वृत्तिभेदे निमित्तत्वं वैकृतं प्रतिपद्यते ॥**[9]

स्फोटे ध्वनिप्रतिबिम्बसमर्पकाश्च स्थिराः संस्कारा एव भवति । वस्तुतस्तु स्फोटमन्तरा न शक्यते उपपादयितुं शब्दादर्थः प्रतिजानामि एकमिदं पदं, वाक्यं वेति सर्वानुभवसिद्धा प्रतीतिः । वर्णानां वाचकत्वे हि एकमिदं पदमिति कथं शक्यते वक्तुं, तेषां नानात्वात् ।

एवञ्चात्र स्फोटशब्दस्य व्युत्पत्तिद्वयं फलितं भवति - स्फुटति अर्थोऽस्मात् असौ स्फोटः, स्फुट्यते वर्णैरिति स्फोटः । प्रथमव्युत्पत्त्या तस्य वाचकत्वं, द्वितीयया च तस्य व्यङ्ग्यत्वं सिद्ध्यति ।

उक्तञ्च हरिणा - **द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥**[10]

अयमाशयः - वाचकशब्दो द्विविधः । एकस्तु श्रोतग्राह्यवैखरीरूपः स्फोटरूपप्रकाशन-समर्थः । अपरस्तु आन्तरः स्फोटः अर्थप्रकाशनक्षमः । यथा शमीकाष्ठमध्यभागो वह्निः मन्थनादिनोद्बुद्धस्य बहिरुपलभ्यमानस्य वह्नेरूपादानं भवति, तथैव वक्तुं प्रयत्नेन विवृद्धः स्फोटो ध्वनिरूपरूषितः सन् परश्रवणग्राह्यो भवति । परेण श्रुतश्च हृत्स्थं स्फोटमभिव्यज्यार्थं व्यनक्ति नास्ति ध्वनिरहितस्य स्फोटस्य प्रत्यक्षम् । वाचचारम्भणं विकारनामधेयं मृत्तिकेत्येव

सत्यमितिवत् ध्वनिरूपोपाधिरेव भिन्नः स्फोटस्तु एक एव । अत एव सोऽयं गकारः इति जायते व्यवहारः ।

यच्चोक्तम् – **बुद्धा कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तवन्नीतिः ।**

**शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥**[11]

वस्तुतस्तु वैयाकरणसिद्धान्तानुसारं यदनादिनिधनं शब्दात्मकं ब्रह्म तज्ज्ञानार्थमेव प्रकृति-प्रत्ययादिविभागः काल्पनिकः कृतो वर्तते । स्फोटो ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन यदा मूलाधारे संस्कृतपवनेनाभिव्यज्ज्यते तदा परा वाग् इत्युच्यते । प्रापय्य कण्ठदेशे मूर्धानमाहत्य परावृत्तेन वायुना अभिव्यक्तो हि स्फोटो वैखरीनाम्ना प्रसिद्धः ।

तदुक्तम् – **परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**

**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥**[12]

नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तं पराख्यं शब्दब्रह्मैव पश्यन्तीत्युच्यते । पश्यन्त्यां स्पन्दसामान्यमस्ति । स्पन्दविशेषस्तु मध्यमायाम् । अयं पश्यन्ती शब्दः मानसः प्रत्यक्षविषयः । परापश्यन्त्योर्मध्ये आद्यः योगिनां समाधौ निर्विकल्पकज्ञानविषयः, द्वितीयसविकल्पकज्ञानविषयः । ततो हृदयपर्यन्तमागच्छता तेन वायना हृदयदेशे पार्थक्येन शब्दार्थविशेषप्रकाशकेनान्तःकरणेन विषयीकृता परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागित्युच्यते । आस्यपर्यन्तं गच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्ता मध्यमैव वैखरी वागित्युच्यते ।

एतासु चतसृषु वाक्षु प्रणवस्वरूपा संस्कारयोग्या परा वाक् । यथा वाक्यपदीये –

**स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।**

**तस्या दृष्टस्वरूपायामधिकारो निवर्तते ॥**[13]

शिष्टाः तिस्रः वाचः संस्कारयोग्याः । योगिनां तु पश्यन्त्यामपि प्रकृतिप्रत्यय-विभागावगतिरस्ति । अत एव हरिणा व्याकरणस्य त्रिविधा वाग्विषय इत्युक्तम् यथा –

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।**

**अनेकतीर्थभेदायास्त्रय्या वाचः परम्पदम् ॥**

अथेदानीमिदमप्यपेक्षते विवेचनीयतां वर्णोत्पतिविषयेऽभिव्यक्तिविषये वा प्रतीयमानो मतभेदो वैयाकरणानाम् ।

तद्यथा – पाणिनिनोक्तं शिक्षायाम् –

**आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।**[14]

भर्तृहरिणा च –

**वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।**

**कैश्चित् दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ॥**[15]

इत्युपक्रम्य वायोः शब्दत्वापत्तिरेवं प्रादर्शि

**लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।**

**स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥**[16]

ज्ञानस्य च कथं शब्दत्वमिति विषये तेनोक्तम् -

**अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मनास्थितम् ।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥**[17]

नागेशेन तु मञ्जूषायां वायोरणूनामिति श्लोको वैखरीपर इति स्वीकुर्वता मूलाधारस्थ-पराशक्तेरेव पश्यन्त्यादिक्रमेण शब्दरूपपरिणाम इति प्रत्यपादि ।

केचित्तु वायोरणूनामिति हरिकारिका शब्दकार्यवादाभिप्रायेणेति वदन्ति अत एवाणूनां शब्दत्वापत्तिः संगता भवतीत्यन्यदेतत् ।

यद्यपि - **शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।**
**छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥**[18]
**अनादिनिधनं ब्रह्मं शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थ भावेन प्रक्रिया जगतो यतः ॥**[19]

इत्येवं प्रकारेण शब्दपरिणामवादः, शब्दविवर्तवादश्च वाक्यपदीये प्रदर्शितो हरिणा तथापि शब्दविवर्तवाद एव वैयाकरणसम्मत इति शक्यते वक्तुं निश्चप्रचम् ।

अत एव - **वागेव विश्वा भुवनानि जज्ञे ।**
**वागेवार्थं पश्यति वाग् ब्रवीति ॥**
**वागेवार्थं निहितं सन्तनोति ।**

इत्याद्युक्तिभिः जगतो वाङ्मयत्वप्रतिपादनं संगच्छते । ध्वनिव्यङ्ग्यः स्फोटो वैयाकरणमते सिद्धयति । ध्वनिः स्फोटस्य व्यञ्जकः अतः शब्दगुणः । पतञ्जलिनाऽप्युक्तं - स्फोटः शब्दः ध्वनिः शब्दगुणः । एवं स्थितेऽत्र केचिद् वदन्ति - वर्णानां क्षणिकत्वे मानाभावात् वर्णा एव शब्दाः । तेषामेव तत्तदर्थैः सह शक्तिरूपः सम्बन्धः । ते चाकारादयो वर्णाः परमाण्वभिन्ना-वयवाः न शंकनीयम्, सोऽयं ककारः इति प्रत्यभिज्ञायमानत्वेन तत्रैकत्वस्य सिद्धेः ।

**वर्णा वा ध्वनयो वापि स्फोटं न पदवाक्ययोः ।**
**व्यञ्जन्ति व्यञ्जकत्वेन यथा दीपप्रमादयः ।**
**नार्थस्य वाचकः स्फोटो वर्णेभ्यो व्यतिरेकतः ॥**[20]

तस्मात् - अत्वकत्वादिधर्मवन्तो वर्णरूपा ध्वनय इव पदवाक्यरूपा अपि ध्वनयस्त-दाकाराकारितस्य स्फोटस्य व्यञ्जकाः । पारमार्थिकरूपेण यथा ब्रह्मणि नास्ति प्रपञ्चाध्यासः किन्तु शब्दब्रह्मणि ध्वनिधर्माणां व्यावहारिकमध्यस्तत्वमस्ति इति न काप्यनुपपत्तिः।

यद्यपि वैयाकरणसिद्धान्ते अष्टौ स्फोटाः स्वीकृतास्तथापि निराकांक्षार्थबोधजनकतया वाक्यस्फोटस्यैव तत्र मुख्यत्वम् । इमानष्टौ स्फोटान् पञ्चविभागे प्रविभज्यैषाम् अन्न-मयादिपञ्चकोशैः सह तुलना कृता वैयाकरणभूषणे कौण्डभट्टेन । यथा अन्नमयादयः कोशाः

आनन्दमयस्य शुद्धब्रह्मणः प्राप्त्युपायभूताः सन्ति, तथैवात्राणि वर्णपदवाक्यस्फोटाः अखण्डवाक्यस्फोटात्मकस्य शब्दब्रह्मणः परेत्यपरनामधेस्य प्राप्त्युपायाः सन्तिः ।

यदर्थमुक्तम् - **तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।।**[21]

**सन्दर्भाः -**


1. वाक्यपदीयम् ब्रह्मकाण्डम् - 128
2. वाक्यपदीयम् ब्रह्मकाण्डम् - 124
3. ऋग्वेदः 1.164.39 ।
4. ऋग्वेदः 1.164.45 ।
5. ऋग्वेदः 4.58.3 ।
6. स्फोटवादः पृ. 102 ।
7. वाक्यपदीयम् ब्रह्मकाण्डम् - 23
8. वाक्यपदीयम् ब्रह्मकाण्डम् - 01
9. वाक्यपदीयम् ब्रह्मकाण्डम् - 76
10. वाक्यपदीयम् ब्रह्मकाण्डम् - 44
11. वैयाकरणसिद्धान्तलघुमञ्जूषा - 44
12. वाक्यपदीय टीका - 142
13. वाक्यपदीयम् - 01
14. पाणिनीय शिक्षा
15. पाणिनीय शिक्षा
16. वाक्यपदीयं ब्रह्मकाण्डम् - 107
17. वाक्यपदीयं ब्रह्मकाण्डम् - 108
18. वाक्यपदीयं ब्रह्मकाण्डम् - 120
19. वाक्यपदीय स्वोपज्ञ टीका - 120
20. श्लोकवार्तिकम् - 131, 133
21. वाक्यपदीय स्वोपज्ञटीका - 142


**सहायकाचार्यः, व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**

★★★

# आगमप्रामाण्यविचारः

✍डॉ. नवीनकुमारमिश्रः

**(वैशेषिकैः शब्दस्य प्रामाण्यं नाङ्गीक्रियते किन्तु नैयायिकैः, शाब्दिकश्च तस्य प्रामाण्यं स्वीक्रियते । शाब्दिकेषु मूर्धाभिषिक्तो भर्तृहरिः वाक्यपदीयस्य ब्रह्मकाण्डे शब्दानां प्रामाण्यस्य स्वीकर्त्तव्यतायां नाना युक्तीः प्रास्तौषीत् । ता एव युक्तयोऽत्र लेखकैः पुरस्कृताः । तथाहि 'न चागमादृते धर्मस्तर्केण व्यवतिष्ठते' इत्यादिभिः कारिकाभिः धर्मस्याव्यवच्छिन्नानां पथाम्, भावानामवस्थादेशकालादिभेदाद् भिन्नानां शक्तीनाम्, विशिष्टद्रव्यसम्बन्धे विशिष्टानां शक्तीनाम्, अतीतानागतज्ञानानाम्, अतीन्द्रियपदार्थबोधानाम्, पुण्यपापादीनाञ्च निर्णयार्थमागमप्रमाणस्य प्रामाण्यमवश्यमभ्युपयमिति लेखस्यास्य हृदयम् । तत्र 'वेदाः प्रमाणम्' इत्युक्ते शब्दाः प्रमाणमित्यवगन्तव्यम् । तथा च वेदाः, आगमाः, शब्दाः इत्येतेषामनर्थान्तरत्वम् । – स.)**

**किन्नामागमः –**

परमप्रकाशप्रयोजकः अनादिः अजन्मा सर्वजनीनः यो गमः सनकादिभिः जगतोतले ज्ञानपुञ्जविचरणशीलपरिव्राजकाचार्यवर्यैः ऋषिपुङ्गवैः सेव्यः स आगम इति सिद्धचारणैः अभ्यासाभिगम्यते, न तु लीलया । अदः एव प्रमाणं शब्दानुशासने शाब्दिकाः सामोदं प्रमाणत्वेन अङ्गीचक्रुः ।

प्रमाकरणं प्रमाणम् । प्रमाणस्य भावः प्रामाण्यमिति भावे ष्यञ्प्रत्ययविधाने प्रामाण्यशब्दः निष्पद्यते । चतुर्विंशतिगुणेषु बुद्धिः एकः गुणः इति । रूप –रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म संस्कारेतिचतुर्विंशतिगुणाः । इह बुद्धिः द्विविधा – स्मृतिः अनुभवश्च । अनुभवोऽपि द्विविधः – यथार्थानुभवः, अयथार्थानुभवश्च । तत्र च यथार्थानुभवः प्रमा इत्युच्यते । येनसाधनभूतेन यथार्थानुभवः सम्पाद्यते तच्च प्रमाणं भवति । तत्र च केशवमिश्रः अवादीत् –

**दृष्टानुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।**
**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥**

स्मृतौ – **प्रत्यक्षानुमानं च शास्त्रं च विविधागमम् ।**
**त्रयं सुविदितं कार्यं धर्मशुद्धिमभोप्सिता ॥** मनु 12-105

**चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ ।**

**भासर्वज्ञश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ॥**
**प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः ।**
**षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात् ॥**

तन्त्रसाररत्नावली

**तत्र पतञ्जलिः** - प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति यो. सू. 1/7 । शब्दस्य प्रामाण्यमभ्युपगच्छन्न्यायदर्शनमेवं मनुते - यदत्यन्तादृष्टपूर्वं स्वर्गापूर्वदेवतादि, तद्वाक्यार्थरूपमेव, नास्मदादिप्रत्यक्षगोचरम्, न चागृहीतं लिङ्गमस्मिन् प्रवर्तितुमर्हति । न चागृहीते सम्बन्धिनि सम्बन्धः शक्यग्रहः । पदान्येव हि पदार्थस्मरणद्वरेण तत्संसर्गं लक्षयति वाक्यार्थे प्रमाणम् । तेषां च पक्षधर्मतया न लिङ्गत्वम् । स्मृतिजनकत्वमपि वाक्यार्थप्रत्ययाय कल्पितं न सम्बन्धान्तरं व्यनक्ति इति ।

न हि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्ति । किञ्च सर्वत्र यदि शब्दस्थले व्याप्तिज्ञानं कल्प्यते, तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोधः एव । एवमेव सांख्यादिदर्शनान्यपि शब्दप्रमाणे आनुकूल्यमेव भजन्ति । उक्तञ्च भगवता पाणिनिना 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' पा. सू 1.2.45 इति । अत्रार्थविषयकबोधजनकत्वघटित-मेवार्थवत्वं सर्वसम्मतमस्ति। तत्र बोधः शाब्दबोध एव, प्रत्यासन्नत्वाल्लाघवत्वाच्चेति । एतच्च न हि शब्दप्रमाणमन्तरा शक्यम्।

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते इत्युक्त्या वार्तिककारोऽपि शब्दप्रमाणक एव । किञ्च सूक्ष्मातिसूक्ष्मपदार्थस्य ज्ञापने शब्दस्यैव सामर्थ्यम्, न प्रत्यक्षस्य, नाप्यनुमानस्य । उक्तञ्च- **प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**
**एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥**

किञ्च अस्मिँल्लोके सर्वापीतिकर्तव्यता शब्देष्वेवाऽश्रिताऽस्ति, यथा घोरतमेऽन्धकारे महानिशायां झञ्झावाते प्रवहति जलनिमग्ने विषमस्थले यत्र तत्र परिभ्रमन् आपद्ग्रस्तः कश्चन पथिकः शब्देनैव सङ्केतयितव्य इष्टस्थलं प्राप्तुम्, न तु प्रत्यक्षादिना, दीपादेरभावात् । सामान्येन प्रमाणचतुष्टयम् उच्यते ।

**प्रत्यक्षप्रमाणम्** -

तत्र प्रत्यक्षज्ञानं करणम् इन्द्रियार्थसन्निकर्षजन्यंज्ञानं प्रत्यक्षम् । तच्च द्विविधम् सविकल्पकं निर्विकल्पकञ्चेति । निष्प्रकारकं ज्ञानं निर्विकल्पकम् । यथा इदं किञ्चित् -

सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं काष्ठहस्ती ब्राह्मणोऽयं ।

**अनुमानप्रमाणम्** -

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानम् अनुमितिः । व्यक्तिविशिष्टपक्षधर्मताज्ञानम् परामर्शः । तज्जन्यं पर्वतो वह्निमान् इति ज्ञानम् अनुमितिः । यत्र यत्र धूमस्तत्र तत्र वह्निरिति साहचर्यनियमो व्याप्तिः । अनुमानं द्विविधं - स्वार्थानुमानम् परार्थान्मानम् च ।

**उपमानप्रमाणम्**

उपमितिकरणम् उपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः तत्करणम् सादृश्यज्ञानम् । तथाहि कश्चित् गवयपदार्थं जानन् कुतश्चिदारण्यकपुरुषात् 'गोसदृशगवय' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति तदनन्तरं अयं गवयपदवाच्य इति उपमितिरुत्पद्यते ।

**शब्दप्रमाणम्**

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । आप्तो नाम निखिलतत्त्वविषयकानुभव-प्रयाज्यवस्तुतत्त्वस्य कात्स्र्न्येन निश्चयवान्, रागादिवशादपि नान्यथावादी इति पतञ्जलिराह । वाक्यं नाम पदसमूहो वाक्यमर्थसमाप्तौ ।

**साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।**
**क्रियाप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥ वा.प. २.४**

यथा गामानयेति । शक्तं पदम् । अस्माच्छब्दादयमथाः बोद्धव्य इति ईश्वरसंकेतः शक्तिः आकांक्षा योग्यता सन्निधिश्च वाक्यर्थज्ञाने हेतुः । पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयानुभावकत्व-माकांक्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः । आकांक्षादिरहितं वाक्यम-प्रमाणम् । यथा गौरश्वः पुरूषो मगः हस्तीति न प्रमाणमाकांक्षाविरहात् । वह्निना सिञ्चति इति न प्रमाणं योग्यताविरहात् । प्रहरे प्रहरे सहोच्चारितानि गामानयेत्यादीनि पदानि न प्रमाणं सान्निध्याभावात् । वाक्यं द्विविधं वैदिकं लौकिकं च । वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम् । लौकिकन्तु आप्तवचनं प्रमाणम् । वाक्यार्थज्ञानं शब्दज्ञानं तत्करणं शब्दप्रमाणम् ।

**आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः ।**
**क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात् ॥**
**स्वकर्मण्यभियुक्तो यः सङ्गद्वेषविवर्जितः ।**
**पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः ॥**

व्याकरणमहाभाष्येऽपि-रक्षोहागमलघ्वसन्देहाः - प्रयोजनम् । तत्र आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । वाक्यर्थज्ञानमेव शब्दज्ञानमित्युच्यते । शब्दज्ञानकरणमेव शब्दप्रमाणं भवति ।

**शिष्टेभ्यः आगमाः सिद्धाः साधवो धर्मसाधनम् ।**
**अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः॥ वा.प.२७**

यद्यपि साध्वसाधुशब्दभ्यः शक्यार्थलाभः अथापि शिष्टानां वैयाकरणाना आगमसिद्धशब्देषु पुण्यजनकत्वं भवति । तद्भिन्ने आगमासिद्धशब्देभ्यः अपभ्रंशशब्देभ्यः फलं नोत्पद्यते।

**नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते**
**प्राणिनामिव सा चैषा व्यवस्था नित्यतोच्यते ॥ २८**

शब्दानां नित्यत्वकृतकत्वयोः पक्षद्वयेऽपि मनुष्य-पशु-पक्षिवत् अनादिव्यवस्थाया श्रुति-मूलकत्वं वर्त्तते ।

**नानर्थिकामिमां कश्चित् व्यवस्थां कर्तुमर्हति ।**
**तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः ॥ २९**

कश्चिदिमां व्यवस्थां व्याकरणस्मृतिपरम्पराम् अनर्थिकां कर्तुं न अर्हति, तस्मात् धर्माधर्म-निर्णये नित्या साधुत्वविषया स्मृतिः प्रमाणम् ।

**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ॥ ३०**

आगमात् ऋते तर्केण धर्मः नैव व्यवतिष्ठते । यतो हि ऋषीणां यज्ज्ञानं तदपि आगमपूर्वकम् ।

**धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः ।**
**न ताँल्लोकप्रसिद्धत्वात् कश्चित् तर्केण बाधते ॥ ३१**

आगममाश्रित्य धर्मस्य अव्यवच्छिन्नाः व्यवस्थिताः ये पन्थानः तान् कश्चित् लोक-प्रसिद्धत्वात् नहि तर्केण बाधते ।

**अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु ।**
**भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥ ३२**

देशकालपात्रस्थितीनां चतुर्णां परस्परभेदादेव भिन्नासु वस्तुषु पृथक् पृथक् परिणामः संलक्ष्यते अतः तेषां वस्तूना पदार्थानां वा अनुमानेन दुर्ज्ञेयता ।

**निर्ज्ञातशक्तेर्द्रस्य तां तामर्थक्रियां प्रति ।**
**विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते ॥ ३३**

विविधरूपां क्रियां वस्तुनः तृणकाष्ठादेः प्रकाशनाकर्षणादिक्रियां विशिष्टद्रव्यसम्बन्धेन तस्याः शक्तिः अनुमानेन नैव ज्ञातुं शक्यते ।

**यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ ३४**

कुशलैः तर्कनिपुणैः अनुमातृभिः यत्नेन निर्दुष्टहेतुप्रयोगप्रयासेन अनुमितः अपि प्रतिवादिभिः दर्शनसिद्धान्तविशेषैः हेतुभेदेन अनमितिभेदः विपरीतः साधितः, अतः अनुमितौ अनुमानप्रमाणे अनवस्था दोष उत्पद्यते ।

**परेषामसमाख्येयमभ्यासादेव जायते ।**
**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ॥ ३५**

परेषाम् असमाख्येयम् वचसा बोधयितुमशक्यम् मणिरूप्यादिविज्ञानं तद्विदाम् अभ्यासादेव जायते न तु अनुमानप्रमाणेन ।

**प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः**
**पितृरक्षःपिशाचानां कर्मजा एव सिद्धयः॥ ३६**

रक्ष:पितृपिशाचानाम् सूक्ष्मातीन्द्रियदूरव्यवहितदर्शनरूपा प्रत्यक्षसिद्धिः तेषां कर्म्मान्ता पुण्यपापकर्मादृष्टपरिणामा एव । तत्र इन्द्रियसन्निकर्षजन्यलौकिकप्रत्यक्षम् एवं अनुमानमतिक्रम्य आगमप्रत्यक्षरूपं व्यवस्थितम् शाश्वतम् एव भवति ।

**आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।**
**अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥ ३७**

आविर्भूतप्रकाशानाम् ऋषीणां भूतभविष्ययोः सूक्ष्मविषयाणां यज्ज्ञानं तदागमपूर्वकम् अलौकिकम्, न तु अनुमानप्रमाणजन्यं लौकिकप्रत्यक्षम् ।

**अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा।**
**ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥ ३८**

असंवेद्यान् अतीन्द्रियान् विषयान् भावान् महर्षयः योगबलप्रभावात् स्वदिव्यनेत्राभ्यां पश्यन्ति । तादृशानां योगिनाम् आप्तानां रागादिदोषरहितानां वचनम् उपदेशः न कदापि अनुमान-प्रमाणेन बाध्यते ।

**यो यस्य स्वमिव ज्ञानं नातिशङ्कते ।**
**स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ॥ ३९**

यो यस्य दर्शनं स्वं ज्ञानमिव नाभिशङ्कते, प्रत्यक्षपक्षे स्थितं तम् अन्यः कथं निवर्तयेत्। यः जनः यस्य परस्य स्वं ज्ञानं स्वकीयज्ञानं नाभिशङ्कते प्रत्यक्षपक्षे प्रत्यक्षानुभवे सत्यत्वविषये स्थितम् । कथमपि स्वपक्षनिश्चयात् तर्केण वारयितुं प्रभवेत् ।

**इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये**
**आचाण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥ ४०**

इदं पुण्यम् इदं पापम् इति एतस्मिन् पदद्वये आचण्डालं मनुष्याणां शास्त्रप्रयोजनं समानम्।

**चैतन्यमिव यश्चायमविच्छेदेन वर्त्तते ।**
**आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ॥ ४१**

यथा अहं ममति व्यवहारकारकं प्रत्यक्सिद्धं ज्ञानम् (अनुभवसिद्धं) न केनचिदपि तं बाधते तथा योऽयं सर्वत्र सिद्धः आगमः विधिनिषेधश्रुतिवाक्यंम् अविच्छेदेन विद्यते सः युक्तिवादैः न बाध्यते ।

**हस्तस्पर्शादिवान्धेन विषमे पथि धावता ।**
**अनुमानप्रधानेन विनिपातो न दुर्लभः॥ ४२**

अनुमानप्रमाणेन विषमेऽपि पथि अभिधावता हस्तस्पर्शादिबाधेन विनिपातः अत्यन्त सुलभः।

**तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् ।**
**आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ॥ ४३**

साध्वसाधुप्रयोगेण धर्माधर्मौ इति व्याकरणेनैव निर्णयौ इत्यतः व्याकरणनिबन्धनं प्रकृते निगमयति । तस्मादनादिपरम्परया आगतं शास्त्रं शिष्टैः उपदिष्टं पुरुषहितोपदेशकारणमाश्रित्य शब्दानामनुशासनं प्रयोक्तव्यम्, न तु नवीनशब्दप्रयोगः स्वकल्पिताः । साधुशब्दज्ञाने प्रयोगे वा

धर्मनियमः । न तु आधुनिकशब्दज्ञाने प्रयोगे वा धर्मनियमः । इदम् अकृतकम् अनादिपरम्परया आगतम् - **द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।**

**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥ ४४**

शाब्दबोधे शब्दस्य कारणत्वं भजन्ते । स च शब्दः द्विविधः एकः व्यञ्जकः अपरस्तु व्यंग्यः स्फोटरूपः । व्यंग्यः शब्दः वखरीवाचा अभिव्यज्यते -

**आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः ।**

**बुद्धिभेदादिभिन्नस्य भेदमेके प्रचक्षते॥ ४५**

पुराणगाः उपादानशब्दयोः वैखरीस्फोटयोः परस्परं भैन्न्यम् इति वदन्ति । तदितरे अभेदम्।

**अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।**

**तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥ ४६**

यथा अरणिस्थं ज्योतिः प्रकाशान्तरकारणं भवति, तथैव बुद्धिस्थः स्फोटात्मकशब्दः श्रवणविषयगोचरः वैखरीवाचः कारणम् ।

**सन्दर्भग्रन्थसूची-**


1. परमलघुमञ्जूषा - प्रो. बोधकुमारझाः
2. वाक्यपदीयम्
3. वैयाकरणसिद्धान्तदिग्दर्शनम् - प्रो. बोधकुमारझाः
4. व्याकरणमहाभाष्यम्
5. वैयाकरणभूषणसारः
6. पाणिनीयव्याकरणे प्रमाणसमीक्षा
7. तर्कसंग्रहः
8. कारिकावली
9. वाचस्पत्यम् - एँण्ड्रायड मोबाईल अप्लीकेशन - प्रो.मदनमोहनझाः
10. स्फोटतत्त्वविमर्शः
11. शाब्दबोधमीमांसा
12. वैयाकरणसिद्धान्तलघुमञ्जूषा
13. धातुरूपनन्दिनी - जनार्दन हेगडे
14. शब्दशक्तिप्रकाशिका



**संविदाध्यापकः, व्याकरणविभागः**

**राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )**

**क. जे. सामैयासंस्कृविद्यापीठम्**

**मुम्बईपरिसरः, विद्याविहारः ।**


★★★

# शब्दार्थसम्बन्धनिरूपणम्

✍डा. माधवदत्तपाण्डेयः

**(वागर्थौ पार्वतीपरमेश्वराविव सम्पृक्ताविति कालिदासेन प्रतिज्ञातम् । सम्पृक्तये कश्चन सम्बन्धोऽन्वेषणीयः । प्रकृतोऽयं लेखस्तत्सम्बन्धान्वेषणे प्रवृत्तोऽन्येषामपि केषाञ्चन तत्वानां स्पष्टीकरणं प्रयच्छति । व्याकरण-दर्शने वस्तुतः शब्द इति शब्देन स्फोटो गृह्यते । तत्रापि वाक्यस्फोटः । तत्रापि चाखण्डवाक्यस्फोटः । तथैवार्थपदेन वाक्यार्थो गृह्यते । किन्तु प्रतिवाक्यं सङ्केतग्रहासम्भवात् वर्णपदादिस्फोटानां कल्पनमिति न परोक्षं प्रक्षावताम् । अस्तु । सङ्केतः सम्बन्धः इति नैयायिकानामाग्रहो नैव नागेशाय रोचते । तस्मात् तेन वाच्यवाचकभावरूपं सम्बन्धान्तरमत्रा-ऽऽवेदितम् । एवञ्च शब्दार्थयोः यः सम्बन्धः, स नित्योऽनित्यो वेति विचारः कर्त्तव्यः । तत्र मुख्यतो नैयायिकैः सम्बन्धोऽनित्यः, मीमांसक-शाब्दिकाभ्याञ्च सम्बन्धो नित्यो मन्यते - इत्यादिविचारोऽत्र प्रस्तुतः। -स.)**

शब्दाः द्विधा विभक्ताः लौकिकाः वैदिकाश्च । एतेषामेव बोधनाय व्याकरणस्य प्रवृत्तिर्भवति ।

शब्दप्रयोग भाष्यकारः सम्यक्तया क्षेत्रं प्रदर्शयति । तद्यथा -- “सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्याः बहुधा विभिन्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाथर्वणो वेदः, वाको वाक्यमितिहासपुराणं वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः” । [1]

पुनस्तावद्भाष्यकारः--“कस्तर्हि शब्दः? यनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः । अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तद्यथा शब्दं कुरु मा शब्दं कार्षीः । शब्दकार्ययं माणवक इति । ध्वनिं कुर्वन्नेव मुच्यते । तस्मात् ध्वनिः शब्दः” ।[2]

व्याकरणशब्दानुशासने स्फोटात्मकस्यव शब्दस्य वृत्याश्रयत्वेन प्राथम्यम् । अत्रेदमवधेयं यच्छब्दानित्यत्ववादिनो नैयायिकाः वैखर्या एव वाचकत्वं मन्यन्ते, तद्विपरीतं शब्दनित्यत्ववादिनो मीमांसकाः ध्वनिरूपशब्दानामेव वाचकत्वं स्वीकुर्वन्ति । तदुभयविलक्षणत्वेन वैयाकरणाः हि स्फोटात्मकं शब्दमेव वृत्याश्रयत्वेन स्वीकुर्वन्ति । तत्र उदेति प्रश्नोऽयम् -- कोऽसौ स्फोटः ? इत्यपेक्षायामुच्यते, स्फुटत्यर्थाऽस्मादिति स्फोटः, स्फुट्यतेऽभिव्यज्यते वर्णैरिति स्फोटो वा । तन यस्मादर्थाभिव्यक्तिः भवति, स स्फोट इति सिद्ध्यति । सार्थकस्य शब्दस्य हि द्वौ पक्षौ ध्वनिः

स्फोटश्च । तत्र ध्वनिरनित्यः सावयवोऽर्थाभिव्यक्त्यक्षमः । स तु केवलं स्फोटाभिव्यञ्जक एव । स्फोटोऽसौ मध्यमाविषयो ध्वनिर्वैखरीविषय एव । अत्रोक्तम् -

**"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्याः वदन्ति ॥"** [३]
**"वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृता नादः स्फोटव्यञ्जक उच्यते ॥"**[४]

सत्यपि स्फोटे वर्णातिरिक्तत्वेऽसौ वर्णात्मकध्वनित एव अभिव्यक्तो भवति । यद्यपि स्फोटो नित्यो निरंशोऽविभाज्यश्च तथापि शब्दानां स्वरूपज्ञानोपायतया कृताः सन्ति स्फोटस्यानेके काल्पनिक विभागाः। वाचकतादृष्ट्या वर्णपदवाक्यभेदेन पुनः जातिव्यक्तिभेदेन, अखण्डपदा-अखण्डवाक्यसंकलनयाऽष्टौ स्फोटाः स्वीकृताः ।

तस्मादष्टविधः स्फोटात्मकः शब्दो वृत्त्याश्रयः । वस्तुतस्तु वाक्यस्फोटो वाक्यजातिस्फोट एव वा वृत्त्याश्रयः । तत्र वाक्यस्फोटो मुख्यस्तस्यैव लोकेऽर्थबोधकत्वात् तेनैवार्थसमाप्तेश्च ।

वृत्तिस्त्रिविधा । शक्तिर्लक्षणा व्यञ्जनेति । महाभाष्यकारेण भगवत्पतञ्जलिना "पराथा-भिधानं वृत्तिः"[5] इति प्रतिपादितम् । तत्रैव प्रदीपकारेण "परस्य शब्दस्य योर्थस्तस्याभिधानं शब्दान्तरेण सा वृत्तिरित्यर्थः"[6] कृतः । भट्टोजिदीक्षितेन पञ्चवृत्तयः स्वीकृताः तद्यथा 'कृतद्धित-समासैकशेषसनाद्यन्तधातुरूपाः पञ्चवत्तयः' "परार्थाभिधानं वृत्तिः"[7] भाष्य- कृद्दीक्षितयोश्च कथनं समासादिवृत्तिदृष्ट्या विद्यते । शब्दार्थसम्बन्ध एव वृत्तीति कथ्यते । विषयेऽस्मिन् वैयाकरण-सिद्धान्तलघुमञ्जूषायां तत्स्वरूपं प्रतिपादयति नागेशः "वृत्तित्वं शाब्दबोधहेतुपदार्थोपस्थित्यनु-कूलपदपदार्थसम्बन्धत्वम्"[8] । प्रतिदिनं शताधिकान् शब्दान् श्रृण्मः परमिदमावश्यकन्नास्ति यत् सर्वेषां शब्दानामर्थबोधने समर्थाः वयम् । यथा फ्रेन्च-चीनी-लेटिन-रुसी-जापानी वा अन्या कस्याश्चित् वैदेशिकभाषायाः शब्दान् कुत्रचित् श्रृणुमः परमर्थज्ञतया श्रृण्वन्नपि न श्रृणुमः। अनेनैव देशीयभाषायाः मलयालम-तमिल-उडिया-तेलगू-मराठी इत्यादिभाषां यः न जानाति तदर्थं तत्भाषासम्बन्धिशब्दानामर्थाज्ञानेन शाब्दबोधो न जायते । अत एव शाब्दबोधाय आवश्यकं भवति वृत्तेर्ज्ञानम् अर्थात् शब्दार्थसम्बधज्ञानम् । विनावृत्तिज्ञानं शाब्दबोधो न शक्यः। इत्थमेव प्रतिपादयति दार्शनिकत्वेन नागेशः "तद्धर्मावच्छिन्नविषयकशाब्दबद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित-वृत्तिविशिष्टज्ञानं हेतुः । अत एव नागृहीतवृत्तिकस्य शाब्दबोधः"। अतः असति शब्दवृत्तेर्ज्ञानं न शाब्दबोधः ।

तदर्थं ' समर्थः पदविधि'रित्यत्र भाष्यानुसारमुद्धरति नागेशः "न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते" इति समर्थसूत्रभाष्यं सङ्गच्छते । गुडादिशब्देन गुडत्वजात्यवच्छिन्नो गुडपदवाच्य इत्येव बोधो जातिप्रकारकः । मधुरत्वं तु "गुडो मधुर ऐक्षवत्वात् इत्यनुमानरूपमानान्तरगम्यम्"[9] इति उल्लेखो वर्तते ।

शब्दार्थयोः सम्बन्धबोधो वा वृत्तिज्ञानं कथं भवेदिति विचारयन् भगवद्भाष्यकारः 'सिद्धे शब्दार्थसम्बन्धः'[10] इत्यत्र शब्दार्थसम्बन्धं नित्यं प्रतिपादयन् तदर्थं लोकव्यवहारसाधनं मुख्यं निर्दिशति। "सिद्धः शब्दोऽर्थः सम्बन्धश्च ।"

'अश्वमानय' एवमाचरिते सति प्रयोज्य-प्रयोजकव्यवहारम् पार्श्वे उपतिष्ठन् गोऽर्थत्वेन अश्वार्थत्वेन नयत्वेन आनयत्वेनेति अनभिज्ञो बालकः पश्यति तथा च गोशब्दत्वेन सास्नालाङ्गूलककुदखुरविषाणविशेषं गोपशुं पश्यति तज्ज्ञानं प्राप्नोति । अथ च शाब्दबोधसह-कारिकारणानि आकाङ्क्षायोग्यताऽसत्तितात्पर्याणि ।

तत्र प्रथमः "वाक्यसमयग्राहिका आकाङ्क्षा" तद्यथा घटमानय इत्यत्र "घटःकर्मत्वमानयनं कृतिः" इत्यतो 'घटमानय' इतिवन्नान्वयबोधः। आकाङ्क्षाविरहात् । घटमानयेति विभक्त्य-न्ताख्यातान्तयोरेव साकाङ्क्षत्वाच्च ।

द्वितीयः-योग्यता परस्परान्वयप्रयोजकधर्मवत्त्वम् । तद्यथा - 'पयसा सिञ्चति' इत्यत्र अग्निना सिञ्चनस्य असम्भवात् इति वाक्यमयोग्यत्वम् । अतः वाक्ये योग्यत्वे सति शाब्दबोधो दृश्यते ।

तृतीयः - आसत्तिः - प्रकृतान्वयबोधानुकूलपद । व्यवधानमासत्तिः । तद्यथा आसन्नं वाक्यम् "गिरिः अग्निमान्" इत्यत्र आसन्नत्वेन वाक्यार्थो भवति परम् अनासन्नत्वेन "गिरि-र्भुक्तमग्निमान् देवदत्तेन" इत्यत्र व्यवधानेन सम्यक्तया न वाक्यबोधो जायते । तद्यथा "गिरिः अग्निमान्, भुक्तं देवदत्तेन" एवं वाक्यबोधो भवेत्तद्वरम् ।

चतुर्थः - तात्पर्यम् - एतद् वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितोश्वरेच्छा तात्पर्यम्। तात्पर्यनियामकञ्च लोके प्रकरणादिकम् । तद्यथा 'सैन्धवमानय' इत्युक्ते भोजनप्रसङ्गे सैन्धवपदस्य लवणार्थं युद्धादौ अश्वार्थकं बोधयति शक्तिस्तु उभावेवार्थावुपस्थापयति परं न हि तात्पर्यं विना अर्थबोधो जायते । विशेषेण नानार्थस्थले । यत्र हि नानार्थकेषु शब्देषु तत्र कतमोऽर्थोऽभीष्ट इति संदेहो जायते । तत्र संयोगादिभिरर्थनिर्णयो भवेत्तद्यथोक्तम् हरिणा -

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**
**सामर्थ्यमाचिती देशः कालो व्यक्तिः स्वरादयः ।**
**शब्दस्यार्थानवच्छेदे विशेषस्मृतिहेतवः ॥**

इति क्रमेण संयोगादीनामुदाहरणानि प्रस्तूयन्ते-

संयोगविप्रयोगयोरुदाहरणे 'सवत्सा धेनुरवत्साधेनुरिति' । साहचर्यं सादृश्यम् तस्य उदाहरणम् 'रामलक्ष्मणौ' अत्र लक्ष्मणसाहचर्येण रामशब्दस्य वाचकत्वं राघवेऽर्थे नियम्यते । विरोधेन शत्रुभावेन उदाहरति - 'रामार्जुनगति' अत्र रामशब्दस्य अर्जुनविरोधित्वात् परशुरामेऽर्थे अर्जुनशब्दस्य रामविरोधित्वात् कार्तवोर्येऽर्थे विरोधेन वाचकत्वं नियम्यत । अर्थस्य उदाहरति तद्यथा -'अञ्जलिना जुहोति' अर्थात् 'अञ्जलिना सूर्यमुपतिष्ठते'ति । प्रकरणस्य तदुदाहरति यथा

सैन्धवपदस्य लवणाश्वाद्यनेकार्थस्य 'सैन्धवमानय' इत्युक्ते भोजनावसरे प्रकरणेन लवणेऽर्थे वाचकत्वनियमनं यात्राकाले तु तत्प्रकरणेन अश्वेऽर्थे इति । लिङ्गस्योदाहरणम् -- 'अक्ता' तेजो वै घृतम् इति घृतगुणप्रशंसनपरकात् लिङ्गात् अक्ता इति घृतेनाक्ता इत्यर्थे अक्ता इत्येतस्य वाचकत्वनियमनमिति ।

सान्निध्यात्तदुदाहरति यथा - 'रामो जामदग्न्यः' रामशब्दस्तु नानार्थकः किन्त्वत्र जामदग्न्यपदसान्निध्यादस्य परशुरामेऽर्थे वाचकत्वनियमनमिति ।

सामर्थ्यमुदाहरति - 'अभिरूपाय कन्या देया' अर्थात् अभिरूपशब्दनिष्ठसामर्थ्यवशात् सर्वतो भावेन याग्याय कन्या देया । प्रसङ्गेऽस्मिन् -

**"अजर्घा यो न जानाति यो न जानाति बर्बरी ।**
**अचोकमत यो न जानाति तस्मै कन्या न दीयते ॥"**

औचित्यात् - **"यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।**
**यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥"**[११]

अत्र अयं भावः परशोश्छदने एव, मधुसर्पिषः सेचने एव, गन्धमाल्याद्यश्च पूजयतीति औचित्यादर्थबोधः । देशस्य तदुदाहरति - भात्यत्र परमेश्वर इत्यत्र राजधानीरूपदेशात् परमेश्वरपदं राजबोधकम् । न हि ईश्वरबोधकम् । अपरञ्च - "दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः" अत्र दिल्लीश्वरः देशराजधानी विशेषो राजा, जगदीश्वरः इति जगतः प्रभुः ईश्वरो बोध्यः ।

कालः तदुदाहरति - "चित्रभानुर्भाति" इत्यादौ रात्रौ अग्नौ दिवा सूर्ये शब्दार्थः कर्तव्यः।

व्यक्तिर्लिङ्गम् - 'मित्रो भाति' इत्यत्र सूर्यो बोध्यः 'मित्रं भाति' इत्यत्र सुहृद् ज्ञेयः ।

स्वरात्, उदात्तादिस्वरवशात् तदुदाहरति - 'स्थूलपृषतीम्' इत्यादौ स्वरात् तत्पुरुष-बहुव्रीह्यर्थनिर्णयः । अत्र तत्पुरुषः - स्थूला चासौ पृषती इति, बहुव्रीहिरित्यत्र - स्थूलानि पृषन्ति यस्याम् इति । अत्र पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थनिर्णयः "बहुव्रीहौ प्रकृत्या पूर्वपदम्"[12] इति सूत्रात्, अन्तोदात्तत्वे तु निर्णयः "समासस्य"[13] इति सूत्रात् । एवम् अर्थनिर्णयः कर्तव्यः ।

शब्दार्थसम्बन्धः - अत्र शब्दार्थसम्बन्धस्य नित्यत्वमनित्यत्वं वेति विवेचनं पृथक् - पृथक् शास्त्रेषु दृश्यते-

तत्र मीमांसकाः - जैमिनिः शब्दनित्यत्वं स्वीकरोति तथैव शब्दार्थसम्बन्धोऽपि नित्यः प्रतिपादयति । तद्यथा -

(क) - "नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्"।[14]

(ख) "नित्यः शब्दो भवितुमर्हति ।

कुतः दर्शनस्य परार्थत्वात् । दर्शनमुच्चारणं तत् परार्थम्, परमर्थं प्रत्याययितुम् । उच्चारितमात्रे हि विनष्टे शब्दे न चान्योन्यायान् अर्थं प्रत्याययितुम् शक्नुयात्........ तस्माद्दर्शनस्य परार्थत्वान्नित्यः शब्दः ।"[15] मीमांसकाः शब्दार्थसम्बन्धः स्वाभाविकतया मन्यन्ते । शाबरभाष्ये

अयं शब्दार्थसम्बन्धः अपौरुषेयः प्रतिपादितः तद्यथा - 'औत्पत्तिकस्तु शब्दार्थेन सम्बन्धस्तस्य ज्ञानम् । अपौरुषेयः शब्दस्यार्थेन सम्बन्धः'[16] मीमांसादर्शने शब्दानां नित्यत्वे षड् हेतवः प्रदर्शिताः। तद्यथा- प्रथमतया "सर्वत्र यौगपद्यात्, संख्याभावात्, अनपेक्षत्वात् प्रख्याभावाच्च, योगस्य, लिङ्गदर्शनाच्च" ।[17] न्यायवैशेषिकदर्शनस्य मतमुपस्थाप्यते - अत्र न्यायदर्शने वैशेषिकदर्शने च शब्दार्थस्य नित्यत्वं स्वाभाविकत्वञ्च न स्वीकृतम् अपितु तत्र सामयिकत्वेन सांकेतिकत्वेन प्रतिपादितम् । तदर्थमत्र न्यायस्य एकं सूत्रं द्रष्टव्यम् "पूरणप्रदाहपाटनानुलब्धेश्च सम्बन्धाभावः"[18] यत्र भावः वर्तते यत् शब्दस्य अर्थेन सह नित्यसम्बन्धो विद्यते तर्हि यस्य शब्दस्योच्चारणं क्रियते तदा तस्य प्रतिक्रियापि साक्षात् भवेत् इमां प्रतिक्रियां सूत्रकारः पूरण-प्रदाह-पाटनेति भागत्रयेण विभक्तामकरोत् । उदाहरणतया प्रस्तौति "अन्नाग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन् । न च प्रगृह्यन्ते"।[19]

नैयायिकैः पृथक्तया शब्दः प्रमाणरूपेण स्वीकृतः । "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[20] परं वैशेषिकाः शब्दस्य अनुमाने एव शब्दस्य अन्तर्भावो मन्यन्ते । "एतेन शब्दं व्याख्यातम्"[21] एतेन अनुमाननिरूपणेन शब्दं शब्दप्रभवं ज्ञानं व्याख्यातमनुमितिरूपं दर्शितं भवतीत्यर्थः । शब्दोऽपि अनुमानमेव । न तु पथक् प्रमाणमिति भावः ।[22] सांख्यदर्शनानुसारम् - हि अनित्यः दृश्यते तथा च शब्दार्थयोः वाच्यवाचकभावो वेति । तथा "न शब्दनित्यत्वं कार्यता प्रतीतेः"[23] "वाच्यवाचकसम्बन्धः शब्दार्थयोः"[24] इति ।

योगदर्शनानुसारम्-- शब्दार्थसम्बन्धे शब्दार्थयोः संकेतः अध्यासरूपेण मन्यते । तद्यथा -

(क) "शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ।[25]

तथा च (ख) "संकेतबुद्धितः प्रविभागः" संकेतस्तु शब्दपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽयमर्थः योऽयमर्थः सोऽयंशब्द इति । एवमेते शब्दार्थप्रत्यया इतरेतराध्यासात्संकीर्णा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानम् । तेषां शब्दार्थप्रत्ययानां प्रविभागः।[26] तथापि योगदर्शने शब्दार्थसम्बन्धः परम्परया नित्यः स्वीकृतः । "सम्प्रतिपत्तिनित्यतया नित्यः शब्दार्थसम्बन्ध इत्यागमिनः प्रतिजानते"[27]

अनन्तरं वैयाकरणानां मतम् - वैयाकरणानां मते शब्दो नित्यः । अर्थेन सह सम्बन्धोऽपि प्रवाहनित्यत्वेन अर्थोऽपि नित्यः । विषयेऽस्मिन् महाभाष्ये वाक्यपदीये च सविस्तरं विवेचनं विद्यते। तदनुसारं संग्रहनामके ग्रन्थे शब्दस्य नित्यत्वानित्यत्वविषये विस्तृतं विवेचनं कृतं वर्तते । तत्र व्याडिमतानन्तरं भाष्यकारः पाणिनेर्मतस्य प्रतिपादनाय महाभष्यस्य प्रथमं वार्तिकमुपस्थापयन् शब्द-अर्थ-सम्बन्धानां नित्यत्वं सविस्तरं कथितम् ।

तद्यथा "किं पुनर्नित्यः शब्दः आहोस्वित् कार्यः? संग्रह एतत्प्राधान्येन परीक्षितं नित्यो वा स्यात् कार्यो वा इति । तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि । तत्र तु एष निर्णयो यद्येव नित्योऽथापि कार्यः उभयथापि लक्षणं प्रवर्त्यमिति " तत्रैव " कथं पुनरिदं भगवतः पाणिने-राचार्यस्य लक्षणं प्रवृत्तम्?", "सिद्धे शब्दार्थसम्बन्धे"[28] भाष्यकारः शब्दार्थसम्बन्धेषु नित्यत्वं

लोकप्रमाणेन स्वीकरोति तद्यथा -- "कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति? लोकतः । यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते नैषां निवृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्याभावा निवृत्तौ तावदेषां यत्नः क्रियते । तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह कुरु घटं, कार्यमनेन करिष्यामि इति । न तद्वच्छब्दान् प्रयोक्ष्यमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान् प्रयोक्ष्य इति । तावत्यवार्थमुपादाय शब्दान्प्रयुञ्जते"।[29]

एवमेव भाष्यकारः महाभाष्ये नानास्थलेषु शब्दनित्यत्वे वैयाकरणानां मान्यतां प्रतिपादयति। महाभाष्यपरम्परामनुसृत्य शब्दार्थसम्बन्धस्य नित्यत्वं भर्तृहरिणापि मुक्तकण्ठेन अनुमोदितम् । यथा –

**"नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥"**[30]

**शब्दज्ञानस्य वा शब्दार्थज्ञानस्य महत्वम् -**

महाभाष्यकारेण शब्दज्ञानस्य फलं विवेचयन् एकयैव पङ्क्त्या शब्दज्ञानजिज्ञासुनामाकृष्टय प्रयासो विहितः । "एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।"

पुनश्च महाभाष्यकारः अतिरोचकतया प्रश्नस्योत्थापनं कुर्वन् कथयति यदि सम्यक्तयाधीतः एकः शब्दः इष्टसिद्धिकारको भवति तर्हि किमर्थम् अन्यानां शब्दानां ज्ञाने यत्नः? तदुत्तरति भाष्यकारः लोके नाना कल्पना तासां न तृप्तिः तदथं नाना शब्दानां ज्ञानमपि आवश्कम्। तद्यथा – "यद्येकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति ।[31] किमर्थं द्वितीयस्तृतीयश्च प्रयुज्यते । न वै कामानां तृप्तिरस्ति ।" एतदतिरिक्तं महाभाष्यकारः वर्णज्ञानं वाग्विषयप्रतिपादयन् तस्य वेद-ब्रह्मसायुज्यमुपदिशन् तत्प्राप्तये संक्षेपेण शास्त्रावगमनाय वर्णज्ञानं शब्दज्ञानञ्च परमावश्यकम् प्रतिपादितम् । भाष्यकारः शब्दज्ञानं पुण्याय, दृष्टादृष्टलाभाय, अभ्युदयाय, पित्रौ गौरवाय इति धर्मलाभे शब्दार्थपूर्वकं प्रयोग अभ्युदयकारी भवति ।

तद्यथा महाभाष्ये – "अथ किमर्थमुपदेशः क्रियते? वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते । सोऽमक्षरसमाम्नायो वाक्य समाम्नाय पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति । माता-पितरौ चास्य स्वर्गे लोके महीयते"।[32]

**"अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम् ।**
**तत्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥"**[33]

शब्दार्थसम्बन्धविषयकं विचारं यथा भारतीयप्रबुद्धाः कृतवन्तः सन्ति सम्भवतः तथा कैश्चिदपि अन्यैः देशैर्न कृतो दृश्यते । न केवलं व्यावहारिकं स्वरूपम् अपितु अस्य पारमार्थिकं दार्शनिकञ्च स्वरूपं प्रतिपादयन् ब्रह्मरूपे प्रतिष्ठा विद्यते । इतोऽपि अनेनैव विश्वस्य रचनापि मन्यते । तद्यथा –

**"अनादि निधनं ब्रह्म शब्दतत्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ "**[34]

**"शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।**

**छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥"** [35]

एतादृशं किमपि ज्ञानं नास्ति यत् विना शब्दज्ञानं सम्भाव्यते सम्भाव्यते सम्पूर्णं ज्ञानं शब्देनानुविद्धं विशिष्टं भूत्वा भासते । यथा -

**"न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥"** [36]

तदेवं शब्दार्थस्वरूपौ वागर्थाविव सम्पृक्तौ जगतः पितरौ भवानीशङ्करौ प्रणमति कविकुलगुरुकालिदासानुदासोऽयम् -

**"वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥"** [37]

**सन्दर्भाः**


1. महाभाष्य पस्प. 1.1 ।
2. तत्रैव ।
3. तत्रैव ।
4. परमलघुमञ्जूषा स्फोटनिर्णयः ।
5. महाभाष्यम् 2.1.1 ।
6. तत्रैव ।
7. वै. सि. को. सर्वसमासशेषप्रकरणम् ।
8. वै. सि. म. ।
9. प. ल. म. पृ. 5 ।
10. महाभाष्यम् पस्प. ।
11. प. ल. म. स्फोटनिर्णयः ।
12. पा. सू. 6.2.1 ।
13. पा. सू. 6.1.223 ।
14. मी. सू. 1.1.15 ।
15. मी. शा. भा. 1.1.18 ।
16. मी. शा. भा. 1.1.5 ।
17. मी. शा. भा. 1.1.19-23 ।
18. न्यायदर्शनम् 2.1.52 ।
19. न्यायभाष्यम् 2.1.52 ।
20. न्यायदर्शनम् 1.1.3 ।

21. वै. सू. 9.2.3 ।
22. वै. सू. वृ. 9.2.3 ।
23. सा. सू. 5.58 ।
24. सा. सू. 5.37 ।
25. यो. द. 3.17 ।
26. यो. द. व्यासभाष्यम् 3.17 ।
27. यो. द. व्यासभाष्यम् 3.27 ।
28. महाभाष्यम् पस्प. ।
29. तत्रैव ।
30. वाक्यपदीयम् 1.23 ।
31. महाभाष्यम् पस्प. ।
32. महाभाष्यम् प्रत्याहाराह्निकम् ।
33. वाक्यपदीयम् 1.13 ।
34. वाक्यपदीयम् 1.1 ।
35. तत्रैव 1.120 ।
36. तत्रैव 1.123 ।
37. रघुवंशमहाकाव्यम् 1.1 ।

**डा. माधवदत्तपाण्डेयः,**
**संविदाध्यापकः, व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्,**
**मुम्बई ७७ ।**

★★★

# वाक्यपदीय-ब्रह्मकाण्ड में उपमा एवं उदाहरण का अन्वेषण

✍डॉ. (श्रीमती) गीता दूबे

**(यह अन्वेषण पाठकों के लिए प्रेरणादायी है । यह एक नवाचार है । काव्यशास्त्र की दृष्टि से व्याकरण के ग्रन्थों का अनुशीलन नहीं के बराबर है, जबकि काव्यशास्त्रीय तत्त्वान्वेषण अन्य शाब्दिक ग्रन्थों में भी सम्भव है । शोधपत्र में कुल चौदह वाक्यपदीय कारिकाओं में सविवरण उपमा एवं उदाहरण अलंकारों को दर्शाया गया है । साथ ही ऐसी अविवृत कारिकाओं का संख्या-संकेत भी निर्दिष्ट है । एक नई दृष्टि से लिखित यह शोधपत्र आदरणीय है । वक्ता या लेखक अपने ज्ञान को श्रोता या पाठक में सङ्क्रान्त करने के लिए उपमा - उदाहरण का प्रयोग करता है । वस्तु का दृढ ज्ञान तभी होता है जब वस्त्वन्तर में उसके सामान्य धर्म का दर्शन होता है । इस तत्त्व को श्रीमती दबे ने यहाँ निदर्शित किया है । - स.)**

भर्तृहरि का वाक्यपदीय संस्कृत व्याकरण का एक प्रसिद्ध ग्रन्थ है । वाक्यपदीय यद्यपि मुख्यत: वाक्य एवं पद से सम्बन्धित है फिर भी, इसमें शब्द ब्रह्म एवं उसकी शक्तियां, काल, ध्वनि, अर्थ, वाक्यार्थ जैसे भाषादर्शन विषयक विवेचन भी है । यह ग्रन्थ तीन काण्डों में विभक्त है । अत: इसे त्रिकाण्डी भी कहते हैं । प्रथम ब्रह्मकाण्ड, द्वितीय वाक्यकाण्ड एवं तृतीय पदकाण्ड नाम से जाना जाता है । ब्रह्मकाण्ड को आगम काण्ड भी कहा जाता है । इस काण्ड में शब्द को ब्रह्म के रूप में स्वीकार किया गया है । ब्रह्म काण्ड में 156 कारिकाएं उपलब्ध होती हैं । आगम के अनुसार वाणी के चार स्वरूप हैं - परा, पश्यन्ती, मध्यमा एवं वैखरी । इसमें परा वाक् ही ब्रह्म है । इसीलिए वाक्यपदीय की प्रथम कारिका में शब्दतत्त्व को अनादि और अनन्त तथा अक्षर ब्रह्म कहा गया है -

**अनादि निधनं ब्रह्म शब्द तत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[१]

इस प्रकार भर्तृहरि जी ने प्रथम श्लोक में ही शब्दतत्व को ब्रह्म कहा है और शब्द एवं ब्रह्म में अभिन्नता दर्शायी गयी है । इस अभिन्नता को देखते हुए मेरी जिज्ञासा ब्रह्मकाण्ड में अलंकार की ओर अग्रसर हुई । अलंकार में भी उपमा एवं उदाहरण अलंकार के सन्दर्भ में।

उपमा शब्द का अर्थ होता है – तुलना । जब किसी व्यक्ति या वस्तु की तुलना किसी दूसरे व्यक्ति या वस्तु से की जाय वहाँ पर उपमा होता है। उपमा अलंकार के चार अंग है – 1. उपमेय 2. उपमान 3. वाचक शब्द एवं 4. साधारण धर्म । इसी प्रकार – काव्य में जहाँ एक कथन की पुष्टि के लिए दूसरे कथन को उदाहण के रूप में प्रस्तुत किया जाय वहाँ उदाहरण अलंकार होता है । ब्रह्मकाण्ड की कारिका के अध्ययन के फलस्वरूप निम्नलिखित कारिकाओं में उपमा एवं उदाहरण अलंकार के दर्शन होते हैं – कारिका संख्या 15 द्रष्टव्य है –

**यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।**
**तथैव लोके विद्यानामेषा विद्या परायणम् ॥**[२]

इसका अर्थ है – जैसे घट-पट आदि अर्थों की घटत्व-पटत्व आदि जातियां घट आदि शब्दों में घटशब्दत्व-पटशब्दत्वरूप जाति के ज्ञान से जानी जाती है, क्योंकि अर्थनिष्ठ जाति ही वाच्य है, वैसे ही यह व्याकरण सभी विद्याओं के विषयवस्तु प्रतिपादन का सर्वोत्कृष्ट आधारभूत स्थान है । यहाँ उदाहरण अलंकार ह –

**घटत्व जाति ( बोध्य )------------------ घटशब्दत्व ( बोधक )**
**काव्यकोशादि-------------------------- व्याकरण**

इसी क्रम में कारिका संख्या 20 देखिए –

**यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।**
**शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥**[३]

अर्थात् जिस व्याकरण में मध्यमा वाक् के ज्ञान निमित्त प्रकृति आदि प्रक्रिया अक्षरों के बोध के चिह्नरूप-लिपि की भाँति कल्पित है तथा जो अवयव विभागमध्यमा वाक् में पूर्व प्रकृति और उत्तर प्रत्ययों के योग से प्रतिबिम्ब के सदृश भासित होते है, वह यह व्याकरण है । यहाँ उपमा अलंकार है ।–

**वाणी----------------चिह्न ( लिपि )**
**मध्यमा---------------प्रकृति प्रत्यय**

इसी क्रम में कारिका सं. 28 द्रष्टव्य है –

**नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते ।**
**प्राणिनामिव सा चषा व्यवस्थानित्यतोच्यते ॥**[४]

आशय है कि – नित्यत्व अथवा अनित्यत्व उभय पक्ष में शब्दों का आदि नहीं है यह शब्द सर्वप्रथम है, इससे पहले कभी नहीं था यह नहीं कहा जा सकता अर्थात् शब्द अनादि है। मनुष्य पशु आदि प्राणियों की अनादि एकाकार व्यवहार स्थिति के समान शब्दों की

अनादिकाल से व्यवहार व्यवस्था चली आ रही है, यही यह निरन्तर व्यवहारपरम्परा शब्दों की व्यवस्थानित्यता कही जाती है । इसमें उपमा अलंकार है। -

**शब्द------------व्यवस्था नित्यता**

**प्राणो------------व्यवस्था नित्यता,** इव वाचक शब्द है ।

इसी क्रम में कारिका 35 इस प्रकार है -

**परेषामसमाख्येयमभ्यासादेव जायते ।**
**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ।।**[५]

इस कारिका का अर्थ है - मणि रजत आदि के पारख्ज्ञो लोगों का जो मणि, रजत, सोने आदि को परखने का अपना एवं विशेष ज्ञान है, जो कि दूसरों को शब्दमात्र से नहीं समझाया जा सकता, उनका वह निजी प्रत्यक्ष अनुभव बार-बार मणि आदि को देखने परखने तथा निरन्तर व्यवहार करते रहने के अभ्यास से ही होता है, वह आनुमानिक एक अटकल मात्र नहीं है । इसी प्रकार प्रकृत में ऋषियों का ज्ञान भी योग तप के अभ्यास से उत्पन्न अलौकिक प्रत्यक्ष ही है, आनुमानिक नहीं । इसमें उदाहरण अलंकार है । -

**मणिरूप्यादि------अभ्यास ज्ञान**

**ऋषियों का ज्ञान-------योग तप अभ्यास**

इसी प्रकार कारिका सं. 40 द्रष्टव्य है -

**इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।**
**आचाण्डालं मनुष्याणां समं शास्त्रप्रयोजनम् ।।**[६]

इसका अर्थ है - यह पुण्य है - यह पाप है, इन दो वस्तुओं के ज्ञान में चण्डाल तक सभी मनुष्यों को एक समान शास्त्र की आवश्यकता है । इसमें उपमा की योजना है । -

**चण्डाल------------ शास्त्र अल्प प्रयोजन**

**सभी मनुष्य---------शास्त्र अल्प**

इसी प्रकार कारिका सं. 41 द्रष्टव्य है -

**चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।**
**आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ।।**[७]

इसका अर्थ है - अहम् - मम इत्यादि पद के व्यवहार में जैसे अहम् स्वरूप आत्मा तथा पुत्र - मित्र-देह-आदि का सम्बन्धी - आत्मा का अनुभव विना किसी बाधा के होता आ रहा है, वैसे ही पूर्वपरम्परा से विना बाधा के अविच्छिन्न रूप में चला आ रहा यह जो प्रसिद्ध

आगम है, उसकी जिसने सम्यक् उपासना की है, अर्थात् आगम से उपदिष्ट – धर्ममार्ग का जो श्रद्धापूर्वक अनुष्ठान करता आ रहा है, उसको कोई तार्किक कोरे तर्क के द्वारा आगम के धर्ममार्ग से या विश्वास से विचलित नहीं कर सकता है । इसमें उपमा अलंकार है –

**चैतन्य-------------स्वयं प्रकाश ।**
**वेद----------------स्वतः प्रमाण ॥**

इव वाचक शब्द प्रयुक्त हुआ है ।

इसी प्रकार कारिका सं. 42 द्रष्टव्य है –

**हस्तस्पर्शादिबाधेन विषमेऽप्यभिधावता ।**
**अनुमानप्रधानेन विनिपातो न दुर्लभः ॥**[८]

इसका अर्थ है – ऊँच नीच – ऊबड़खाबड़ स्थान का सूचक हाथ के स्पर्श आदि को छोड़कर केवल अनुमान के बल से ऊँच नीच विषम स्थान में भी दौड़कर चलने वाले अन्धे के समान विषय धर्म – अधर्म के मार्ग में आगम की अपेक्षा के विना केवल अनुमान से सहसा चलनेवाले व्यक्ति का पतन दुर्लभ नहीं है, अपितु निश्चित है । इस कारिका में उपमा अलंकार है ।

**अन्धा व्यक्ति--------------अनुमान**
**सामान्य व्यक्ति------------अनुमान ।**

इव वाचक शब्द है ।

इसी क्रम कारिका में सं. 46 देखिए –

**अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।**
**तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥**[९]

इसका अर्थ है – जैसे अरणि (काष्ठ) में रहनेवाली ज्योति मंथन के बाद होती है तब दाहक अग्नि का काष्ठ कारण हो जाती है । वैसे बुद्धि (अन्तःकरण) में स्थित शब्द भी अर्थबोध की इच्छा से क्रम से प्रकट होकर भिन्न-भिन्न श्रुतियों का कारण माना जाता है । इस कारिका में उदाहरण अलंकार है –

**अरणि-----------------मंथन । बोधक**
**बुद्धि-----------------प्रयत्न । बोधक**

इसी तरह कारिका सं. 48 द्रष्टव्य है –

**नादस्य क्रमजातत्वान्न पूर्वो नापरश्च सः।**
**अक्रमः क्रमरूपेण भेदवानिव गृह्यते ॥[१०]**

अर्थात् (यद्यपि बुद्धिस्थ नाद व्यंग्य स्फोट रूपी शब्द) न पूर्व है और न अपर है पूर्वापरभाव से रहित है । अक्रम है फिर भी स्फोट को अभिव्यक्त करने वाले नाद की उत्पत्ति क्रम से होती है अत: स्फोट भी सक्रम की तरह प्रतीत होता है। इसमें उपमा अलंकार है –

**नाद --------------सक्रम**
**स्फोट-------------सक्रम । साधारण धर्म**

इव वाचक शब्द प्रयुक्त हुआ है ।

इसी तरह कारिका सं. 49 देखिए –

**प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात् ।**
**तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥[११]**

अर्थात् जल में झलकता हुआ चन्द्रमा का प्रतिबिम्ब स्वयं नहीं हिलता किन्तु जल के हिलने से हिलता हुआ प्रतीत होता है इसी तरह नाद के धर्म स्फोट के धर्म न होने पर भी स्फोट के धर्म की तरह प्रतीत होता है । इसमें उदाहरण अलंकार है । –

**चन्द्रमा का प्रतिबिम्ब --------। जल का हिलना**
**नाद के धर्म ----------। स्फोट का धर्म**

इसी प्रकार कारिका सं. 50 देखिए –

**आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते ।**
**अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते ॥[१२]**

अर्थ है – जैसे ज्ञान में अपना स्वरूप और ज्ञेय विषय का स्वरूप प्रकाशित होता है, वैसे शब्द में अर्थ का स्वरूप और अपना वर्ण पद रूप भी प्रकाशित होता है ।इसमें उदाहरण है–

**ज्ञान-----------------आत्मरूप**
**शब्द----------------अर्थरूप**

इसी क्रम में कारिका सं. 52को देखिए –

**यथैकबुद्धिविषया मूर्तिराक्रियते पटे ।**
**मूर्त्यन्तरस्य त्रितयमेवं शब्देऽपि दृश्यते ॥[१३]**

अर्थ – जैसे चित्रकार किसी पुरुष की मूर्ति बनाने से पहले क्रम से उस व्यक्ति के प्रत्येक अवयवों को देखता है और बुद्धि में उसको एक व्यक्ति के रूप में स्थिर कर देता है

किन्तु जब चित्रफलक पर चित्र का निर्माण करने लगता है तब फिर अवयवों के क्रम से ही मूर्ति का निर्माण करता है वैसे ही यह तीन क्रम शब्द के विषय में देखा गया है । इसमें उदाहरण अलंकार है –

**मूर्ति------------अवयव क्रम**

**ज्ञान-------------स्फोट क्रम**

इसी प्रकार कारिका सं. 55 को देखिए –

**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।**
**तथैव सर्वशब्दानामेते पृथगिव स्थिते ॥**[१४]

जैसे तेज (प्रकाश) की ग्राह्यत्व = स्वयं प्रकाश्यत्व और ग्राहकत्व = अन्यवस्तुओं का प्रकाशकत्व ये दो शक्तियाँ हैं, वैसे ही सभी शब्दों की ये दो शक्तियाँ वस्तुतः एक होने पर भी परस्पर पृथक् जैसी रहती हैं । इसमें भी उदाहरण अलंकार है ।

**दीपक-----------ग्राह्यत्व, ग्राहकत्व**

**शब्द-----------ग्राह्यत्व, ग्राहकत्व**

इसी क्रम में कारिका सं. 89 को देखिए –

**यथैव दर्शनैः पूर्वैर्दूरात् सन्तमसेऽपि वा ।**
**अन्यथाकृत्य विषयमन्यथैवाध्यवस्यति ॥**[१५]

इसका अर्थ है – जैसे पहले – दूर से वृक्ष आदि वस्तु को अथवा समीप से भी अन्धकार में रज्जु आदि को देखने से हाथी वा सर्प आदि भिन्न वस्तु के रूप में ज्ञान कर बाद में समीप पहुँचकर अथवा प्रकाश होने पर पूर्व ज्ञान के विपरीत – यथार्थ वृक्ष वा रज्जु का निश्चय कोई करता है, वैसे ही वाक्य में पहले वर्ण-पद-विभाग का ज्ञान कर बाद में यथार्थ – विभागरहित वाक्य का ज्ञान करता है । इसमें उदाहरण है-

**वृक्ष ( हाथी )-----------मन की एकाग्रता**

**रस्सी( सर्प )-----------मन की एकाग्रता**

इस प्रकार उपर्युक्त कारिकाओं के अतिरिक्त भी कई कारिकाएँ है, जिनमें उदाहरण एवं उपमा अलंकार देखा जा सकता है । कारिकाओं संख्या है – 53, 91, 97, 104, 129, 130, 139, 140 में उदाहरण एवं 51, 79, 94, 98, 99, 100, 106, 111, 116, 123, 126, 145 में उपमा अलंकार का प्रयोग हुआ है । यह एक अल्प प्रयास है यह संख्या आगे पीछे भी हो सकती है । अपनी क्षमता के अनुसार ब्रह्म काण्ड में इन दो अलंकारों को ढूंढने का प्रयास

किया है । विद्वान् इसमें आगे बहुत कुछ सम्मिलित कर सकते हैं क्योंकि यह ग्रन्थ ज्ञान का आगार है ।

**सन्दभ**

1. वा. प. का. 1 ।
2. वा. प. का. 15 ।
3. वा. प. का. 20 ।
4. वा. प. का. 28 ।
5. वा. प. का. 35 ।
6. वा. प. का. 40 ।
7. वा. प. का. 41 ।
8. वा. प. का. 42 ।
9. वा. प. का. 46 ।
10. वा. प. का. 48 ।
11. वा. प. का. 49 ।
12. वा. प. का. 50 ।
13. वा. प. का. 52 ।
14. वा. प. का. 55 ।
15. वा. प. का. 89 ।

**सन्दर्भग्रन्थ**


1. महावैयाकरणश्रीभर्तृहरिविरचितं वाक्यपदीयम् (ब्रह्मकाण्डं), सूर्यनारायण शुक्ल, गोविन्द नारायण शुक्ल ।
2. हिन्दी शब्दकोश – डॉ. हरदेव बाहरी ।
3. अन्तर्जाल ।
4. रस अलंकार छन्द : राकेश कुमार ।



**संविदाध्यापिका विभागाध्यक्ष ( हिन्दी विभाग )**
**राष्ट्रिय संस्कृत संस्थानम् ( मा.वि. )**
**क. जे. सोमैया संस्कृत विद्यापीठम्**
**विद्याविहार, मुम्बई – ४०० ०७७**


★★★

# वाक्यपदीयब्रह्मकाण्डस्थ विषयविमर्शः

✍सौ. मैत्रेयी सुयोगपटवर्धन

**(पत्रलेखिकयाऽत्र वाक्यपदीयस्य तत्कर्तुश्च सामान्यं परिचयं प्रदाय शब्दस्य स्फोटध्वन्यात्मकत्वञ्च विज्ञाप्य शब्दार्थसम्बन्धानां नित्यत्वम्, प्रत्ययस्य समस्तस्य शब्दानुविद्धत्वम् शब्दस्य ब्रह्मत्वम्, परापश्यन्त्यादि-स्वरूपम्, व्याकरणस्य अजिह्मराजमार्गत्वं च मोक्षमाणानां कृते निरूपितम्। अत्रैको विशिष्टः प्रश्न उद्भावितः 'शब्दस्य ब्रह्मरूपत्वम् आहोस्वित् ब्रह्मणः शब्दरूपत्वमि'ति । तत्रेदं बोध्यम् - शब्दब्रह्मवादो वैयाकरणा-नाम् । तेषां मते ब्रह्मपदेन शब्दब्रह्मण एव ग्रहणम् । शब्दब्रह्मातिरिक्ता सत्ता ब्रह्मणो न भवति । अतस्तन्मते प्रश्नस्यास्य कृते अनवसर एव । यद्यपि भट्टनागेशेन द्वयोः सत्ता स्वीक्रियते तथापि नायं सिद्धान्तः शाब्दिकानां । यदि चात्रैव विचारो विधेय इति प्रतिज्ञा तर्हि सगुण-निगुणब्रह्मवद् व्यवस्था बोध्या । - स.)**

**आचार्यवसुरातेन न्यायमार्गात् विचिन्त्य सः ।**
**प्रणीतो विधिवच्चाऽयं मम व्याकरणागमः ॥[१]**

वाक्यपदीयस्य पुण्यराजटीकायां पुण्यराजेन एनं श्लोकम् उद्धृत्य आचार्यभर्तृहरेः गुरोनाम 'वसुरात' इति प्रतिपादितम् । भर्तृहरिः प्रायः वैक्रमसंवत्सरस्य चतर्थशतके अभवत् । तैः अनुष्टुप्छन्दसि रचितस्य वाक्यपदीयम् इति व्याकरणदार्शनिकग्रन्थस्य ब्रह्म-वाक्य-पदकाण्डेषु केवलं ब्रह्मकाण्डस्य विषयविमर्शान्तर्गते अहं तद्गतवर्णितं शब्दब्रह्मरूपम् इति विषयमाधारोकृत्य मम अल्पमत्या किञ्चिद् अभिवच्मि ।

ब्रह्मन् इति प्रातिपदिकस्य 'बृहत्त्वात् बृंहणत्वाद् वा आत्मैव ब्रह्मेति'[2] व्युत्पत्तिः । अस्य ब्रह्मणः विषये वेदवेदाङ्गोपनिषत्सु विविधरूपेण दार्शनिकस्पष्टीकरणं कृतम् । यथा - 'सर्वं खल्विदं ब्रह्म' (छा. 7/25/2), यस्मिन् सर्वाणि भूतानि.... । (ईशा. 7) एकं सद् विप्रा बहुधा वदन्ति, ब्रह्म सत्यं जगन्मिथ्या (ब्रह्सूत्रम्) । अयमात्मा ब्रह्मेति विविधमतानि वयं सर्वे जानीमः । पतञ्जलिमुनिना तथा भर्तृहरिणा स्वीये ग्रन्थे व्याकरणस्य दार्शनिकपक्षः वर्णितः । व्याकरणशास्त्रे ब्रह्मणः प्राप्तिनिरूपणं ज्ञात्वा मम कौतहलं वर्धितम् । अतः व्याकरण-शब्दब्रह्मरूपम् इति सङ्कल्पनायाः विमर्शः कर्तुम् अद्य चेष्टे ।

तत्र प्रथमं को नाम शब्दः? 'प्रतिपादको लोके ध्वनिः शब्दः इत्युच्यते ।'[3] यथा - गौरितिं - महाभाष्ये प्रथमाह्निके अस्य शब्दस्यार्थः - 'येनोच्चारितेन सास्नालाङ्गूलककुदखुर-विषाणिनां सत्प्रत्ययो भवति सः शब्दः ।'[4] सः शब्दः नित्यः इति वैयाकरणाः मन्यन्ते यतो हि 'सिद्धे शब्दार्थसम्बन्धे'[5] अस्य वाक्यस्य व्याख्यायां पतञ्जलिराह - 'सिद्धे शब्देऽर्थे सम्बन्धे चेति । नित्यपर्यायवाची सिद्धशब्दः । नित्यत्वं कूटस्थेष्वविचालिषु भावेषु वर्तते ।'[6] वाक्यपदीये ब्रह्मकाण्डे अपि भर्तृहरिः शब्दविषये इत्थं वर्णयति -

**नित्याः शब्दार्थसम्बन्धाः समाम्नाताः महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥**[७]

तथैव शब्दप्राधान्यात् शब्दप्रामाणिकाः मन्यन्ते यत् -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥**[८]

तादृशस्य शब्दस्य चर्चा व्याकरणशास्त्रे भागद्वयेन कृता तत्र स्फोटरूपशब्दः - स्फोटः यः अर्थं प्रकाशयति । तथा च शब्दस्य ब्रह्मरूपत्वम् आहोस्वित् ब्रह्मणः शब्दरूपत्वम् । वैयाकरणभूषणसारे कौण्डभट्टेन स्फोटनिर्णयप्रकरणस्य अन्तिमे भागे शब्दतत्त्वस्य ब्रह्मणः स्पष्टीकृतम् । यत् -

**इत्थं निकृष्यमाणं यच्छब्दतत्वं निरञ्जनम् ।**
**ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥**[९]

अर्थात् वाचकत्वेन अध्यस्तेभ्यः प्रकृतिप्रत्ययेभ्यः, जात्यादिसम्बन्धराहित्येन ज्ञाप्यमानं यद् अक्षरम् - यद् शब्दतत्त्वं तद् ब्रह्म एव इति । 'ब्रह्मतत्त्वमेव शब्दरूपतया भाति'[10] इत्यपि भूषणसारे प्रतिपादितम् । 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि । (छा. उप. 6/3/2) इत्यादि श्रुत्या आकाशाद्यात्मकार्यस्य तद्वाचकशब्दस्य अपि ब्रह्मैव उपादानत्वेन नामरूपात्मकद्वयवयवसमूहरूपम्'[11] इत्यपि कौण्डभट्टेन वैयाकरणभूषणसारे वर्णितम् ब्रह्मरूपम् ।

वाक्यपदीयस्य आरम्भे शब्दरूपविषये भर्तृहरिणा चर्चा द्विविधा कृता । प्रथमं तावत् यस्य व्यवहारः व्याकरणे अस्ति यस्य प्रतिपादिकसंज्ञा वर्तते । तादृशः शब्दः तथा यः व्यवहारशून्य-सच्चिदानन्दात्मकस्य सृष्टेः उपादानकारणीभूतस्य शब्दस्य चर्चा कृता । तैः वर्णितम् यत् -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[१२]

'एकमेवाद्वितीयं ब्रह्म', 'नेह नानास्ति किञ्चन' इत्यादयः श्रुतयः यथा ब्रह्मणः एकमेवाद्वितीयत्वं प्रतिपादयन्ति तथैव भर्तृहरिः तस्य शब्दात्मकत्वं प्रतिपादयति । 'वाग्वै ब्रह्म' इत्यादिश्रुत्या ब्रह्मणः वाग्रूपत्वं प्रतिपादितम् । अस्यां कारिकायामपि ब्रह्मणि शब्दरूपत्वं भर्तृहरिणा प्रतिपादितम् । वाक्यपदीयस्य स्वोपज्ञटीकायां वर्णितं यत् 'सर्वपरिकल्पातीतत्त्वं भेद-संसर्गसमतिक्रमेण समाविष्टं सर्वाभिः शक्तिभिर्विद्याविद्याप्रविभागरूपमप्रविभागं कालभेददर्शना-भ्यासेन मूर्तिविभागभावनया च व्यवहारानुपातिर्धर्माधर्मैः सर्वात्ववस्था स्वनाश्रितादिनिधः ब्रह्मेति प्रतिज्ञायते ।[13]' पश्यन्तीरूपा वाग् ब्रह्म तदेव अविद्यालक्षणया अन्तःपश्यदवस्थया भोक्तृतारूपया विशिष्टं ज्ञेयरूपशून्यं चैतन्यमात्रं (घटपटादि) जीव इत्यभिधीयते । 'स एव जीवो विवरप्रसूतिः'[14] इत्यादौ शिवसृष्टौ वर्णितायां कारिकायां पश्यन्तीवाग्रूपशब्दः अर्थप्रतिपादनेच्छया उपलक्षितः । मनोविज्ञानरूपत्वे आस्थितो मध्यमा वागुच्यते । तथा च तत्रैवोक्तं -

**इत्याहुस्ते परं ब्रह्म यदनादि तथाऽक्षयम् ।**
**तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक् ॥**[१५]

इत्थं भर्तृहरिणा ब्रह्मणः स्वरूपलक्षणं प्रथमायां पङ्क्तौ प्रतिपादितम् । अधुना 'अक्षरम्' इति भिन्नार्थकप्रतिपादकम् पदम् - अस्यार्थः - 'अक्षरं न क्षरं विद्यात् अश्नोतेर्वा सरोऽक्षरम्' ।[16] इति - सर्वान् व्याप्नोति - समस्तमपि जगत् व्याप्नोति । सर्वत्र यः विद्यमानः सत्ताभूतः तादृशं पदमक्षरम् इति । पुण्यराजकृतायां प्रकाशटीकायाम् उद्धृतः - 'तच्च अनिमितत्वादक्षरम्'[17] अत्र तत्पदस्य 'ब्रह्म' इत्यर्थः । भावप्रदोपव्याख्यानुसारेण 'विभक्तककारादिरूपाया वैखर्या वाचो निमित्तम्'[18] इत्यर्थः अक्षरम् । अतः प्रथमपङ्क्तौ सच्चिदानन्दस्वरूपब्रह्म तथा शब्दब्रह्म एतयोः ऐक्यम् भर्तृहरिणा प्रतिपादितम् । 'विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति वाक्येन सः भर्तृहरिः ब्रह्मणः तटस्थलक्षणं करोति । जगतः उत्पत्ति आविर्भावः यस्माद् ब्रह्मणः वर्तते । अन्यथारूपेण प्रतोयमानं जगत् भवति । तादृशमिथ्याजगत् प्रति इदं शब्दरूपब्रह्मतत्वं उपादानकारणीभूतं भवति । यथा वेदान्तिभिः विवर्तवादः स्वीक्रियते 'यतो वा इमानि.......', 'ब्रह्म सत्यं जगन्मिथ्या' तथा वैयाकरणैरपि शब्दब्रह्मणः विवर्तवादः प्रातिभासिकी सत्ता वा स्वीक्रियते। वेदान्ते व्याकरणे च विवर्तवादः लक्षणांशे समानः किन्तु लक्ष्यांसे (उदाहरणे) भिन्नः । अन्यथारूपेण प्रतीयमानः पदार्थः विवर्तः इति । वेदान्तिनः कथयति उदा. रज्जुसर्पवत् । वैयाकरणाः - स्वरूपात् अप्रच्युतस्य भिन्नरूपेणोपग्राहिता विवर्तः इति स्पष्टीकुर्वन्ति । घटपटादि-व्यावहारिकार्थाः विवर्तरूपाः । स्फोटसिद्धान्तेन प्रतिपादिता परा वाणी एव ब्रह्मरूपा इत्यस्य अर्थः । 'नादस्य क्रमजन्मत्वात् न पूर्वः न परश्च सः', 'भेदवान् इव शब्दः ज्ञायते' इत्यादिषु अर्थेषु स्वप्नविषयप्रतिभासवत् सत्तार्थः अत्र प्रतिपादितः । 'स्वप्नवत्' इत्यत्र द्वयाः सत्तयोः प्रवेशः - व्यावहारिकी प्रतिभासिकी च ।

विवर्तपदेन 'शब्दस्य परिणामोऽयमित्याम्नायविदो विदु:' इति भर्तृहरिणा एव प्रतिपादितमेव। तथा च विवर्तपरिणामयो: लक्षणे प्रतिपादिते यत् –

**अतत्त्वतोऽऽन्यथा प्रथा विवर्त इत्यदीरितः ।**
**सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीर्यते ॥**[१९]

यथा शुक्तौ रजतं विवर्त: किन्तु दुग्धं दधि भवति इति परिणाम: । तत्र विवर्तभावे का शक्ति:? तर्हि भर्तृहरि: वर्णयति –

**एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।**
**अपृथक्त्वेपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥**[२०]

एकस्यैव शब्दब्रह्मण: कथं विचित्रघटपटादिकार्यजनकत्वम् इति प्रश्नस्योत्तरम् अत्र लभते । एकमेवाद्वितीयं ब्रह्म भिन्नां शक्तिमाश्रित्य नानारूपेण प्रतोयमानं भवति । घटादिरूपेण भिन्नत्वेऽपि पृथिव्या: स्वतोऽभिन्नत्ववत् शक्तिरूपेण ब्रह्मण: भिन्नत्वेऽपि स्वतोऽभिन्नत्वमिति, ब्रह्मणि नानात्वं काल्पनिकमेकत्वं च वास्तवमिति भावप्रदीपटीकायां वर्णितम् ।

आरोपितकालशक्त्या सह ब्रह्मण: अभेद: अस्ति अत: भर्तृहरि: लिखति यत् –

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥**[२१]
**यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।**
**शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥**[२२]

महर्षिपतञ्जलिना महाभाष्ये व्याकरणाध्ययनस्य प्रयोजनानि प्रतिपादितानि तेषु 'लध्वर्थं चाध्येयं व्याकरणम् । असन्देहार्थं चाध्येयं व्याकरणम् ।'[23] इति महत्त्वपूर्णाशा: । व्याकरणस्य अध्ययनमाध्यमेन  एव शब्दब्रह्मण: प्राप्ति: भवति । मोक्षाधिगमा: भवितुम् अर्हन्ति । तथा च भर्तृहरिरपि स्वीये ग्रन्थे प्रतिपादयति यत् –

**यदेकं प्रक्रियाभेदैः बहुधा प्रविभज्यते ।**
**तद् व्याकरणमागम्य परं ब्रह्माधिगच्छति ॥**[२४]

ब्रह्मतत्त्वस्य प्राप्ति: व्याकरणविद्ययैव भवति, अत: वाक्यपदीये उक्तम् –

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**
**इयं सा मोक्षमाणानामजिह्वा राजपद्धतिः ॥**[२५]
**तदद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥**[२६]

अत: व्याकरणशास्त्रमेव मोक्षाधिगमस्य प्रथमसोपानम् अस्ति । इत्थं ब्रह्मण: शब्दरूपत्वं आहोस्वित् शब्दस्य ब्रह्मरूपत्वं व्याकरणे प्रतिपादितम् । ब्रह्साक्षात्कारी उपायश्च व्याकरणशास्त्रे विद्यते । अत: महाभाष्ये अपि महर्षिपतञ्जलिना प्रतिपादितम् – 'तस्मादध्येयं व्याकरणम् । आगम: खल्वपि ।।' [27]

**सन्दर्भाः -**


1. वैयाकरणप्रबन्धमुक्तावली, डॉ. अशोकचन्द्र गौडशास्त्री, नाग पब्लिशर्स, प्रथम संस्करणम्, पर्णसंख्या - 536 ।
2. ब्रह्मसूत्रशांकरभाष्य व्याख्या - भामती टीका - पं. ढुण्डिराजशास्त्री, चौखम्बा संस्कृत संस्थान - वाराणसी, द्वितीय संस्करणं - 2010, प्रथमाध्याय: - अध्यासप्रकरणम् - पर्णसंख्या - 2 ।
3. व्याकरण महाभाष्य, चारूदेवशास्त्री, मोतिलाल बनारसीदास, प्रथमसंस्करणम्, पर्णसंख्या - 04 ।
4. तत्रैव, महाभाष्य, पर्णसंख्या - 04 ।
5. तत्रैव, महाभाष्यम् ।
6. तत्रैव, महाभाष्यम् ।
7. वाक्यपदीयम्, भर्तृहरि:, कारिका ।
8. तत्रैव, कारिका ।
9. वैयाकरणभूषणसार:, चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पुनर्मुद्रितसंस्करण - 2011, कारिका 74. पर्णसंख्या 398 ।
10. तत्रैव, पर्णसंख्या - 399 ।
11. तत्रैव, पर्णसंख्या - 399 ।
12. वाक्यपदीयम् - कारिका 1 ।
13. वाक्यपदीयम् - चौखम्बा संस्कृत संस्थान, वाराणसी, तृतीय संस्करण, पर्णसंख्या 02 ।
14. तत्रैव, वाक्यपदीयम् - पर्णसंख्या - 03 ।
15. तत्रैव, वाक्यपदीयम् - पर्णसंख्या - 03 ।
16. वाक्यपदीयम्, स्वोपज्ञटीकासहितम्, मुद्रक: - प्रभा काळे, ग्रन्थ संशोधन प्रकाशन मंडळ, पुणे, टिळक महाराष्ट्र विद्यापीठम् ।
17. तत्रैव, पर्णसंख्या - 05 ।
18. तत्रैव, पर्णसंख्या - 04 ।
19. वाक्यपदीयम्-चौखम्बा संस्कृत संस्थान, वाराणसी, तृतीय संस्करणम्, पर्णसंख्या-6,7 ।
20. वाक्यपदीयम्, भर्तृहरि: - कारिका 02 ।

21. वाक्यपदीयम्, भर्तृहरिः - कारिका 03 ।
22. वाक्यपदीयम्, भर्तृहरिः - कारिका ।
23. व्याकरण महाभाष्यम्, प्रथमाह्निकम्, चारूदेवशास्त्री, मोतीलाल बनारसीदास, प्रथमसंस्करण 1968, पर्णसंख्या 706 ।
24. वाक्यपदीयम् - भर्तृहरिः, कारिका ।
25. वाक्यपदीयम् - भर्तृहरिः, कारिका ।
26. वाक्यपदीयम् - भर्तृहरिः, कारिका ।
27. व्या. महाभाष्यम् - चारूदेवशास्त्री, मोतीलाल बनारसीदास, प्रथमसंस्करणम्, 1968, पर्णसंख्या 05, (प्रथमाह्निकम्) ।

**भगवान परशुराम पञ्चक्रोशी शिक्षण मण्डल**
**आ. सी. काळे माध्यमिक विद्यालय**
**पेढे परशुराम, ता. चिपळूण, जि. रत्नागिरी,**
**महाराष्ट्र - ४१५ ६०५**

★★★

# वाक्यपदीये शब्दतत्त्वम्

✍श्रीरूपेशताटे

**(निबन्धेऽस्मिन् शब्दस्य ब्रह्मत्वेन प्रतिपादनक्रमे पूर्वं तत्स्वरूपम्, तत्प्राप्त्युपायः, तस्मिन्नेव क्रमे व्याकरणस्य महत्त्वम्, शब्दस्य स्फोट-रूपत्वम्, दर्शनभेदेन शब्दत्वापत्तिरित्यादिविचाराः वाक्यपदीयकारिका आश्रित्य मुख्यतो विवेचिताः । अत्रैकं महत्त्वपूर्णं वचो निवेदितम् - 'शब्दब्रह्मणः प्रतिभारूपो वेद'इति । प्रतिभा चात्र प्रतिभानरूपा । तथाहि वेदे शब्दब्रह्म प्रतिभातीत्यायाति । किं वा, शब्दब्रह्मणः प्रतिमारूपो वेदः इति पाठ्यम् । तस्मात् अतीन्द्रियस्य शब्दब्रह्मणो यदिन्द्रियग्राह्यं रूपं तद् वेद इति तदर्थो बोध्यः । - स.)**

अत्र शब्दतत्त्वस्य आरम्भः प्रथमया कारिकया एव भवति । भवन्तो जानन्ति एव

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[१]

यः अनादि अनिधनं शब्दतत्त्वं सः एव ब्रह्म । एको भूत्वा पृथक् पृथक् प्रतिभासते । जगतः प्रक्रिया येनाक्षरेण प्रचलति सः एव शब्दब्रह्म ।

तत्र वेदान्त **उक्तं अक्षरमम्बरान्तधृते ॥**[2] 1/3/10 अर्थात् अक्षर एव आकाशपर्यन्तं सर्वं जगत् धारयति । तद् अक्षरं शब्दब्रह्म इति उच्यते ।

इत्थं शब्दब्रह्मणः स्वरूपं व्यापकम् अमर्यादं विद्यते । तत् ककारादिवर्णानां कारणं भूत्वाऽपि अविद्यारूपिण्या बाह्यार्थवासनया घटपटाादिरूपेण प्रतिभासते । अयं संसारः यस्य परिणामः स एव शब्दब्रह्म ।

शब्दब्रह्मणः एव कालशक्तिम् उपाश्रित्य जगतः जन्मादिषड्विकाराः जायन्ते । शब्दब्रह्मण एव पतिभारूपः वेदः । स च एक एव शब्दब्रह्म ।

शब्दब्रह्मज्ञानं विना व्याकरणन भवितुं न अर्हति । लोके साध्वसाधुत्वेन शब्दस्य द्वैविध्यं परन्तु अत्र साधुशब्दज्ञाने एव पुण्यप्राप्तिः भवति । व्याकरणस्य अध्ययनं नाम तपः । यथा उक्तं पूर्वं शब्दब्रहमणः प्रतिभारूपः वेदः तस्य रक्षार्थं व्याकरणं पठनीयम् ।[3] वेदपुरुषस्य व्याकरणं मुखम् अस्ति इत्यपि वदति भाष्यकारः तथा च व्याकरणं प्रधानत्वेन स्वीकृतं, प्रधाने यत्नः फलवान् भवति अर्थात् व्याकरणेन शब्दस्य साधुत्वज्ञानेन स्वर्गप्राप्तिः इति फलम् ।

उक्तं च वाक्यपदीयकारेण –

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।**
**प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ॥**[४]

अर्थात् – व्याकरणं वेदस्य अत्यन्तं समीपं विद्यते । मुख्यं अङ्गं वर्तते । व्याकरणस्य पठनं नाम तपःसु उत्तमं तपः इति बुधाः मन्यन्ते ।

तथा च – **अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥**[५]

अर्थात् अर्थप्रवृत्ति कृते शब्दप्रयोगो निमित्तः । शब्दतत्त्वज्ञानं तु व्याकरणादृते भवितुंमशक्यम् ।

शब्दस्य द्वा भेदौ । शब्दः द्विविधत्वेन प्रयुज्यते । यथा ग्रन्थकारेण उक्तं –

**द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥**[६]

अर्थात् वाचकः शब्दः व्यङ्ग्यः व्यञ्जकः इति रूपद्वयेन वैयाकरणैः स्वीक्रियते । एकः स्फोटः अन्यः च वैखरी इति । अत्र स्फोटः वैखर्याः निमित्तं वर्तते । वैखरी तु अर्थबोधनाय भवति । प्राथम्येन शब्दः स्फोटरूपेण अक्रमेण च बुद्धौ स्थिरः भवति एवं विवक्षायां सत्यां क्रमेण नादरूपे प्रकटीभूय स्वात्मानं प्रकटयति, तथैव अर्थबोधोऽपि कारयति । एवं शब्दः स्वयं प्रकाशितो भूत्वा अर्थमपि प्रकाशयति ।

**शाब्दबोधकत्वनिर्णयः**

ग्राह्यत्वग्राहकत्वशक्तियुक्तः शब्दः यदा इन्द्रियद्वारा गृहोतः भवति तस्यैव अर्थबोधः भवति अगृहोतस्य न ।

अर्थात् श्रोत्रिन्द्रियद्वारा यः शब्दः श्रूयते तस्यैव अर्थबोधः बुद्धौ भवति । यः शब्दः न श्रूयते तद्विषये 'किम् अवदत्' इति पृच्छन्ति जनाः । यथा उक्तं वाक्यपदीयकारेण –

**विषयत्वमनापन्नैः शब्दैनार्थः प्रकाश्यते ।**
**न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ॥**[७]

अत्र ज्ञानस्य कारणद्वयं स्वीकृतं, एकः ज्ञाततया अपरः सत्तया । कस्यचित् वस्तुनः पूर्वज्ञानं भवति तदा एव तस्य सत्ता स्वोक्रियते । यथा धूमाग्निः अर्थात् धूमः अग्नेः ज्ञानस्य साधनम् । यदा धूमस्य ज्ञानं भवति तदा एव अग्निः अस्ति इति ज्ञायते । धूमः यदि न भवति तर्हि अग्निज्ञानं न सम्भवति, अतः धूमः अग्नेः ज्ञाततया कारणम् । प्रत्यक्षज्ञानार्थं ज्ञानेन्द्रियाणि कारणानि सन्ति । ज्ञानेन्द्रियाणि सत्तया कारणम् ।

**शब्दविषये मतभेदाः**

**वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।**
**कैश्चिदद्दर्शनभेदोऽत्र पवादेष्वनवस्थितः ॥**[८]

अर्थात् केचित् वायुं, अणुं, ज्ञानं, शब्दत्वेन स्वीकुर्वन्ति ।

अत्र शिक्षाकारः वदति –

**लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।**
**स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥[९]**

अर्थात् यदा वक्ता विवक्षति तदा सः प्रयतते तेन प्रयत्नेन प्राणवायुमध्ये क्रिया उत्पन्ना भवति, स एव वायुः कण्ठताल्वाादिस्थाने आघातेन शब्दः भवति ।

**जैनानुसारं** –

**अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः ।**
**छायातपमःशब्दभावेन परिणामिनः ॥[१०]**

अणौ विभागसंयोगात्मकसर्वकार्योत्पन्ना शक्तिः विद्यते या विभक्तत्वात् छाया, आतपः एवं अन्धकारः इति रूपे तथा संयुक्ते शब्दरूपे परिणता भवति ।

**भाष्यकारस्य मतानुसारेण**

**अथायमान्तरो ज्ञाता सूक्ष्मवागात्मनस्थितः ।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥[११]**

अयं शब्द एव आन्तरज्ञाता अस्ति । यः सूक्ष्मशब्दरूपे स्थितः स्वस्वरूपं प्रकटीकरोति तद् एव स्थूलशब्दरूपे प्रतिभासते । एतस्मात् शब्दः ज्ञानस्य परिणामः । ज्ञाता अर्थबोधने जठराग्निना संयुक्तो भूत्वा पाकं प्राप्नोति तदा प्राणवायुः मनसा सह ऊर्ध्वं प्रचलति । तदा अन्तःकरणरूपिणि मनसि आश्रितप्राणवायुः मनोधर्मे समावेश्य जठराग्नेः साहाय्येन शब्दरूपेन प्रतिभासते ।

**शब्दब्रह्मप्राप्तेः उपायः** –

यदा अत्यन्तः असत्यः अर्थः अपि शब्दात् उत्पद्यते तदा सदर्थोऽपि भवत्येव । जगति ये पदार्थाः सन्ति ते सर्वे शब्दस्य विषयाः एव । यथा खपुष्पतु कल्पना एव परं तस्यापि खपुष्पस्य सत्ता शब्दे विद्यमानाऽस्ति । अतः शब्द एव जगतः कर्ता विद्यते । महर्षिभिः हृदयाकाशे स्थित आत्मनि शब्दस्य देवत्वं स्वीकृतं तथैव तेन सह मुक्तिम् अपि इच्छन्ति । अविद्यया रहितः शब्दः ब्रह्म इति उक्तः ।

शब्दस्य सम्यक् स्वरूपे ज्ञाते सति आध्यात्मिकी सिद्धिः अपि भवति । साधुशब्द-तत्त्वज्ञः ज्ञानपूर्वकप्रयोगद्वारा ब्रह्मामृतम् अनुभवति । यथा उक्तं वाक्यपदीयकारेण –

**तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥**

अर्थात् यः शब्दस्य संस्कारः व्याकरणेन सिद्धरूपोऽस्ति । सः एव परमात्मनः प्राप्तिः उपायः अस्ति । यः शब्दब्रह्मणः प्रवृत्तिम् अवगन्तुं शक्नोति । सः एव ब्रह्मामृतं प्राप्नोति ।

**सन्दर्भाः -**


1. वाक्यपदीम् - 1 ।
2. वेदान्तदर्शनम् 1/3/10 ।
3. महाभाष्यम् प्रथमाह्निकम् ।
4. वाक्यपदीयम् 11 ।
5. वाक्यपदीयम् 13 ।
6. वाक्यपदीयम् 44 ।
7. वाक्यपदीयम् 56 ।
8. वाक्यपदीयम् 107 ।
9. वाक्यपदीयम् 108 ।
10. वाक्यपदीयम् 110 ।
11. वाक्यपदीयम् 112 ।
12. वाक्यपदीयम् 132 ।



**शिवाजी शिक्षा संस्था**
**इंग्लिश मिडियम सेकेण्डरी सेक्शन**
**पंतनगर, घाटकोपर ( प. )**
**मुम्बई ।**


★★★

# व्याकरणविभागीयशोधसङ्गोष्ठी














# व्याकरणविभागीयराष्ट्रियशोधसङ्गोष्ठ्या विशिष्टानि चित्राणि









